Licence No. 444 dated 26-4-1945.


VOL. IV NO. 1 APRIL 1948

JOURNAL

OF THE

TRAVANCORE UNIVERSITY ORIENTAL MANUSCRIPTS LIBRARY

TRIVANDRUM



[Annual Subscription Rs. 4]

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1948

EDITORIAL COMMITTEE:

Mahākavi, Rao Sahib, Sāhityabhūṣaṇa,
Ullūr S. Parameswara Aiyar, M. A., B. L.

N. Gopala Pillai, M. A.

Mīmāṁsakaratna V. A. Ramaswami Sastri, M. A., Śiromaṇi,
(Managing Editor and Publisher).

CONTENTS

सखे शिवदास ! मुधा खलु विफलयसि समाधिनिमीलनेन लोचनयुगलम् । पश्य पश्य —

सैवेयं भुवनैकसुन्दरितमा कन्दर्पदर्पद्रुमं
सिञ्चन्ती सुषमामृतेन वपुषश्चित्ताङ्कणे मादृशाम् ।
यामेवालिखदन्तरङ्गफलके सङ्कल्पशिल्पी यथा-
पूर्वं चन्दनचन्द्रमन्दपवना मर्माविधो निर्मिताः ॥ २७ ॥

चन्द्रलेखा — (स्वगतम्) (क) दिट्ठिआ मम वि किदे ईरिसं अवत्थन्तरं गदो महाणुभावो ।

शिवदासः — (अक्षिणी उन्मील्य, चन्द्रलेखां प्रति) सुन्दरि ! इतस्तावत् । सम्भाव्यतामयमखिललोकप्रख्यातमहिमा राजसिंहः सिंहलाधिनाथो मदनकेतुः शृङ्गारमञ्जरीवल्लभः । अयं हि —

कर्णाकर्णिकया तवामरवधूदुर्वारगर्वापहा-
तुन्मत्तीकृतकामिनीगुणगणानुत्कर्णमाकर्णयन् ।
दीर्घं निश्वसिति क्षितौ विलुठति व्यस्तक्रमं जल्पति
स्वप्नानीतभवन्मुखाम्बुजमपि प्रेम्णा समाजिघ्रति ॥ २८ ॥

अपि च —

जननयनचकोरीचन्द्रिके ! चन्द्रलेखे !
विसृज सुतनु ! मौनं मादृशो नापराधी ।
इति निपतति जल्पन् पादयोस्ते प्रमादा-
दधिभुवि लिखितायाश्चित्तसंकल्पितायाः ॥ २९ ॥

(क) दिष्ट्या ममापि कृते ईदृशं अवस्थान्तरं गतो महानुभावः ।

१. 'गर्वोपनिर्वापकान्' ख.

२. 'सुतनु विसृज' ख.

३. 'याः स्वप्नसन्दर्शितायाः' क.

चन्द्रलेखा -- (सप्रत्यभिज्ञं स्वगतम्) (क) एसो सो सिंहलाहि-णाहो मअणकेदू णाम। (सानन्दम्) मअणमोहणो एस महाणुभावो मम बन्धुविरहसम्भवं सन्दावं उम्मूलेअदि। (राजानमुपेत्य) जेदु सिङ्गार-मञ्जरीवल्लहो।

(प्रविश्य)

देवी -- (विलोक्य संशङ्कम्)(ख) का उण एसा महाराअस्स समीवे चिट्ठइ। होदु, एत्थ एव खम्भन्तरिदा जाणिस्सम्।

(तथा स्थिता।)

शिवदासः — भद्रे! महाराजस्य कृते मया त्वमाकृष्टासि मन्त्रबलेन।

देवी — (सरोषम्) (ग) सुट्ठु सोहइ कितवाणं समवाओ।

चन्द्रलेखा — (घ) अय्य! तुए मम सरीरमत्तं आअड्ढिअम्, महाराएण उण मणं पि आअड्ढेइ।

राजा — प्रिये! चन्द्रलेखे!

द्वन्द्वं सुन्दरि! पुण्डरीकमुकुलस्पर्धालु वक्षोजयो
गाढं वक्षसि निक्षिप द्रुततरं कन्दर्पदग्धस्य मे।
किञ्चोदञ्चय चञ्चलाक्षि! वदनं चुम्बामि बिम्बाधरं
बिब्बोकद्रविणेन केवलमहं क्रीतोऽस्मि दासोऽस्मि ते॥ ३०॥

(क) एष स सिंहलाधिनाथो मदनकेतुर्नाम। मदनमोहन एष महानुभावो मम बन्धुविरहसम्भवं सन्तापमुन्मूलयति। जयतु शृङ्गारमञ्जरी-वल्लभः।

(ख) का पुनरेषा महाराजस्य समीपे तिष्ठति। भवतु। अत्रैव स्तम्भा-न्तरिता ज्ञास्यामि।

(ग) सुष्ठु शोभते कितवानां समवायः।

(घ) आर्य! त्वया मम शरीरमात्रं आकृष्टं, महाराजेन पुनर्म-नोऽप्याकृष्यते।

---

१. 'आयड्ढं' ख.
२. 'दीसइ' ख.

देवी — (सेर्ष्यम्) (क) साहु महाराअ साहु! एत्तिअं वेलं तुह हिअअं अआणन्तीए उज्जूआए मए कदत्थिदो तुवं ति अहो! णिल्लज्जाम्मि।

चन्द्रलेखा — (स्वगतम्) (ख) दिढं मइ णिवडइ से दिट्ठिराओ। ता एव्वं दाव। (प्रकाशम्) महाराअ! अलं दाणीं एदेहिं दक्खिण्णवअणेहिं जेहिं देवीं खु अहिअरिअ तुइ अवराहो एव्व अवसिस्सइ।

राजा — प्रिये! मा मैवम्। कुतः —

देवीविरोधमनुशङ्क्य तवाङ्गसङ्ग-
सौख्यं चिराभिलषितं कथमुज्जहामि।
व्यालीभयेन मलयाचलकन्दरस्थं
को वा पटीरतरुसारमपाकरोति॥ ३१॥

देवी — (सोष्णं निश्वस्य) (ग) तं सुदं जं भत्तुमुखादो सुणिदव्वं इत्थिआजणेण।

शिवदासः — भद्रे! युक्तमभिहितं सिंहलपरमेश्वरेण।

केतकीकुसुमगर्भसम्भृतां
माधुरीजितसुधां मधूलिकाम्।
कण्टकावलिपरिक्षतोऽपि सन्
नैव मुञ्चति कृती मधुव्रतः॥ ३२॥

देवी — (सरोषम्) (घ) केहिं वि कण्णेजपेहिं अदिसन्धिदो महाराओ।

(क) साधु महाराज साधु। इयतीं वेलां तव हृदयमजानत्या ऋजुकया मया कदर्थितस्त्वमिति अहो निर्लज्जास्मि।

(ख) दृढं मयि निपतत्यस्य दृष्टिरागः। तदेवं तावत्। महाराज! अलमिदानीमेतैर्दाक्षिण्यवचनैर्यैर्देवीं खल्वधिकृत्य त्वयि अपराध एवावशिष्यते।

(ग) तत् श्रुतं यद् भर्तृमुखात् श्रोतव्यं स्त्रीजनेन।

(घ) कैरपि कर्णेजपैरतिसन्धितो महाराजः।

(राजा चन्द्रलेखां हस्ते गृहीत्वा चिबुकमुन्नयति ।)

देवी — (सहसोपसृत्य) (क) महाराअ ! जुत्तं जुत्तम् ।

राजा — (सविलक्षं स्वगतम्) हन्त ! महति सङ्कटे पतितोऽस्मि । (इति चन्द्रलेखां मुञ्चति ।)

देवी — (ख) मा खु मा खु वालीभएण चन्दणरसं मुञ्चेहि । (शिवदासमवलोक्य) कण्डअभएण केदईमहूलिअं वा ।

राजा — (स्वगतम्) कथमिदमपि श्रुतमत्रभवत्या । तदपगतः प्रसादनोपायः ।[1]

शिवदासः — (जनान्तिकम्) महाभागे शृङ्गारमञ्जरि[2] ! इतस्तावत् । कृतमिदानीं भर्तरि कालुष्येण । पश्य —

प्रेमा नाम प्रतिनवपदार्थान्तरे प्राणभाजां
निर्वेदं यज्जनयतितरां नित्यभुक्तः पदार्थः ।
यद्वा तद्वा भवतु तदिदं रूढमूलस्तु राग-
स्त्वय्येवास्ते कमितुरधुना सर्वमेतत्सहेथाः ॥ १२ ॥

देवी — (ग) एव्वं एदम् । किन्दु दक्खिण्णहआणं चिरंजुआणं वेलक्खमलिअधीराणं पुरदो ण ट्ठादव्वं मणस्सिणीहि ति णो धम्मो । ता अहं गमिस्सम् ।

शिवदासः — भद्रे ! इत्थमेव त्वया वैराग्यमुद्वहन्त्या न गन्तव्यम् । कुतः —

(क) महाराज ! युक्तं युक्तम् ।

(ख) मा खलु मा खलु व्यालीभयेन चन्दनरसं मुञ्च । कण्टकभयेन केतकीमधूलिकां वा ।

(ग) एवमेतत् । किन्तु दाक्षिण्यहतानां चिरं यूनां वैलक्ष्यमुदितधैर्याणां पुरतो न स्थातव्यं मनस्विनीभिरिति नो धर्मः । तदहं तावद् गमिष्यामि ।

---

१. 'रि कृत' ख.

२. 'मुक्तः' क.

दम्पत्योरितरेतरप्रणयिता लोकेन नो मृष्यते
गाढासूयतया स तद्विघटने जागर्ति च प्रायशः ।
भर्तारं विरहय्य कोपनतया मा याहि मायावता-
मस्मिन्नुत्सव एव केवलमहो हस्तावलम्बः क्रमः ॥ १४ ॥

देवी — (विचिन्त्य) (क) आ उववण्णं खु एदम् । ता किं मए एत्थ कादव्वम् ।

शिवदासः — (कर्णे) एवमिव ।

(देवी तूष्णीं तिष्ठति ।)

शिवदासः — (सस्मितम्) अयि मुग्धे! अलं विचिकित्सया । शिवदासः खल्वहमुपदेष्टा ।

देवी — (ख) का गई । एव्वं होदु । (प्रकाशं चन्द्रलेखां, प्रति) सहि चन्दलेहे! एहि । आलिङ्गेहि मम् ।

(चन्द्रलेखा सलज्जमुपसृत्यालिङ्गति ।)

देवी — (ग) सहि! दिट्ठमत्ता खु तुवं मह भइणीणिव्विसेसस्से सिणेहस्स भाअणं जाआसि । (राजानं प्रति) महाराअ! एसा मह सँही जह बन्धुजणं ण सुमरेदि तह विहेहि । (इति चन्द्रलेखां राज्ञेऽर्पयति ।)

(क) आ! उपपन्नं खल्विदम् । तत् किं मयात्र कर्तव्यम् ।

(ख) का गतिः । एवं भवतु । सखि चन्द्रलेखे! एहि । आलिङ्ग माम् ।

(ग) सखि! दृष्टमात्रा खलु त्वं मम भगिनीनिर्विशेषस्य स्नेहस्य भाजनं जातासि । महाराज! एषा मम सखी यथा बन्धुजनं न स्मरति तथा विधेहि ।

---

१. 'एष' ख.
२. 'दासः अयि' क.
३. 'भद्दिणी' ख.

राजा — (सहर्षावहित्थम्) को देव्याः प्रसादं नानुमन्यते । (इति गृह्णाति ।)

देवी — (क) ता अहं एदाए अलङ्कारणिमित्तं अन्तेउरं गच्छामि । (इति निष्क्रान्ता ।)

राजा — साधु शिवदास ! साधु । दुष्करनिष्क्रयास्तवोपकारप्रयोगाः[1] ।

भिक्षुः — (सबहुमानं स्वगतम्) अहो महानुभावः खलु शिवदासः । अनेन हि —

प्रत्यक्षदृष्टनिजवल्लभदुर्नयापि
देवी तथा नयविदा गमिता प्रसादम् ।
नीरन्ध्रसन्तमससंध्रियमाणमूर्तिः[2]
सन्ध्या यथा शरदि कैरववल्लभेन ॥ ३५ ॥

(नेपथ्ये[3])

भद्रे चन्द्रलेखे ! इतस्तावत् —

केलिस्नानविलुप्तपत्रलतयोर्वक्षोजयोरन्तरे
हारस्ते परिखेलतु[4] स्मितसखैर्मुक्ताफलैर्गुम्फितः ।
दिङ्मातङ्गशिरस्पदप्रतिभटे काञ्ची च काञ्चीपदे
कामाद्वैतवदावदेव लसतु प्रकाशमातन्वती ॥ ३६ ॥

शिवदासः — महाराज ! विसृज्यतामियम् ।

राजा — प्रिये ! शिवदासप्रणयमनुतिष्ठ ।

(क) तदहमेतस्या अलङ्कारनिमित्तमन्तःपुरं गच्छामि ।

---

१. 'प्रकाराः' ख.
२. 'मानमारम' ख.
३. 'नैपथ्ये' ख.
४. 'लगतु' ख.

चन्द्रलेखा—(क) जं महाराओ आणवेदि ।

(इति राजानं सस्पृहमवलोकयन्ती निष्क्रान्ता)

भिक्षुः—सिंहळपते ! कियच्चिरमस्माभिरनवाप्तमनोरथैः स्थीयताम् ?

राजा—इदानीमियमेवारम्भः ।

शिवदासः—महाराज ! कोऽस्य भगवतो मनोरथः ।

राजा—एवमिव ।

शिवदासः--(करावृतमुखं विहस्य स्वगतम्) साधु मन्मथ ! साधु ।

कुलं वा शीलं वा विनयमथवा शौर्यमपि वा
प्रभुत्वं वा न त्वं गणयसि कदाचित्तनुभृताम् ।
स्वतन्त्रस्त्वं यस्मै नमयसि धनुः पुष्पघटितं
स तावद्दासत्वं चतुरयुवतीनां वितनुते ॥ ३७ ॥

साधूक्तं मदनवर्मणा । (विचिन्त्य) भवतु ।

चापल्यस्य परां काष्ठां मयायमनुभाव्यते ।
ततस्संसारभागेषु विरक्तिं प्रापयिष्यते ॥ ३८ ॥

(प्रकाशम्) भगवन् ! अपि सत्यमभिदधाति सिंहलराजः ?

भिक्षुः—(सलज्जम्) कथमयमप्यसत्यं ब्रवीतु नाम । अतः परं तु भवदायत्ता मम लोकयात्रा ।

शिवदासः—यद्येवं तदिदं गृहाण । (इति मदिराचषकं पूरयति ।)

भिक्षुः--महाभाग ! किमेतत् ।

शिवदासः--

प्रोदञ्चत्किलिकिञ्चितव्यतिकरे सिद्धौषधं योषितां
मुख्यं संवननं पुनर्भगवतः साक्षाद्भवानीपतेः ।
पीयूषेण समं पुरा विमथिताद् दुग्धाम्बुधेरुत्थितं
तत्तादृङ्मदिराभिधं मदपदं किञ्चित्पदार्थान्तरम् ॥ ३८ ॥

भिक्षुः—(सजुगुप्सम्) महाभाग ! परिव्राजकैः परिहरणीयमेतत् । तन्न गृह्णामि ।

(क) यन्महाराज आज्ञापयति ।

---

१. 'दासः— कोऽस्य' ख.

२. 'वितनुते । (विचिन्त्य)' ख.

शिवदासः— (विहस्य) कोऽन्य एवं परिव्राजकधर्माधिकारी ।

अनङ्गलेखाधरशीधुपाने
समुत्सुकस्त्वं किल कामलोकः ।
शिवार्चनेऽस्मिन् मदिरोपयोगे
साक्षात्परिव्राडिति युक्तमेतत् ॥ ३९ ॥

भिक्षुः—(सविलक्षम्) का गतिः ।

(शिवदासः भिक्षवे चषकं ददाति । भिक्षुः गृहीत्वा पिबति ।)

राजा—साधु शिवदास ! साधु । कोऽत्र भोः ?

(प्रविश्य)

काञ्चुकीयः—आज्ञापयतु महाराजः ।

राजा—भद्र ! एवमुद्घुष्यतां जनपदेषु—

ये नाम केचन तपोनिधयो वसन्ति
संसारधर्ममपहाय मदीयराज्ये ।
ते सर्व एव मदिरामनिशं पिबन्तो
मच्छासनेन गणिकासदनं भजन्तु ॥ ४० ॥

शिवदासः— (स्वगतम्) इदं हि तत्साहसप्रबलीकरणं नाम ।

(प्रकाशम्)

अहो ! महाराज ! तव प्रभावः
प्रजासुखोत्पादनतत्परोऽयम् ।
पूर्वेषु को नाम समानवृत्ति-
रेवंविधं शासनमुच्चकार ॥ ४१ ॥

भिक्षुः—(ससम्भ्रमम्) महाभाग ! किमेतत् ।

आस्थानमेतदखिलं भ्रमतीव हा ! मे
दृष्टिर्न च क्वचन सज्जति किं करोमि ।

---

१. 'खलु' ख.
२. 'परं परि' ख.
३. 'मपनीय' ख.
४. 'कामिकतां व्रजन्तु' ख.
५. 'तु' ख.
६. 'भिक्षुः—महाभाग' ख.

शिवदासः—

धैर्यं[1] भजस्व भगवन्नधुना सुराया-
स्तत्पूर्वपानजनितस्तव सम्भ्रमोऽयम् ॥ ४२ ॥

(इत्युत्थाय भिक्षुमवलम्बते ।)

काञ्चुकीयः—(स्वगतम्) शान्तं शान्तं पापम् । कथं स्वामिनमप्यधर्मे प्रवर्तयत्ययं लाटदेशीयो हताशपाषण्डः । अथवा परिहासरसप्रकारोऽयं भविष्यति ।

(इति तूष्णीं निष्क्रान्तः ।)

(प्रविश्य)

चेटी—(क) जेदु महाराओ ।

राजा—चन्दनिके ! किमागमनप्रयोजनम् ?

चेटी—(ख) सुणादु महाराओ । (संस्कृतमाश्रित्य)

उत्कण्ठापरिपाण्डुकेरलवधूगण्डप्रभैर्निर्मितां
बिभ्राणा नववीटिकां करतले ताम्बूलवल्लीदलैः ।
कस्तूरीपरिमेलितस्तनभरा त्वन्मार्गदत्तेक्षणा
लीलावेश्मनि वर्तते कुतुकिनी सा चन्द्रलेखाधुना[2] ॥ ४३ ॥

राजा—(सहर्षौत्सुक्यम्) भद्रे ! अपि सत्यमिदम् ?

चेटी[3]—(ग) देव ! अणभिणादकेदवो दासअणो ।

शिवदासः—तत्किमुदास्ते महाराजः ।

यूथिका भजतु बालरसालं
कौमुदी श्रयतु शीतमयूखम् ।
त्वामसौ सरसकेलिधुरीणा
लोकनाथमधिगच्छतु तन्वी ॥ ४४ ॥

(क) जयतु महाराजः ।

(ख) शृणोतु महाराजः ।

(ग) देव ! अनभिज्ञातकैतवो दासजनः ।

१. 'स्थैर्यं' ख.

२. 'सुवदना' क.

३. 'चेटी — अण' ख.

(राजा उत्थाय शिवदासस्य कर्णे एवमिवेति[1] कथयित्वा चेट्या सह निष्क्रान्तः।)

शिवदासः— जम्भकर्ण !

(प्रविश्य)

दूतः—आज्ञापयतु[2] महाभागः।

शिवदासः— (कर्णे) एवमिव।

(दूतो निष्क्रान्तः।)

भिक्षुः—महाभाग ! ननूक्तमेव भवदायत्ता मम[3] लोकयात्रेति तत्किमुदास्यते ?

शिवदासः— (स्वगतम्) अहो निर्बन्धः। (प्रकाशम्)भगवन् ! मा त्वरिष्ठाः। अयमेवात्र प्रस्तावः।

(ततः प्रविशति दूतोपदिश्यमानमार्गानङ्गलेखा।)

अनङ्गलेखा—(क) भद्द जम्भअ ! अय्यसिवदासस्स सासणेण वि तह णाम साहसआरी भिरुद्धवेसो भिक्खुओ कहं सम्भावइज्जइ।

दूतः—भद्रे ! अयमेव[4] गणिकाधर्मः। पश्य—

भवत्वक्ष्णा काणो भवतु च जराशुष्कवदनः
पदा खञ्जो वास्तु व्रणनिचितगात्रो भवतु वा।
जटी वा मुण्डी वा भवतु खुरणा वा किमु गिरा
यतो वित्तापत्तिः स खलु गणिकानां प्रियतमः॥ ४५॥

अनङ्गलेखा—(सस्मितम्) (ख) एवं एदम्। किन्दु अस्समदूसणं ण इत्थिआधम्मो। अहव तत्तहोदो सिवदासादो एव्व सव्वं जाणिस्सम्। ता कहिं णु खु तत्तभवन्तो।

(क) भद्र जम्भक ! आर्यशिवदासस्य शासनेनापि तथा नाम साहसकारी विरुद्धवेषो भिक्षुकः कथं सम्भाव्यते।

(ख) एवमेतत्। किन्तु आश्रमदूषणं न स्त्रीधर्मः। अथवा तत्रभवतः शिवदासादेव सर्वं ज्ञास्यामि। तत् कुत्र नु खलु तत्रभवान्।

१. 'एवमिवेत्युक्त्वा' ख.
२. 'आदिशतु' ख.
३. 'मे' ख.
४. 'मेव हि त्वादृशीनां धर्मः। कुतः — भवत्वक्ष्णा' ख.

दूतः—(अग्रतो निर्दिश्य) एष तिष्ठति स महात्मा । तदुपसर्पतु भवती ।

अनङ्गलेखा—(उपसृत्य) (क) जेदु महाभाओ ।

शिवदासः—भद्रे अनङ्गलेखे ! अमुं भगवन्तं प्रणम्योपविश ।

अनङ्गलेखा तथा करोति ।)

भिक्षुः—(सहर्षं स्वगतम्) अहो ! मम सुचरितपरिपाकः[1] । कुतः —

जीवातुर्मे मदनविशिखव्रातविश्लिष्टसन्धे-
विश्लेषाग्निग्लपितमनसस्त्यक्तकृत्यान्तरस्य ।
यस्मादेषा नयनविषयं गाहतेऽनङ्गलेखा
मन्ये सोऽयं जयति शिवदासस्य मत्पक्षपातः ॥ ४६ ॥

शिवदासः—सुन्दरि ! अपि कुशलमस्य योगिनामपि मनोविकारजनकस्य शरीरस्य[2] । (भिक्षुर्लज्जते ।)

अनङ्गलेखा—(ख) महाभाअ ! अज्ज • विसेसेण तुह्माणं सम्भावणाए ।

शिवदासः—भद्रे ! किमप्याख्यमातुमभिलषामि ।

अनङ्गलेखा—(ग)अणुग्गहिदह्मि ।

शिवदासः—(जनान्तिकम्) अयं खलु भगवान् विष्णुमित्रस्त्वया वचसामगोचरां दशामारोपितः । तथाहि—

अक्षस्रजा गणयतीव गुणांस्त्वदीयान्
दण्डं च पञ्चशरशासनवद्धाति ।
काषायमावहति रागमिवैष मूर्तं
धूर्ते ! किमेनमनु ते वलते न चेतः ॥ ४७ ॥

(क) जयतु महाभागः ।

(ख) महाभाग ! अद्य विशेषेण युष्माकं सम्भावनया ।

(ग) अनुगृहीतास्मि ।

---

१. 'परी' ख.

२. 'अप्यनामयमस्य' ख.

अनङ्गलेखा—(क) महाभाअ ! एदस्स अस्समदूषणे अकुसलह्मि ।

शिवदासः—मुग्धे ! दूरे तावदाश्रमदूषणं नाम । इदानीन्तु चटुलकटाक्षविक्षेपैरेनमानन्दय ।

अनङ्गलेखा—(सस्मितम्) (ख) एव्वं होदु ।

(इति भिक्षुं तिर्यक् पश्यति ।)

भिक्षुः—(स्वगतम्)

मुहुर्वलितकन्धरं चटुलचारुचिल्लीलतं
पतन्ति मयि दृष्टयश्चलदृशो यथा सस्पृहम् ।
तथाहमिह तर्कयाम्यखिललोकशोकच्छिदो
विधेर्मयि विजृम्भते प्रतिकलं कृपानुग्रहः ॥ ४८ ॥

अनङ्गलेखा—(ग) भअवं परिव्वाजअ ! अलं दाणिं अज्जोग्गे अहिणिवेसेण ।

भिक्षुः—(उपेत्य) प्रिये ! मामैवम् —

नालं मे मनसिशयस्य पञ्चबाणीं
प्रव्रज्या चकितमृगाक्षि ! सन्निरोद्धुं ।
आदीप्तां ज्वलनशिखां तिरश्चिकीर्षोः
कस्यासौ सिचयदशैति साधनत्वम् ॥ ४९ ॥

शिवदासः—(जनान्तिकम्) अनङ्गलेखे ! इमं किमपि कोपय तावत् । यतः सुमत्तकुपितानां भावज्ञानं सुकरमाहुः ।

अनङ्गलेखा—(घ) तह । (प्रकाशम्) भअवं ! मा एव्वं भण ।

मअणविलासविरुद्धं चिरआलुप्पण्णपुण्णपरिपाअम् ।
एदं अस्समसारं मा मह फंसेण दूसेहि ॥ ५० ॥

भिक्षुः—(सकृपणम्)

(क) महाभाग ! एतस्य आश्रमदूषणेऽकुशलास्मि ।

(ख) एवं भवतु ।

(ग) भगवन् परिव्राजक ! अलमिदानीं अयोग्येऽभिनिवेशेन ।

(घ) तथा । भगवन् ! मैवं भण ।

मदनविलासविरुद्धं चिरकालोत्पन्नपुण्यपरिपाकम् ।
एतमाश्रमसारं मा मम स्पर्शेन दूषय ॥

तन्मे ब्रह्म परं तदेव च पुनर्भिक्षुत्वलब्धेः फलं
सोऽयं जन्मसहस्रसञ्चिततपस्संभारपाकोदयः ।
पादौ बालतरुप्रवालमृदुलावुत्सङ्गमारोपय-
न्मन्दं मन्दमिमौ करेण यदहं संवाहयेयं तव ॥ ५१ ॥

(इति पादयोः पतति ।)

अनङ्गलेखा—(सनिन्दं परावृत्य) (क) उट्ठेहि दुट्ठवडुअ, उट्ठेहि । किं अज्ज वि दुरहिलासं न मुञ्चेसि ।

भिक्षुः— (सरोषमुत्थाय) आः पुंश्चलि ! किं किं प्रलपसि ।

अष्टाङ्गब्रह्मचर्यव्रतधृतमतयो योगिनस्त्वादृशीना-
मन्ये चाहारनिद्रानिधुवननिरताः प्राणिनस्तुल्यकक्ष्याः ।
धिग्धिङ्मामीदृशीं त्वामनुनयकठिनां यः प्रियाकर्तुकामः
सिंहीदंष्ट्राशलाकां सपदि करतलेनाजिहीर्षामि मोहात् ॥

भो शिवदास ! कृतं कृतमनया दुराचारया । अपि च—

कनकशिखरी विद्याधीशो महेन्द्रसुरद्रुमा-
वपि न गमिता निस्सारत्वं मनागपि विभ्रमैः ।
इति खलु गतेर्मान्द्ये चिन्ताभरात्परिनिष्ठिते
जघनगरिमा वारस्त्रीणां बिभर्त्ययशः परम् ॥ ५२ ॥

किञ्च—

निम्नं क्वाप्युन्नतं क्वाप्यतिकृशमपरत्रान्यतोऽत्यन्तपीनं
सावज्ञं स्त्रीति योगी विधिरकृत यथाप्राप्तमङ्गं यदासाम् ।
मूढास्तन्नाम नाभिस्तनमुदरनितम्बं च चारुत्वपक्षे
निक्षिप्तं मन्वते चेदिह घुणलिपिषु व्यस्त एवावमानः ॥

शिवदासः—प्रसीदतु प्रसीदतु भगवान् । अथवा अनङ्गलेखे ! त्वमेव तावत् प्रसादयातिकोपनमेनम् । यतः—

पुरुषान् परुषानपि स्वभावा-
न्म्रदिमानं गमयन्ति नार्य एव ।

(क) उत्तिष्ठ दुष्टबटुक ! उत्तिष्ठ ! किमद्यापि दुरभिलाषं न मुञ्चसि ।

---

१. 'मारोपितौ' ख.

२. 'वान् अनङ्ग' ख.

नतु दीधितयस्तुषारभानोः
स्वयमेव द्रवयन्ति चन्द्रकान्तान् ॥ ५५ ॥

अनङ्गलेखा—(उपेत्य) (क) भअवं ! पसीद ।

अणुराअपरिक्खणोइदाइ
पढमं चाडुसदाइ दंसअन्ति ।
अह बाहुलआहि कण्ठणालं
परिगिह्णन्ति जुवाणमम्भकाओ ॥ ५६ ॥

भिक्षुः — (सहर्षम्)

हरिचन्दनशीतलैस्त्वमङ्गै-
र्मम तीव्रस्मरदाहमाहरन्ती ।
वितरातिघनामनङ्गलेखे !
शतकृत्वो गतशङ्कमङ्कपालीम् ॥ ५७ ॥

(नेपथ्यादर्धप्रविष्टः पुरुषः शिवदासं प्रति)

वारिराशिपरिखावलयाया
भूषणं किमपि यो वसुधायाः ।
वापिकातटपटीरकुटीरे
त्वत्प्रतीक्षणपरः स किलास्ते ॥ ५८ ॥

(निष्क्रान्तः ।)

शिवदासः — (उत्थाय) भद्रे अनङ्गलेखे ! स्वनिलयमेव तावत् प्रतिष्ठस्व पुनर्दर्शनाय ।

(क) भगवन् ! प्रसीद ।
अनुरागपरीक्षणोचितानि प्रथमं चाटुशतानि दर्शयन्ति ।
अथ बाहुलताभ्यां कण्ठनालं परिगृह्णन्ति यूनामस्मादृशः ।

---

१. 'इदाइं' ख.
२. 'गह्णन्ति' ख.

अनङ्गलेखा — (क) महाभाअ ! तह । (इति निष्क्रान्ता ।)

भिक्षुः — (समनोभङ्गं स्वगतम्) अहो ! निर्घृणता शिवदासस्य ।

अभिवारिधि यस्तरङ्गिणी-
मनुकूलां प्रथमं न्ययूयुजत् ।
अधुना तु स एव तामहो !
प्रतिकूलीकुरुते समीरणः ॥ ५९ ॥

(प्रकाशम्) महाभाग ! कथमीदृशो मम भागधेयपरिणामः ।

शिवदासः — भो महायोगिन् ! किमिदं यावज्जीवं चापलमेवाभिनिविशसे ?

क्वासौ संसारसिन्धोस्सुतरणतरणिर्योगिनामाश्रमस्ते
कामूर्निर्वाणचन्द्रोदयबहुलनिशाः केवलं वेशनार्यः ।
कल्याणं कामयेथाः परिचिनु च सभामुज्ज्वलां सज्जनानां
तीर्थस्नायी दुराशाकलुषितमधुना मानसं वा पुनीहि ॥ ६० ॥

जम्भक ! एहि तावत् । (इति निष्क्रान्तः ।)

भिक्षुः — हन्त ! वञ्चितोऽस्मि पाषण्डचण्डालेन । किमिदानीं करिष्ये । (विचिन्त्य) कष्टं भोः कष्टम् ।

पूर्वं तावदनङ्गशासनबलात्तत्साहसिक्यं कृतं
भूयः सिंहलभूपतिस्सकृपणं मोहान्मयोपाश्रितः ।
पापात्मा शिवदास एष च पुनर्वात्तित्रपं सान्त्वितः
संसिद्धो न मनोरथोऽयमथवा को वेत्ति वृत्तिं विधेः ॥ ६१ ॥

(क) महाभाग ! तथा ।

१. 'खा — तह' ख.
२. '(प्रकाशं) — कथ' ख.
३. 'प्रायशो' ख.
४. 'वशात्त' ख.
५. 'भूमिप' ख.
६. 'संसिद्धो' ख.

(¹नेपथ्ये)

भद्र शिवदास ! इत इतः ।

सरस्वतीरारामे सरसिजमधूलीपरिमला-
नजस्रं वर्षद्भिश्शिशिरपवनैश्शीतलतले ।
वसन्²नेतां वेलां गमयति ललाटन्तपरविं
महाराजः श्रीमन्नुपसर तदेनं कुतुकिनम् ॥ ६२ ॥

भिक्षुः — (आकर्ण्योर्ध्वमवलोक्य) कथं मध्याह्नः । सम्प्रति हि गर्भगृहाभ्यन्तरेषु —

पाटीरपङ्कपरिदिग्धपयोधराभि-
र्धर्माम्बुलेशदरलुप्तविशेषकाभिः ।
आश्लेषचुम्बनप³णेनदरोदरेण
क्रीडन्ति केऽपि सुभगास्सह ⁴कामिनीभिः ॥ ६३ ॥

(सनिःश्वासम्) सर्वथा मध्याह्नस्नानविधिर्न लङ्घनीयः ।

(निष्क्रान्तः ।)

(ततः प्रविशति परिसरोपविष्टेन शिवदासेन सह मणिशिलातलोपविष्टो राजा देवी शृङ्गारमञ्जरी चन्द्रलेखा चामरधारिणी जयन्तिका च ।)

राजा —

प्रेङ्खच्चामरशीतमारुतधुतस्वेदाम्बुवक्त्राम्बुजाः
श्रीखण्डद्रवदिग्धमुग्धवपुषः स्वेच्छानुकूलाङ्गनाः ।

---

१. 'नैपथ्ये' ख.
२. 'गमयसि' ख.
३. 'परेण' ख.
४. 'कामिनीभिः । ततः' ख.

ये केचिद् गमयन्ति तिग्मकिरणप्रौढावलेपामिमां
बेलां ते हि पिबन्ति हन्त ! सुभगाः संसारमाध्वीरसान्
[॥ ६४ ॥

शिवदासः — (स्वगतम्) भोः कष्टम् । तत्तादृशमाश्रमं बिभ्राणोऽपि भगवान् विष्णुमित्रस्संसारसागरे परिभ्राम्यति । तदिदानीं ययास्य मनो दूषितं तयैवं वैराग्यमप्युत्पादयिष्यामि । कुतः —

स्त्रीमूलस्योपतापस्य स्त्रिय एव प्रतिक्रिया ।
वह्निश्च वह्निमूलस्येत्यामनन्ति मनीषिणः ॥ ६५ ॥

किन्त्वनङ्गलेखा न प्रभवत्यत्र कृत्ये । यतः —

अपि विशन्ति कृशानुशिखावली-
मपि लिहन्ति महासिलतामुखम् ।
अपि गरं निगिरन्ति न कामिषु
प्रकटयन्ति मनो वनिताजनाः ॥ ६६ ॥

तत् किं करिष्ये । (इति चिन्तां नाटयति ।)

राजा — प्रिये शृङ्गारमञ्जरि ! चन्द्रलेखे ! माननीयः खल्वयं महात्मा शिवदासः । अनेन हि —

भिक्षाकरप्रभवमन्यतुलाविहीनं
धन्योत्तरैरपि दुरापमहो ! महार्घम् ।
रत्नद्वयं तदिदमेकसुवर्णपिण्डे
यत्नं विना विनिहितं विहिताभिसन्धि ॥ ६७ ॥

---

१. 'न परे संसार' क.

२. 'रसान् । भिक्षुः—सर्वथा मध्याह्नस्नानावेधिनं लङ्घनीयः । (इति निष्क्रान्तः
शिवदासः—' ख.

३. 'वास्य विरक्तिरुत्पादनीया' ख.

४. 'त्वस्मिन्' ख.

५. 'कुतः' क.

[1]उभे — (सलज्जस्मितम्) (क) महाराअ ! किं ण सम्भावीअदि सव्वुण्णअग्गुणमहत्तरेसु ।

शिवदासः — (सोल्लासं स्वगतम्) भवतु दृष्टम् । तदेवं तावत् । (इति ध्यानं नाटयति ।)

([2]नेपथ्ये)

कष्टं कष्टं केलिकान्तारदेशे
कुर्वाणासौ स्वेन पुष्पावचायम् ।
दिष्टादिष्टा दुष्टसर्पेण दष्टा
दिष्टान्तं च प्रापितानङ्गलेखा ॥ ६८ ॥

(सर्वे सम्भ्रमं रूपयन्ति ।)

(प्रविश्य सम्भ्रान्तो भिक्षुः)

भिक्षुः — परित्रायतां परित्रायतां महाराजः ।

राजापचारो नियतं [3]प्रजाना-
मकालमृत्युप्रतिपत्तिहेतुः ।
अपोहितुं दुर्विषहं तदागः
प्रसीद दातुं मम जीवितं च ॥ ६९ ॥

देवी — (ख) अहो अच्चाहिदम् । तुवरदु तुवरदु महाराओ तवस्सिणीए [4]जीवियपरिरक्खणाए ।

राजा — (ससम्भ्रमम्) सखे शिवदास ! किमनुष्ठेयमस्माभिः ?

(क) महाराज ! किं न सम्भाव्यते सर्वोन्नतगुणमहत्तरेषु ।

(ख) अहो अत्याहितम् । त्वरतां त्वरतां महाराजस्तपस्विन्याः जीवितपरिरक्षणाय ।

---

१. 'उभे - - महाराअ' ख.

२. 'नैपथ्ये' ख.

३. 'प्रजायाम' क.

४. 'जीवियं परित्ताडुम्' ख.

शिवदासः — (निमित्तं सूचयन्) अप्रमत्तास्तिष्ठन्तु भवन्तः । (इति द्रुतपदं निष्क्रान्तः ।)

भिक्षुः — (उपविश्य) राजन् ! किं मन्यसे ?

असावसाधारणमन्त्रवैदुषी-
धुरन्धरो दीनदयाधनोऽपि वा ।
इदन्तु नस्साम्प्रतमप्यरुन्तुदं
मनोगतं शल्यमपाकरिष्यति ॥ ७० ॥

राजा — भगवन् ! को जानीते महतां चरितानि । तत् क्षणं प्रतिपालयामः ।

(ततः प्रविशत्यनङ्गलेखाशरीरमाविशञ्छिवदासः ।)

शिवदासः — (स्वगतम्) अहं तावन्मन्त्रबलेन प्रथममनङ्गलेखायाः प्राणानाकृष्य यदृच्छामृते कस्मिंश्चित्तिरश्चि विनियुञ्जानो मायादन्दशूकेन सन्दंशितमस्याश्शरीरं लताकुञ्जनिक्षिप्तनिजकलेबरः सन् परपुरप्रवेशविद्यया प्रविशन्नस्य विष्णुमित्रस्य भिक्षोर्मनश्चापल्यमपनेतुं व्यवसितोऽस्मि । एवं च —

अम्बरं विगतमेघकलङ्कं
निर्मला शरदमभ्युपयातु ।
योगिनोऽस्य हृदयं त्रुटिताशा-
बन्धनं भजतु शान्तिमुदग्राम् ॥ ७१ ॥

परिपूर्णमनोरथश्च भवतु तत्रभवान्मदनवर्मा, यस्त्विदानीं निजराज्यविनाशमाशङ्कमानो दुःखमास्ते ।

(इत्युपसर्पति ।)

भिक्षुः — (सहसावलोक्य सहर्षविस्मयम्) राजन् ! सिंहलपते ! पश्य पश्य —

---

१. 'क'मातृकायां (लक्ष) ३२ तमात् पत्रादनन्तरं एकं पत्रं न दृश्यते । तस्मादत्र 'त्रुटिताशाबन्धनं' इत्यारभ्य उत्तरत्र 'आकिजेहि मम' इति देवीवचनपर्यन्तो भागः अस्यां मातृकायां लुप्तः ।

निर्वाणाप्यनिलेन दीपकलिका सद्यः स्वयं दीप्यते
राहोर्वक्त्रमुपेयुषी शशिकला भूयः समुन्मीलति ।
सम्प्लुष्टापि समुद्भिनात्ति सहसा दावाग्निना मालती
सर्पेणाहृतजीवितापि सुदती सञ्जीविताभ्येत्यसौ ॥ ७२ ॥

राजा — आश्चर्यमाश्चर्यम् ।

शिवदासः—(क) जेदु महाराओ । (भिक्षुं तिर्यक् पश्यन्) जेदु—

(इत्यर्धोक्ते गद्गदरुद्धाक्षरं विरमति ।)

भिक्षुः — (सप्रमोदं स्वगतम्)

भावावेशस्निग्धतारा मृगाक्ष्या
लज्जायोगात् किञ्चिदाकुञ्चिताश्च ।
चञ्चच्चिल्लीवल्लरीशोभनीया
मय्येवास्याः संवलन्ते कटाक्षाः ॥ ७३ ॥

राजा — भद्रे ! दुष्टसर्पदंष्ट्राकरालाकृष्टासि तत्रभवता शिवदासेनास्य भगवतो मम च प्राणैः सार्धमित्यति हि नाम प्रमोदामहे ।

शिवदासः — (ख) तुह्माणं पसादो एत्थ काळणम् ।

देवी — (ग) सहि अणङ्गलेहे ! एहि आलिङ्गेहि मम् ।

(शिवदास उपेत्य देवीमालिङ्गति ।)

चन्द्रलेखा — (घ) सहि ! मं वि सम्भावेहि ।

शिवदासः — (स्वगतम्) इदं पुनर्मह्यमपि रोचते । (इति चन्द्रलेखामालिङ्गन् स्वगतम्)

(क) जयतु महाराजः । जयतु — ।
(ख) युष्माकं प्रसादोऽत्र कारणम् ।
(ग) सखि अनङ्गलेखे ! एहि आलिङ्ग माम् ।
(घ) सखि ! मामपि सम्भावय ।

---

१. 'मालिङ्गति' क.

यद्यपि प्रियतमापरिरम्भो
गात्र एव विकृतिं विदधाति
अन्यगात्रमपि निर्विशतो मे
निर्वृतिर्भवति कापि तथापि ॥ ७४ ॥

(प्रकाशम्) (क) दिट्ठिआ एत्थ एव्व जम्मे तुह्मेहि आलिङ्गिदह्मि त्ति अहो असम्भाविदं एदम् ।

राजा — भद्रे ! क्वेदानीं शिवदासः ?

शिवदासः — (ख) को शिवदासो णाम ?

राजा — (विहस्य) अयि धूर्ते ! किं न जानासि, येन विषधरमुखात् परित्रातासि ।

शिवदासः — (ग) (स्मृति[1]नाटितकेन) । आः सुमरामि । अण्णगअहिअएण (इत्यर्धोक्ते सशङ्कम्) अण्णगअहिअआए मए विसुमरिदं[2]म् ।

राजा — अहो ! महती तव चित्तभ्रान्तिः यतो लिङ्गव्यत्यासमप्यापादयति । अथ किं नामान्यगतहृदयत्वम् ?

शिवदासः — (भिक्षुं वि[3]लोक्य) (घ) अणुइदं असम्भावणीअं च कहं विण्णवेमि ?

[4]राजा — भद्रे ! नेदमनुचितं नाप्यसम्भावनीयम् । कुतः —

(क) दिष्ट्या अत्रैव जन्मनि युष्माभिरालिङ्गितास्मीत्यहो असम्भावितमेतत् ।

(ख) कः शिवदासो नाम ।

(ग) आ स्मरामि । अन्यगतहृदयेन अन्यगतहृदयया मया विस्मृतम् ।

(घ) अनुचितमसम्भावनीयं च कथं विज्ञापयामि ?

१. 'नाटितेन' क.
२. 'अमू' ख.
३. 'पश्यति' ख.
४. 'राजा — नेद' क.

यूनि स्त्रीणां स्त्रीषु यूनश्च रागो
वीतोपाधिर्दृश्यते जीवलोके ।
भावाश्चामी केन वा लङ्घनीया-
श्चित्तोन्माथं सर्वदा कुर्वते ये ॥ ७५ ॥

तदावेद्यतामस्वस्थताहेतुः ।

शिवदासः — (स्वगतम्) किमत्र निह्नवेन । (प्रकाशम्) (क) जदा खु एदेण भअवदा अणिच्छन्ती एव्व अहं उपऊढा मन्दभाआए उण मए विमुहदा, एव्व ओलम्बिआ तदप्पहुदि गहिदपच्छादावा विजिम्भिअमअणा आअल्लअं विरहस्से असहमाणा अम्मकाविरुद्धं पि अहिसरणलाहवं अगणिअ आअदह्मि ।

भिक्षुः — (सहर्षं स्वगतम्)

कर्णौ चिरेण शृणुतं वचनामृतानि
पूर्णेन्दुबिम्बवदनस्य वधूजनस्य ।
आ जन्मनः श्रितवतोरपि योगिनं मां
जातैव धन्यजनुषोश्चरितार्थता वाम् ॥ ७६ ॥

राजा — (भिक्षुं प्रति) भगवन् ! अपि श्रुतम् ?

भिक्षुः — किमुच्यतेऽत्र श्रुतमिति । मम हि —

गात्रे वेपथुमातनोति पुलकश्रेणीं विधत्ते मुहु-
र्घर्माम्भःकणिकाभिराभिरतुलं बध्नाति मुक्तासरम् ।

(क) यदा खलु एतेन भगवता अनिच्छन्त्येवाहमुपगूढा मन्दभागया पुनर्मया विमुखतैवावलम्बिता तदा प्रभृति गृहीतपश्चात्तापा विजृम्भितमदना आयल्लकं विरहस्यासहमाना अस्मादृग्विरुद्धमप्यभिसरणलाघवमगणयित्वा आगतास्मि ।

---

१. 'दं' ख.
२. 'सर्वथा' ख.
३. 'ये । शिवदासः' ख.
४. 'चिरतं' ख.

कण्ठे गद्गदिकां[1] तनोति वचनव्यापारसंरोधिनी-
मस्याः स्नेहरसप्रसङ्गमधुरा वाणीयमेणीदृशः ॥ ७७ ॥

देवी — (जनान्तिकम्) (क) सहि चन्दलेहे ! का णाम एसा जाए इत्थिआअणविरुद्धो आआरो ।

चन्द्रलेखा — (जनान्तिकम्) (ख) सहि एव्वं एदम् ।

अम्मकाण महिलाण किमण्णं
मण्णिमो पदमिदो लहुदाए ।
पेम्मभारविहलाण वि चित्तं
जं पआसइ पुरो पुरिसाणम् ॥ ७७ ॥

शिवदासः — (भिक्षुं प्रति)

पणअपेराहीणाअं मइ भअवं किं तुवमुदासीणो ।
कुणसि ण कण्ठावेढं मुणालमुदुलेहि बाहूहिम् ॥ ७८ ॥

(उभे लज्जया मुखमवनमय्यान्योन्यमवलोकयतः ।)

राजा — (स्वगतम्) अहो ! अत्रातिक्रामति प्रसङ्गः ।

भिक्षुः — (स्वगतम्)

परीरम्भे कुम्भप्रतिभटकुचायाः कुतुकिनं
निरुन्धे मामग्रे मिषादिदमहो भूपतिसभम् ।
स्मरातप्तं चेतो न च मम विलम्बं विषहते
न विद्मः कर्तव्यं किमिति वयमस्मिन् व्यतिकरे ॥

(क) सखि चन्द्रलेखे ! का नामैषा यस्याः स्त्रीजनविरुद्ध आचारः ।
(ख) सखि ! एवमेतत् ।
अस्मादृशीनां महिलानां किमन्यन्मन्यामहे पदमितो लघुतायाः ।
प्रेमभारविह्वलानामपि चित्तं यत् प्रकाशयति पुरः पुरुषाणाम् ॥
(ग) प्रणयपराधीनायां मयि भगवन् ! किं त्वमुदासीनः ।
करोषि न कण्ठावेष्टं मृणालमृदुलाभ्यां बाहुभ्याम् ॥

1. 'ततां' ख.

शिवदासः — (भिक्षुं निर्वर्ण्य स्वगतम्)

यथा यथा मे निर्बन्धो जृम्भते परिरम्भणे ।
तथा तथास्य हृदः शैथिल्यमवलम्बते ॥ ८१ ॥

तदेवं तावत् । (प्रकाशम्)

(क) बिम्बाहरं सरसपल्लवसोउमालं
दन्तक्खदेहि सुहआण सणाहमूलम् ।
सज्जट्ठिअं वि मह णिज्जिअजीवलोअं
मा मुञ्चिऊण विहलं कुण जम्मलाहम् ॥ ८२ ॥

उभे — (कर्णौ पिधाय) सन्तं सन्तं पापम् ।

भिक्षुः — (स्वगतं सनिर्वेदं) कथमेवंविधोऽयं प्रकारो युवतीनाम् ।

यथा शीतालूनां जनयति रुजं पावकशिखा
वियोगे योगे तु प्रबलपरितापं वितनुते ।
तथैवैषा योषित्प्रकृतिरपि कामाविलधिया-
मतो बीभत्सन्ते जगति युवतिभ्यः सुमतयः ॥ ८३ ॥

(इति व्याकुलस्तिष्ठति ।)

शिबदासः — (ग) भगवं ! किं अरण्णरुदिअं मह वअणम् ?

पेक्ख भिक्खुअ ! पढिल्लवत्थं
कुङ्कुमच्छुरणवड्ढिअसोहम् ।
मोहणं णवरकामिअणाणं
सज्जिअं तुह किए कुअजुग्गम् ॥ ८४ ॥

(क) बिम्बाधरं सरसपल्लवसौकुमार्यं दन्तक्षतैः सुभगानां सनाथमूलम् । सज्जस्थितमपि मम निर्जितजीवलोकं मा मुक्त्वा विफलं कुरु जन्मलाभम् ॥

(ख) शान्तं शान्तं पापम् ।

(ग) भगवन् ! किमरण्यरुदितं मम वचनम् ?
प्रेक्षस्व भिक्षुक ! प्रशिथिलवस्त्रं कुङ्कुमच्छुरणवर्धितशोभम् ।
मोहनं केवल[illegible] सज्जितं तव कृते कुचयुगम् ॥

देवी — (जनान्तिकम्) (क) सहि चन्दलेहे ! अदो वरं पि किं सुणीअदि त्ति ण जाणामि ।

चन्द्रलेखा — (विहस्य जनान्तिकम्) (ख) सहि ! किं पेक्खीअदि त्ति भणाहि ।

राजा — (सरोषम्) आः कुलटे ! अपेहि तावत् ।

स्थैर्ये सत्यपि बिभ्यति क्षितिधरा जम्भारिदम्भोलितो
गाम्भीर्येऽपि सुधांशुदर्शनविधावम्भोनिधिर्जृम्भते ।
क्षत्रस्य प्रभवन्ति तत्सदृशुवो वेशाङ्गनाविभ्रमा
मोहायेति ममापि नाम पुरतो धृष्टं किमाचेष्टसे ॥ ८५ ॥

शिवदासः — (स्वगतम्) कथं कुपितमनेन मदनकेतुना । तदेवं तावत् । (प्रकाशम्, राजानं प्रति सस्मितम्) (ग) महाराअ ! अलमिदानीं संरम्भेण ।

गण्डाहिण्डिअकुण्डळं रसवसामीळन्तणेत्तुप्पळं
सन्दट्ठाहरवल्लवं गळवळन्ताडिल्लधम्मिल्लअम् ।
जाहिन्तो हि लहन्ति हन्त ! सुहअं सम्भोअवीराइअं
तासु के परुसं भणन्ति पुरिसा रामासु वामासु वि ॥८६॥

(क) सखि चन्द्रलेखे ! अतः परमपि किं श्रूयते इति न जानामि ।

(ख) सखि ! किं प्रेक्ष्यत इति भण ।

(ग) महाराज ! अलमिदानीं संरम्भेण ।

गण्डाहिण्डितकुण्डलं रसवशान्मीलन्नेत्रोत्पलं
सन्दष्टाधरपल्लवं गलवलदाशिथिलधम्मिल्लकम् ।
याभ्यो हि लभन्ते हन्त ! सुभगं सम्भोगवीरायितं
तासु के परुषं भणन्ति पुरुषा रामासु वामास्वपि ॥

---

१. 'सस्मितं' ख.
२. 'र्ये च' क.
३. 'भवत्वेवं' ख.
४. 'प्रति—भणा' ख.

देवी — (जनान्तिकम्) (क) चन्दलेहे ! एदं पुण जुज्जइ से वअणम् । किन्दु अजोग्गो इत्थिआणं मुहादो एदस्स णिग्गमो ।

चन्द्रलेखा — (ख) एव्वम् एदम् ।

कन्दोट्टकोमलदलाअदलोअण त्ति
दोग्घट्टकुम्भघणपीणपओहर त्ति ।
पुण्णेन्दुसुन्दरमुहि त्ति अ वण्णअन्ति
पेम्माउरा हि पुरिसाः परमम्मकाओ ॥ ८७ ॥

शिवदासः — (भिक्षुं प्रति) (ग) भअवं ! अलं सन्देहेण ।

जेणूसुएण रहुणाहसिलीमुहादो
कण्ठछिदा वि सहिआ दहअन्धरेण ।
तण्णाम वामणअणापरिरम्भसोक्खं
हत्थट्ठिअं पि अ विमुञ्चिअ वञ्चिदोऽसि ॥ ८८ ॥

(इति भिक्षुं हस्ते गृह्णाति ।)

भिक्षुः — (सविलक्षं हस्तमाक्षिपन् स्वगतम्)

(क) चन्द्रलेखे ! एतत् पुनर्युज्यतेऽस्या वचनम् । किन्तु अयोग्यः स्त्रीणां मुखादेतस्य निर्गमः ।

(ख) एवमेतत् ।

इन्दीवरकोमलदलायतलोचनेति
गजकुम्भघनपीनपयोधरेति ।
पूर्णेन्दुसुन्दरमुखीति च वर्णयन्ति
प्रेमातुरा हि पुरुषाः परमस्मादृशः ॥

(ग) भगवन् ! अलं सन्देहेन ।

येनोत्सुकेन रघुनाथशिलीमुखात्
कण्ठच्छिदापि सोढा दशकन्धरेण ।
तन्नाम वामनयनापरिरम्भसौख्यं
हस्तस्थितमपि च विमुच्य वञ्चितोऽसि ॥

अहो ! धृष्टतरमुपक्रान्तमनया ।

संसारभागकलितानि यथेप्सितानि
अन्ये तथा न सुखयन्ति वशंवदानि ।
अस्याश्चिराभिलषितोऽपि शरीरसङ्गो
यन्मेऽधुना मनसि न प्रमदं तनोति ॥ ८९ ॥

(इति परावर्तते ।)

शिवदासः — (उपसृत्य)

(क) दरसिढिलदुऊलं मेहळासिञ्जिदेहिं
मअणणिअमसाहं बाढमुग्घोसअन्तम् ।
मह जहणमणग्घं पेक्खमाणो समक्खं
ण हु विसहइ कामी को वि कालप्पडिक्खम् ॥ ९० ॥

(उभे सहसोत्तिष्ठतः ।)

देवी — (सरोषं सभ्रूभङ्गं) (ख) साहु महाराअ ! साहु । एदाए बन्धईए चावलवअणाइ लालअन्तो चिट्ठदु महाराओ । सहि चन्दलेहे ! इदो दाव । (इति प्रस्थिता ।)

राजा — (सक्रोधमुत्थाय) देवि ! मुहूर्तं तिष्ठ । (शिवदासं प्रति) आः पापे !

भूताविष्टेव कष्टं प्रलपसि पुरतो मादृशां नष्टलज्जा
कासि त्वं बन्धकीनामपि च कुचरितैर्मार्गमुल्लङ्घयन्ती ।

(क) दरशिथिलदुकूलं मेखलाशिञ्जितै-
र्मदननिगमशाखां बाढमुद्घोषयन्तम् ।
मम जघनमनर्घं प्रेक्षमाणः समक्षं
न खलु विषहते कामी कोऽपि कालप्रतीक्षाम् ॥

(ख) साधु , महाराज ! साधु । एतस्या बन्धक्याश्चापलवचनानि लालयंस्तिष्ठतु महाराजः । सखि चन्द्रलेखे ! इतस्तावत् ॥

---

१. 'चाडिलवरिल्लं ' ख.

कामं सीमन्तिनी त्वं मम तु न सहते चापलं तावकीनं
कृत्तप्रत्यर्थिकण्ठच्युतरुधिरसुरावीरपाणः कृपाणः ॥ ११ ॥

शिवदासः — (सस्मितम्)

(क) जहिं खु णिवडन्ति मे घणसिणेहगाढाअरं
मुणालवलओवमा उववदीण बाहालआ ।
तहिं किल गलन्तरे परुसरोसपोसाविलं
किवाणळदिआ वि दे वडउ णाम का मे गई ॥ १२ ॥

भिक्षुः — (स्वगतम्) कष्टमतिचपलायास्तावदस्याः कृते शिवदासहितोपदेशं अवधीरितवानहं यदित्थमभिहितोऽस्मि तत्रभवता ('क्वासौ संसारसिन्धोः' इत्यादि पठति ।)

राजा — भगवन् विष्णुमित्र !

अमी वयं तावदनिन्द्यवृत्तयो
न बन्धकीधार्ष्ट्यमिदं सहामहे ।
उपक्रमं किन्तु रुणद्धि केवलं
भवन्मतस्याप्यनुवृत्तिरत्र नः ॥ १३ ॥

भिक्षुः— राजन् सिंहलपते ! अलमस्मद्गतया शङ्कया । यथाभिमतमाचेष्टस्व । वयं तु —

एतस्या न तु केवलं तनुभृतां मुक्तिप्रतिद्वन्द्विनो
येऽस्मिन् जाग्रति सन्निधानपरुषा भावा भवाम्भोनिधौ ।

(क) यस्मिन् खलु निपतन्ति मे घनस्नेहगाढादरं
मृणालवलयोपमा उपपतीनां बाहालताः ।
तस्मिन् किल गलान्तरे परुषरोषपोषाविलं
कृपाणलतिकापि ते पततु नाम का मे गतिः ॥

१. 'केवलं चापलं ते' ख.
२. 'राजन्नलम' ख.
३. 'ननु' ख.
४. 'तासुक्ति' ग.

तेभ्यो विप्रतिबुद्धबुद्धिविलसत्तत्त्वा जुगुप्सामहे
किञ्चामी शिवदासशासनगिरश्चित्ते दृढीकुर्महे ॥ ९४ ॥

कीदृश्यस्ता इति चेच्छृणु । (क्वासावित्यादि पठति ।)

शिवदासः — (सहर्षं स्वगतम्) हन्त ! फलितमेव मे प्रयत्नेन मदनकेतोर्मनोरथेन च ।

राजा —भगवन् ! अपि स्थिरो निश्चयः ?

भिक्षुः — स्थिरतरः ।

शिवदासः — (सस्मितम्) (क) भअवं ! एत्थ जीवलोए कस्स सत्ती एव्वं भणिदुम् । जदो (संस्कृतमाश्रित्य)

उन्मीलद्दशनांशुजालविपुलालम्बस्स बिम्बाधर-
स्तच्चेन्दीवरगर्भपत्रसुभगं नेत्राञ्चलं चञ्चलम् ।
सा वा गद्गदसङ्गभङ्गुरपदा वाणी मनोहारिणी-
त्येकैकं युवधैर्यलोपि सुदृशामद्यापि विद्योतते ॥ ९५ ॥

अपि च—

अजिह्मगमुखोद्गलद्गरलबिन्दुमन्दूषितं
तदेतदपयःपयोनिलयफेनसंम्मिश्रितम् ।
अमन्दरपरिस्फुरद्विविधधातुधूम्रीकृतं
मनोज्ञमधरामृतं विजयते कुरङ्गीदृशाम् ॥ ९६ ॥

किञ्च —

एकस्याङ्के निहितवपुरप्यन्यमालोकयन्ती
चिल्लीवल्लीचलनकलया चापरं प्रीणयन्ती ।

(क) भगवन् ! अत्र जीवलोके कस्य शक्तिरेवं भणितुम् । यतः

---

१. 'कुर्महे । शिव' क.
२. 'वर्मणो म' ख.
३. 'कलिताल' ख.
४. 'मुखोल्ललद्ग', क.
५. 'मिश्रीकृतं', क.
६. 'धूम्रीभवन्म' क.
७. 'तनुर', ख.

नम्रालापैरमृतमधुरैरन्यमाह्लादयन्ती
नारीनाम्ना जयति हि जगन्मोहिनी कापि शक्तिः ॥

अथ च —

भिक्षुः — (सक्रोधम्) आः अलमलमसत्प्रलापेन चलहृदयानां मनःप्रक्षोभदक्षेण । तेषु का गणना विष्णुमित्रस्य । यस्य हि —

वाराङ्गनाजनविलासपलालजाल-
विप्लोषकर्मणि कृशानुशिखायते या ।
सा योगवृत्तिरतिवृत्तरजस्तमस्का
निर्वाणवर्त्मघटनाय ममानुकूला ॥ ९८ ॥

शिवदासः — (भिक्षुं निर्वर्ण्य स्वगतम्) दिष्ट्या प्रशान्तः खल्वस्याभिषङ्गकलङ्कः । दिष्ट्या पुष्टश्च जनपदो मदनकेतोः । कुतः —

यस्य राज्ये प्रमाद्यन्ति विद्वांसोऽपि कदाचन ।
तस्य राज्ञो जनपदो विनश्यति पदे पदे ॥ ९९ ॥

तदेतत् प्रकरणमुपसंहरामि । (प्रकाशम्) (क) भअवं विह्णुमित्त ! किं परिच्चत्तम्हि तुह्मेहिम् ?

भिक्षुः — न केवलमस्माभिरेव, त्वच्चापलपरिकोपितेन विधिनापि ।

शिवदासः — (ख) तदो किम् ?

भिक्षुः —

आतन्वन्तु ललाटिकां मृगमदैः कालाञ्जनेनाक्षिणी
संस्कुर्वन्तु कपोलयोर्विदधतां चित्राणि पत्राणि च ।

(क) भगवन् विष्णुमित्र ! किं परित्यक्तास्मि युष्माभिः ?
(ख) ततः किम् ?

---

१. 'भिक्षुः—आः' क.
२. 'विधिनापि । कुतः—आतन्वन्तु' ख.

आलिम्पन्तु च कुङ्कुमेन कुचयोर्द्वन्द्वं कुरङ्गीदृशः
कामं दैवहतासु तासु न रतिं पुष्णाति यूनां मनः॥ १००॥

शिवदासः — (क) होदु एव्वम् । अह्माणं पुण परमं दव्वं भअवं कुसुमाउहो । सो उण अह्मे ण मोच्छिहिइ । एव्वं च—

विरलचिउरभारा होदु सुण्णेक्ककण्णा
विसमकुअजुआ वा किञ्च तुङ्गोअरी वा ।
णवरकुसुमवाणो होइ जिस्सा सहावो
जअइ भुवणचक्कं सा खु एक्का मिअच्छी ॥ १०१ ॥

अहव अलं दुव्विवादेण । अपि मए गन्तव्वम् ?

भिक्षुः — गच्छ, गच्छ यथेच्छं गच्छ ।

(नेपथ्ये)

हा हा हतोऽस्मि ।

अखिलभुवनबन्धोर्योगविद्याविनोद-
प्रकटितजगदण्डव्याप्तेस्साम्प्रतं ते ।
कथमगणितपूर्वस्सर्वलोकाधिदायी
समजनि परिणामः कष्टमेवंविधोऽयम् ॥ १०२ ॥

(क) भवत्वेवम् । अस्माकं पुनः परमं दैवं भगवान् कुसुमायुधः । स पुनरस्मान् न मोक्ष्यति । एवञ्च—

विरलचिकुरभारा भवतु शून्यैककर्णा
विषमकुचयुगा वा किञ्च तुङ्गोदरी वा ।
केवलकुसुमबाणो भवति यस्याः सहायो
जयति भुवनचक्रं सा खल्वेका मृगाक्षी ॥

अथवा अलं दुर्विवादेन । अपि मया गन्तव्यम् ?

---

१. 'अक्कं' ख.

(सर्वे विषादं रूपयन्ति ।)

शिवदासः — (स्वगतम्) अये जम्भकस्यायं स्वरः । लताकुञ्ज-गूढनिक्षिप्तमपि मम कलेबरमनेनावलोकितं भविष्यति । (विचिन्त्य) इदमपि शोभनं जातं यतोऽमीषां मयि विश्रम्भस्य प्रकारो विज्ञास्यते ।

(ततः प्रविशति शिवदासकलेबरमुद्वहन् जम्भकः । हा हतोऽस्मि अखिलेत्यादि पूर्वोक्तमेव पठन् । राज्ञः पुरतो निपतति ।)

राजा — (दृष्ट्वा सकरुणम्) हा सखे शिवदास ! । (इति मोह-मुपगतः ।)

भिक्षुः — हा महोपकारिन् ! हा मम सन्मार्गोपदेशदेशिक ! हा निखिलयोगविद्यानिधे ! हा निष्कारणवत्सल ! क्वासि । देहि मे प्रतिवचनम् ।

देवी — (सास्रम्) (क) महाराअ ! समस्ससिहि समस्ससिहि ।

चन्द्रलेखा — (सबाष्पम्) (ख) हा एव्वं मं मनोरहाणं वि अगोअरं पदं आरोविअ परलोअं गदोऽसि ।

राजा — (समाश्वस्य)

स्वार्थं सन्त्यजतः परार्थघटनव्यापारनिष्ठस्य ते
कष्टं निष्ठुरमीदृशं कृतवता दैवेन किं दुष्करम् ।
कल्याणिन् शिवदास ! वासवपुरे त्वाद‍ृशैरद्भुतै-
र्देवानामपि सम्मदं प्रबलयन् किञ्चित् प्रतीक्षस्व नः ॥

(क) महाराज ! समाश्वसिहि, समाश्वसिहि ।

(ख) हा ! एवं मां मनोरथानामप्यगोचरं पदमारोप्य परलोकं गतोऽसि ।

---

१. 'हा हतोऽस्मीत्यादिपूर्वोक्तमेव पठति, राज्ञः पुरः पतति च' ख.

२. 'हा शिव' ख.

३. 'सर्वे' क.

(इति पुनर्मूर्च्छति)

भिक्षुः — सिंहलपते! समाश्वसिहि समाश्वसिहि।

शिवदासः —(स्वगतं सस्नेहासम्) अहो! मयि महानमीषां पक्षपातः। तदनुचितः कालक्षेपः। (प्रकाशम्) (क) देवि सिङ्गारमञ्जरि! अदिविसमो एत्थ दसापरिणामो। ता अदो वरं अभूमी अह्माणम्। (भिक्षु प्रति) भअवं! किं तुवं पि सिवदासं अणुसोचसि। तुह णेण किं उपकिदम्?

भिक्षुः — आः कठिनहृदये! किं प्रलपसि?

येन मे चपलकर्मकर्मठं
मानसं समनुकृष्य कापथात्।
अस्तचन्द्रमपुनर्निवर्तने
वर्त्मनि द्रढयता नु किं कृतम्॥ १०४॥

शिवदासः—(ख) एव्वं होदु (इति निष्क्रान्तः।)

राजा—(समाश्वस्य) भगवन् विष्णुमित्र! अलमलं विलम्बेन।

यत्प्रसादविभवाद् गरीयसो
दुर्लभानधिगता मनोरथान्।

(क) देवि शृङ्गारमञ्जरि! अतिविषमोऽत्र दशापरिणामः। तदतः परमभूमिरस्माकम्। भगवन्! किं त्वमपि शिवदासमनुशोचसि। तवानेन किमुपकृतम्?

(ख) एवं भवतु।

१. 'सस्नेहार्द्रं' ख.
२. 'ननयोः क.
३. 'सोचसि। भिक्षुः' — ख.
४. 'धिक् कठिनहृदये— येन' ख.
५. 'नु' ख.
६. 'निष्क्रान्तः' क.

तद्विनाशमनुभूय वर्तितुं
न क्षियो न च कृतद्रुहो वयम् ॥ १०५ ॥

भिक्षुः—सिंहलपते! कथं नाम दीनानुकम्पी तत्रभवानुपेक्ष्यते। येन हि 'क्वासौ संसारसिन्धोः' इत्यादिनैव संसारगर्तादुत्तारितोऽस्मि।

राजा—तदेवंभूतस्याप्यस्य परिष्वङ्गमहोत्सवमनुभूय पश्चादेनमनुसरामि। (इति शिवदासशरीरमालिङ्गति।)

(ततः प्रविशति स्वशरीरमाविशञ्छिवदासः, उत्तिष्ठति।)

(सर्वे सविस्मयं पश्यन्ति।)

राजा—(सहर्षम्) सखे शिवदास!

माया किंनु किमिन्द्रजालमथवा निद्रामि जागर्मि वा
यद्वासौ रजनी किमेष दिवसः केऽमी समीपे मम।
आनन्दामृतवारिराशिलहरीसञ्चारपारिप्लवं
चेतः श्रेयसि सम्मुखेऽपि नहि मे विश्वासमद्याश्नुते ॥१०६॥

भिक्षुः—यत्सत्यमसम्भाव्यत्वादीदृशस्य श्रेयसो वयमपि न विश्वसिमः।

शिवदासः—सर्वे विगतसम्भ्रममुपविशन्तु। पश्चात्सर्वमावेद्यते। (सर्वे तथा कुर्वन्ति।)

(नैपथ्ये)

(क) हाँ मुसिदह्मि।

(क) हा! मुषितास्मि।

---

१. 'दिना खलु सं' ख.
२. 'सागरादु' ख.
३. 'दनु' क.
४. 'किंन्वियमि' ख.
५. 'मावेदयिष्यामि' ख.
६. 'तथेत्युपविशन्ति' ख.
७. 'हा हा' ख.

राजा—(आकर्ण्य) जम्भक! ज्ञायतां किमेतदिति।

जम्भकः—(निष्क्रम्य प्रविश्य)

अनङ्गलेखां व्यसुमुद्वहन्ती
मुहुः पतन्ती मुहुरालपन्ती ।
मुष्ट्या निजोरः परिघट्टयन्ती
सा कुट्टिनी सत्वरमभ्युपैति ॥ १०७ ॥

भिक्षुः—(स्वगतम्) मत्परिभवफलं स्वयमनुभवतु पापाशया । अथवा शान्तम् । अपत्यविपत्तिसम्भवश्शोको दुर्निवारस्संसारिभिः ।

(प्रविश्य यथानिर्दिष्टा कुट्टिनी भिक्षोः पुरतः पतन्ती ।)

कुट्टिनी—(क) हदास! संपुण्णा दे मणोरहा ।
पत्थिज्जमाणा वि णिअंबिणीओ
ण होन्ति जाणं अणुऊलभावा ।
ते णाम दोब्भग्गहआ जुवाणो
ण णिट्ठुरं कम्म कुणन्ति एव्वम् ॥ १०८ ॥

भिक्षुः—कथमयमस्मासु पातितोऽशनिर्दैवेन ।

कुट्टिनी—(सास्रं राजानं प्रति) (ख) महाराअ! परित्ताआहि परित्ताआहि मे वराइं दुहिअं जा खु महाराअसआसादो पडिणिअत्तन्ती एव्व एरिसं दसं सम्पत्ता ।

(क) हताश! संपूर्णास्ते मनोरथाः ।
प्रार्थ्यमाना अपि नितम्बिन्यो
न भवन्ति येषामनुकूलभावाः ।
ते नाम दौर्भाग्यहता युवानो
न निष्ठुरं कर्म कुर्वन्त्येवम् ॥

(ख) महाराज! परित्रायस्व परित्रायस्व मे वराकीं दुहितरं या खलु महाराजसकाशात् प्रतिनिवर्तमानैव ईदृशीं दशां संप्राप्ता ।

---

१. 'हताशा' ख.

२. 'कथमस्मासु' ख.

३. 'साक्रन्दम्' ख.

राजा—सखे शिवदास! पूर्वं किल भवता भुजङ्गमुखादियं[1] परित्राता। अथेदानीमस्याः कोऽयं विपत्तिहेतुः?[2]।

शिवदासः—विधिविलसितानि को नाम परिच्छिनत्ति।

देवी—(क) अय्य शिवदास! विज्जाबलेण पुणो वि णं[3] जीवावेहि।

शिवदासः—(स्वगतम्) तद्यावत्तिर्यक्प्रणिहितेनै जीवितेनैतां[4] प्रत्युज्जीवयामि। (इति ध्यानं नाटयति।)

(अनङ्गलेखा अक्षिणी उन्मील्योत्तिष्ठति।)

कुट्टिनी—(सहर्षम्) (ख) एहि वच्छे! आलिङ्गेहि[5] मम्।

अनङ्गलेखा—(ग) अम्ब! चिरं पसुत्तह्मि। (राजानं दृष्ट्वा) कहं महाराओ। जेदु महाराओ।

राजा—भद्रे! कल्याणिनी भूयाः।

अनङ्गलेखा—(देवीमुपेत्य) (घ) अवि सुहम्?

देवी—(ङ) दाणीम् सुहम्। पुव्वं उण इत्थिआअणविरुद्धं बहुप्पलवन्तीए तुए[6] चिरं कदत्थिदह्मि।

(क) आर्य शिवदास! विद्याबलेन पुनरप्येनां जीवय।

(ख) एहि वत्से! आलिङ्ग माम्।

(ग) अम्ब! चिरं प्रसुप्तास्मि। कथं महाराजः! जयतु महाराजः।

(घ) अपि सुखम्?

(ङ) इदानीं सुखम्। पूर्वं पुनः स्त्रीजनविरुद्धं बहुप्रलपन्त्या त्वया चिरं कदर्थितास्मि।

---

१. 'विषधरविषादियं' ख.
२. 'को विपत्ति' ख.
३. 'एदं' ख.
४. 'तेनैतज्जीवितेनैनां' ख.
५. 'हि—अन' क.
६. 'तुए कदत्थिह्मि' ख.

अनङ्गलेखा—(सभयम्) (क) अह काए तह पलविअम्?

देवी—(ख) णं तुए ।

अनङ्गलेखा—(ग) कहं देवी एव्वं असङ्गअं भणादि ?

राजा—अयि धूर्ते! किमसङ्गतं नाम ।

परिषदि भगवन्तं विष्णुमित्रं प्रतीमं
वचनमचकथस्त्वं तादृशं वीतलज्जा ।
युवतिषु पुरुषाणां यादृशेनापतेः-
जगति[1] ननु मनांसि द्वेषवैराग्यवन्ति[2] ॥ १०९ ॥

अनङ्गलेखा (सविषादम्) (घ) पुव्वं अत्थाणमण्डवे[3] अय्यसिवदासं दट्ठूण पडिणिवुत्तमत्ताए[4] मए पसुत्तं दाणिं पुण पबुद्धं[5] ति एत्तियं जाणामि ।

भिक्षुः—राजन्! अलं निर्बन्धेन । अलीकभाषणपरायणैः[6] किं दुर्वचनं नाम ।

शिवदासः अलं विकल्पितेन । श्रूयतां सपरिजनेन महाराजेन ।

राजा अवहितोऽस्मि ।

(क) अथ कया तथा प्रलपितम्?

(ख) ननु त्वया ।

(ग) कथं देवी एवमसङ्गतं भणति ?

(घ) पूर्वमास्थानमण्डपे आर्यशिवदासं दृष्ट्वा प्रतिनिवृत्तमात्रया मया प्रसुप्तमिदानीं पुनः प्रबुद्धमित्येतावज्जानामि ।

---

१. 'ननु जगति' ख.

२. 'पोषाविलानि ख.

३. 'मण्डवे सिव' क,

४. 'णिवत्तमाणाए' ख.

५. 'पबुद्धं—भिक्षुः' क.

६. 'निरतैः' ख.

शिवदासः —

भूमौ यत् किल सञ्चिनोति दुरितं धर्म्यात् पथः प्रच्युतो
लोकस्तत् खलु भूपतौ परिणमत्यम्भो यथाम्भोनिधौ ।
इत्यालोच्य हिताय ते यतिममुं दुर्मार्गपातोन्मुखं
तत्त्वं बोधयितुं भवाब्धिजलधेरेष प्रयत्नो मम ॥ ११० ॥

स कीदृशश्चेदेवमिव ।

(सर्वे सहर्षविस्मयबहुमानं शिवदासं पश्यन्ति ।)

भिक्षुः—(स्वगतम्) निष्प्रतिक्रियोऽयं प्रयत्नप्रपञ्चस्तत्रभवतः शिवदासस्य । अथवा —

निर्व्याजनिर्मलधियां विधुरेषु मन्ये
वीताभिसन्धिरणिकः करुणानुषङ्गः ।
किं चातका विदधते हितमम्बुदेभ्यः
सन्तर्पयन्ति किममून् हि ते पयोभिः ॥ १११ ॥

(उत्थाय सप्रश्रयम्) आचार्य! अयं विष्णुमित्रोऽभिवादयते ।

(इति शिवदासस्य पादयोः पतति) ।

शिवदासः — शान्तं शान्तं पापम् । अलमनुचितावरणेन ।

(इति तमुत्थापयति ।)

राजा — दिष्ट्या भवत्प्रसादेन महतः संसारगर्तादुत्तारितोऽयं भगवान् विष्णुमित्रः ।

शिवदासः — अयं हि युवराजस्य मदनवर्मणः प्रसादः ।

राजा — (सोल्लासम्) कथमिव ।

शिवदासः — एवमिव ।

---

१. 'मम । कीदृश' क.
२. 'प्रपञ्चशिव' ख.
३. 'लोके' ख.
४. 'किममूर्नयते पयोभ्यः' ख.
५. 'शान्तम् । अल' क.
६. 'प्रसादेन संसार' ख.
७. 'सोल्लासं अथ कथ' क.

राजा — (सस्नेहहासम्) साधु[1] साधु कुमार मदनवर्मन्! साधु। साधुदर्शिनी ते बुद्धिः ।

मोहातिरेकेण बहुप्रमादा
वयं त्वया धर्मदशाभिगुप्ताः ।
अतश्चिरं चन्द्रमरीचिशुभ्रैः
प्रसाधयन् जीव जगद्यशोभिः ॥ ११२ ॥

देवी (क) सहि चन्दलेहे! अणवरज्झा खु[2] एसा तवस्सिणी अणङ्गलेहा ।

राजा सखे शिवदास! महत्प्रियमनुष्ठितं भवता तत्पुनरप्येवमेव भवत्सहासिकोत्सवाय[3] स्पृहयामः । कुतः—

आयुर्नाम नृणां दिनानि कतिचित्सौदामिनीचञ्चलं
नामी मान्ति मनोरथास्त्रिभुवने सिद्धेष्वनास्थापराः ।
धन्यस्तावदयं क्षणः सहृदयैः[4] सार्धं प्रसन्नोत्तरैः
संलापामृतपाननिर्वृतधिया लोकेन यो नीयते ॥ ११३ ॥

भिक्षुः — राजन् सिंहलपते! आचार्य शिवदास!

उभौ — आज्ञापयतु भगवान् ।

भिक्षुः — तद्यावदिदानीम्

पुण्यानां पुलिनस्थलानि सरितां जुष्टानि वैखानसैः
कान्ताराण्युपशान्तसत्त्वकलहप्रस्तावरम्याणि च ।
नित्यावर्तितवेदशास्त्रमुखरब्रह्माणि देवालया-
न्यासेवेमहि जीवबन्धनिगलच्छेदाय मोदाय च ॥ ११४ ॥

(क) सखि चन्द्रलेखे! अनपराद्धा खलु एषा तपस्विन्यनङ्गलेखा ।

---

१. 'साधु कुमार साधु कुमार साधुदर्शिनी' ख.

२. 'खु तव' क.

३. 'भवत्सहवासमहोत्सवाय' ख.

४. 'सहृदयैः' इत्यत्र आरभ्य 'अभ्रान्तम्' इत्येतदन्तो ग्रन्थो न दृश्यते 'क' पाठे. पत्रमेकं च गलितम् ।

उभौ — भगवन्! एवमस्तु। सन्तु च शिवास्ते पन्थानः।

शिवदासः — राजन् सिंहलपते! किं ते भूयः प्रियमुपहरामि।

राजा —

देव्या निर्व्याजरम्यैरिथमुपचरणैर्नन्दिता चन्द्रलेखा
संसारावर्तगर्तादयमपि भगवानुद्धृतो विष्णुमित्रः।
ब्रह्मत्राणेन नीतो मम हि जनपदस्साम्प्रतं पुष्टिमिष्टा-
मन्यत् किं धन्यजन्मन्! प्रियमधिकमतः प्रार्थयेऽहं कृतार्थः
॥ ११५ ॥

तथापीदमस्तु

(भरतवाक्यम्)

भूदेवाश्चतुरोऽपि चञ्चलधियामात्तश्रमानाश्रमा-
नश्रान्तं परिपालयन्तु विधिवत्संसारबन्धच्छिदः।
राजानश्च महीमहीनविभवा रक्षन्तु लक्ष्मीपति-
क्रोडाधीशविशालदन्तशिखरक्रीडारसज्ञामिमाम्[1] ॥ ११६ ॥

(इति परिक्रम्य निष्क्रान्ताः सर्वे।)

इति मदनकेतुचरितं नाम प्रहसनं समाप्तम्॥

प्रहसनलक्षणलेशैः स्पृष्टं चेत् प्रहसनाभिधां लभताम्।
नो चेत्पुनरन्यदिदं विनोदनं पाणिवादस्य[1]॥

शुभमस्तु।

श्रीनारायणगुरवश्चरणजुषे रामपाणिवादाय[2]।
प्रदिशन्तु शान्तमतयः प्रतिभां विद्वत्समासेव्याम्॥
गुरुतर[illegible] गुरुचरणावरुणाम्बुजन्मशोणौ।
प्रणमति विनयावनम्रमूर्ध्ना प्रतिदिनमेष हि रामपाणिवादः॥
[illegible] किमपि परं ब्रह्म सकलजनवन्द्यम्।
द्रढयति मनसि नितान्तं शान्तमती रामपाणिवादोऽयम्॥

---

१. 'पाणिघातस्य' ख.

२. 'श्रीनारायण' इत्याद्यास्त्रयः श्लोकाः ख. पाठे न दृश्यन्ते।

उद्यानव्रातमिव वसन्तेन, प्रसवभरमिव सौरभेण, कल्याणधरणीधरमिव गीर्वाणतरङ्गिणीपूरेण, समर्थकविकाव्यमिवार्थान्तरन्यासेन, सरस्तञ्छजमिव नीरजेन, प्रभातसमयमिव प्रभाकरेण, केदारकदम्बमिव धान्येन धन्यममन्यत वंशमात्मनः सोऽयम् ॥

एवं गच्छति काले स गुरुपुङ्गवः सनातनसरस्वतीप्रमुखकलाकलापपरिशीलनजनिताभिलाषः मृगेन्द्र इव गिरिकन्दराक्विर्गम्य निजमन्दिरादानन्दरसतुन्दिलमानसः समाससाद गुरोः सदनम् ॥

तदानीं तु समये समुचिते रचितोपनयनमधिगतविनयं तनयं वेङ्कटरामगुरोर्नयनोपहारमिवावनीसुराणां, सङ्केतितनिलयमिव निखिलकलाविलासिनीनां, विग्रहमिव मनीषिजनमनीषाविशेषाणां, भागधेयमिव शिष्यसन्ततेरुद्वीक्ष्य प्रमोदभरपाथोनिधिमध्यमध्यासीनः अदसीयमहिमसीमान्तनिर्धारणबद्धादरोऽपि अनधिगतमनोरथः तदीयगुणगणबध्यमानमानसः स्वाभ्यस्तचतुस्तन्त्रसिद्धान्तनिर्धारणबद्धान्तःकरणानन्वान्तेवासिजनसंसेव्यमानः सेवमानजनमनोरञ्जकः स गुरुकुञ्जरः समभूदस्मै समुपदिदिक्षुराम्नायसार्थानन्यानपि तन्त्रार्थान् ॥

तदानीमेव देशिकवर्यादस्मादधिगतसर्वार्थं सतीर्थ्यगणसर्वार्थबोधनसमर्थमनितरविचक्षणविक्षोभ्यमङ्कुरयन्तमाक्षेपसार्थं निचयं समाधानानां रचयन्तमत्यर्थं अधरीकृततन्त्रकदम्बसमुज्जृम्भमाणमनीषिजनधिषणाविशेषमेधाविलासभासमानतया कणचरणसमीरणचरणाग्रणीप्रभृतिराद्धान्तप्रवर्तकतापसव्रातसमीभावमधिवहन्तमनिराकरणकरणसञ्चयवारणमदवारणवरवेत्रैः कमनीयकामिनीकामनीयतमगात्रैः, चिरन्तनसूक्तिसीमन्तिनीभाषितवशंवदवक्त्रैः, कामादिमविषवल्लीलवनलवित्रैः, साहित्यपद्मिनीपरितोषणमित्रैः, कणचरणसमीरणचरणाग्रणीप्रभृतिसूक्तिमौक्तिकनिकरप्रोतनसूत्रैः, कलिमोहग्रहपटलसमुच्चाटनमन्त्रैः, वल्कलवरनेत्रैः संसारतरङ्गिणीरमणसन्तरणवरणीययानपात्रैः, चिरतरपरिशीलितसच्छास्त्रैः छात्रैः सततमासेवितमभिवीक्ष्य तमेतमात्मजातं जातामोदः समजायत तातः स हि वेङ्कटरामः सरामः ॥

तदानीं तु —

वेदव्रातविरुद्धसूक्तितरुणीवेणीकृपाणीभव-
द्वाणीदुग्धतरङ्गिणीशरणीभूतान्तरङ्गो गुरुः ।
कारुण्यार्णववीचिकान्तरसदासञ्चारशीतीभव-
त्स्वान्तः स्वां मतिमातनोत्रिपथगायात्रामिषाद्रक्षणे ॥ ८२ ॥

तत्क्षणमेव क्षोणीगीर्वाणगणपरिणायितमचरणारविन्दो देशिकोऽस्माकं मुकुलसार्थसमर्थनसमर्थतमतीर्थसार्थसमवगाहनरचितास्थः प्रस्थाय ततः पयःप्रणालीनगरादभिनत्य देवनायकस्थलं गगनाचलं पङ्कतामरसतरङ्गिलमवगाह्य मुहुर्मुहुः द्वादशोर्ध्वपुण्ड्रप्रोल्लसितफालादिदेशः तारकावलाविव सोमोल्लसिते, भृगुवत्स इव सभृगौ, कैलास इव सविनायके, पङ्कज इव प्रभाकरराजमाने, धर्मपुत्र इव विलसत्क्षमे, जलजाक्ष इव लक्ष्मीभृति, भृत्यात्मज इव मार्कण्डेयमण्डिते, समरोत्सुकमण्डलेन्द्र इव विष्वक्सेनालङ्कृते, उर्वीधरायितदर्वीकरेन्द्रमण्डलसिंहासने विराजमानं, वनमालासमुल्लसितमुर्वशीतिलोत्तमाभ्यामप्सरोभ्यामभिवीज्यमानं व्यजनाभ्यां, निजभक्तजनावनजागरूकं, गजाधिपसंसेवितमप्यगजाधिपसंसेवितं रमालालितमप्यरमालालितं, लोकनायकमप्यलोकनायकं, गगनाचलनायकं यशोदानन्दनमिव सुदर्शनमोचनकलितानन्दमभिवन्द्य, च देवनायकमानन्दितमानसस्तुष्टाव तमिष्टं भगवन्तम् ॥

तदनन्तरं श्रीवत्सान्वयनन्दनवनसन्तानः सन्ततमाश्रितजनसन्तानः नन्दद्बृन्दारकवृन्दरघुनन्दनानन्दनसामन्दानन्दमनिन्दापदवीद्वीयान् धरावृन्दारकदेशिकोऽस्मद्देशिकः प्रस्थाय ततो देवनायकस्थलादार्यावर्तमिव सिन्धुसंराजमानमभिययौ कुरुङ्काभिधानं क्षेत्रम् ॥

तदनन्तरमवगाह्य त्रिषवणं सिन्धुधुनीं कृपासिन्धुर्मन्दरधरपादारविन्दगाथामकरन्दसमास्वादनसन्धुतनिरतिशयानन्दो देशिकोऽस्माकं प्रभाकरसन्तानमिव सीतेशोल्लसमानमासाद्य भगवन्मन्दिरमाश्रितजनबन्धुं लोकत्रयत्राणनधुरन्धरमाश्रितजनाचञ्चलानन्दसन्दायिनं तुलसीचम्पकनलिनोत्पलमल्लिकानवमालिकाप्रभृतिप्रसूनवरमालाभिरुल्लासिनमनङ्कधराङ्ककमनीयाननमण्डकोटिनिकरायनं श्रीपूर्णनामानं निर-

ज्ञानं निर्विकल्पं निरामयमप्रमेयं रमाप्रियं भगवन्तं तं सम्प्रणम्य पुनः पुनः संस्तूय सानन्दमुवास तत्र कतिचित्कालम् ॥

प्रस्थाय ततो गत्वाथ दुर्गास्थलमवगाह्य तत्र पयोराशिं शुभगुणराशिं हरिकथापारायणप्रवीणः वीणामुनिवीणागानविलोलमानसकमलालालसमन्दिरमानसः स हि देशिकः कटकमकुटकेयूरकाञ्चीकाञ्चनाम्बरहारनूपुरपरिशोभितां, रोहिणीसहितशशाङ्केनेव सनासिकाभरणरत्नवक्त्रेण विराजमानां, सेवकजनवाञ्छितप्रदानमन्दारपादपायितपादारविन्दामभिवन्द्य कन्यां कात्यायनीं, तदनु तत्र तत्र च संसेवमानो नानायतनानि नारायणस्य सुरवरपुरमिव विलसदुत्तमपञ्चाप्सरसं, कैलासमिव विलसच्छ्रीकण्ठेश्वरं, श्रीमुष्णमिव सभूवराहं, वसुदेवनिलयमिव विलसद्बलं, श्रीरङ्गमिव सरङ्गविलासं, रन्तिदेवेनेव कृतबहुप्रदानेन पारावारेणेव वाहिनीपतिनी पद्मनाभपादकमलगाधामरन्दविलसन्मानसषट्पदेन मेदिनी(दा?धा)रकेण परिपालितं, निर्झरमिव करेणुव्रातं सुरेन्द्रमिव गोवृन्दोल्लसितं सरस्वन्तमिव राजशेखरलालितधवलांशुसैन्धववरसंराञ्जितं, भारतसमराङ्गणमिव अर्जुनमहारथोद्भासितमासाद्य स्यानन्दूरपुरं पञ्चाप्सरसपरिकल्पितकाल्योचितक्रियाकलापः, समरोत्सुककौरवसैन्यमिव गाङ्गेयकान्तं, त्रिदिवनगरमण्डनाकदम्बमिव विचित्रवितानसम्प्राप्तस्वर्गभावमासाद्य मन्दिरमरविन्दनाभस्य वृन्दारकमौलिलालितपादारविन्दं, वन्दारुजनवृन्दानन्दनमन्देतरप्रमोदं, सेवासमागतसुरनरवरधर्ण्यमानगाथाशतं, प्रावृट्श्रियेव उत्तुङ्गपयोधरया पयोदमालयेव बिलसद्धारया सुकीर्त्येव विनतानन्दनकलितारया रमया संशोभितं द्विवाकरयतिसाक्षात्कृतं तं भगवन्तं सम्प्रणम्य पुनः पुनः तत्सन्दर्शनसञ्जातकुतूहलः समस्तावीत् ॥

आदौ वेदगणैरभिष्टुतगुणो यो लोकनाथो हरिः
सृष्ट्वाण्डं प्रथमं तदन्तरुदकं तस्मिन् विराड्रूपधृक् ।
शेते नाभिसरोजपत्रपुटके यस्यास्ति लोकत्रयं
वन्देऽहं तमशेषसेवितपदं श्रीपद्मनाभं सदा ॥ ८३ ॥

संसेव्य कल्याणगुणाम्बुराशिं
सीतापतिं श्रीनरसिंहमार्यः ।

भक्त्याथ संस्तूय च नन्दसूनुं
नितान्तमानन्दितमानसोऽभूत् ॥ ८४ ॥

इत्थं व्यतीतेषु कतिपयदिवसेषु कदाचन स्वफाल्गुनोत्सवमहावभृथे खगपतिसमारूढः खड्गखेटधरसार्वभौमवरभासमानपुरोभागो भगवानम्भोरुहनाभः समभिययावम्भोनिधिमवगाहितुं तदीयमहोत्सवदर्शनसमानन्दितमानसोऽस्मदार्यश्च ॥

नाथः पङ्कजनाभ एष नृहरिश्रीनन्दजाभ्यां युतः
श्रीनारायणनामधेयगदितं वाच्यं जनानां श्रुतम् ।
अद्य स्पष्टयितुं महानवभृथव्याजान्नदीनां पतेः
सस्नावम्भसि तेन नः सह गुरुस्तत्रैव सस्नावयम् ॥ ८५ ॥

तदनन्तरम्—

नवद्विवादित्रगणेऽभिघुष्टे
रथेभपत्त्यश्ववृतैः सहैतैः ।
विहङ्गमेशत्रयभासमानै-
र्नृसिंहनन्दात्मजपद्मनाभैः ॥ ८६ ॥

प्रविवेश पुरीं पुनर्गुरुर्मे
विविधैर्मौक्तिकतोरणादिभिः ।
सफलैः कदलीधरारुहैश्च
विलसन्तीं च वरां मनोहराम् ॥ ८७ ॥

कतिचिद्वासरान् सोऽयमुवासात्र पुरोत्तमे ।
कुतुकी कञ्जनाभाङ्घ्रिसरोरुहनिरीक्षणे ॥ ८८ ॥

इति सीतारामसूरिविरचिते कविमनो-
रञ्जके प्रथमोल्लासः ।

अथ द्वितीयोल्लासः ।

अथ कदाचिद्देशिकोऽस्माकं सीतारामनामा दक्षिणमधुरापुरवस्त्येन गोत्रादित्येन केनचिदौरस्यायितवयस्येन सत्रा सुत्रामपुरीतरङ्गिण्यवगाहनरचितास्थः प्रस्थाय पुरात् स्यानन्दूरपुरात् दुस्तरसंसारसागरनिमज्जज्जननौकायितपदपङ्कज आजगाम जनार्दनक्षेत्रम् ।

तत्र खलु—

स्नात्वा चक्रसरोवरे च जलधौ श्रीरामबाणोदके
कृत्वा राघवपूजनं स कुसुमैः स्थित्वा श्रुतिद्रुस्थले ।
अम्भोजासनसप्ततन्तुमवितुं कारुण्यपाथोनिधि-
र्योऽसावाविरभूज्जनार्दनमयं संसेव्य तुष्टाव तम् ॥ १ ॥

तत्राथ भक्तप्रवरेण केनचित्
सम्मानितस्तेन सह द्विजन्मना ।
अस्मद्गुरुः सद्गुणवाहिनीपतिः
तत्पार्थसूतस्थलमाययौ शनैः ॥ २ ॥

तं पार्थसूतं स्वकृतैः स्तवैर्गुरुः
संसेव्य संस्तूय निजेष्टदायिनम् ।
तस्य प्रसादं समवाप्य भक्तित-
स्तस्माद्ययौ क्षेत्रवराणि तद्युतः ॥ ३ ॥

तदानीं खलु—

यत्र यत्र गुरुरेष सञ्चरेत्
तत्र तत्र निवसज्जनान्ययौ ।
भक्तिमार्गमुपदिश्य मोचयन्
वीरुधोऽपि पदपद्मरेणुभिः ॥ ४ ॥

महाबिलं वीक्ष्य रवौ पिपासौ
तुलां गते हीण इवास्मदार्यम् ।

स निस्तुलं सह्यमहीध्रराजं
महीजराजिं समगान्महात्मा ॥ ५ ॥

तदनु देशिकोऽयं पाञ्चालिकावदुल्लसत्कटकार्जुनं, पाञ्चालदेशमिव द्रुपदविराजमानं, महादेवमिव हैमवतीसमुल्लासितं सगुहं च, विराटमहीपमिव सम्प्राप्तकीचकानुबन्धं, पाराशर्यमिव शाखासहस्रभासुरसारोल्लसितं, त्रिदशालयमिव सुपर्ववंशं, पातालभुवनमिव सुरसोल्लासितं, श्रीरामचन्द्रमिव हरिवरशरणं, पञ्चास्यमिव बहुकेसरं, सुदर्शनमिव विलसन्नेमिजातं, मेदिनीन्द्रनन्दनमिवामोदितधात्रीसमाजं, नभोमण्डलमिव जीमूतमण्डितं, सिन्धुदेशमिव गन्धर्ववरसमिन्धमानं, मत्तमातङ्गमिव श्रीहस्तिनीकान्तं, रतिवन्मदनानन्दिनं, इन्द्राणीव विहितवृषानन्दं, वाद्यसमुदायमिव प्रशस्तसुषिरं, निधिभेदमिव महापद्मं, पाणिनीयतन्त्रमिव विचित्रधातूपेतमासेव्य सह्याचलं, तदनु तटमासाद्य नक्षत्र इव विधुकान्ते, गौतम इव शतानन्दयुते, नीलाम्बुद इव सोमोल्लसिते, रत्नसानाविव कनकालङ्कृते, निशीथ इव सज्योतिःसहिते कावेरीभासमानभागमण्डलदेशे त्रिवेणीसङ्गमसवनत्रयावगाहनार्द्रकपिशजटानिचयः कृतनैयमिको न्यवसदष्टरात्रम् ॥

तद्राजा बहुमानितः सह ततस्तेनास्मदार्यस्त्रिभिः
तत्कालागतविप्रराजिषु महापुण्यैश्च पृथ्वीसुरैः ।
यातो यादवभूधरं गुणनिधिं नारायणं सेवितुं
श्रीमद्यादववंशदुग्धजलधेः सोऽनङ्कराकेश्वरम् ॥ ६ ॥

तदनन्तरम् –

पतगपतिसमर्पितपयःपारावारपन्नगपर्यङ्कराजमानजलजनाभभासमाननानामणिवरशालिमौलिसमुल्लसितं, आश्रितजनसरस्वदालि[illegible]नानन्दितापारकृपापगं, पतङ्गपतिमिव विनतानन्दनं, धर्मपुत्रमिव फाल्गुनोत्सवानन्दिनं सम्प्रणम्य श्रीनारायणं तुष्टाव च सन्तुष्टः पुनः पुनः तमिष्टं भगवन्तम् ॥

श्रीना[illegible]लसत्स्वान्तोऽस्मदार्यो महान्
तस्माद्वैर्द्विजपुङ्गवैः सह धरात् प्रस्थाय देवोत्तमम् ।

स्कन्दं क्रौञ्चकुलाचलेन्द्रभिदुरं कौमारधारानदी-
तीरस्थं प्रययौ प्रणम्य विविधं तं देशमालोकितुम् ॥ ७ ॥

राजीवराजन्मकरन्दपाना-
दुन्मत्तभृङ्गावलिराजमानम् ।
वल्लीशवत् संश्रितनीलकण्ठं
देशं ददर्श द्विपराजराजिम् ॥ ८ ॥

तदनु ऊर्जपूर्णिमायामासाद्य कतिचिद्दिनै रजतपीठपुरमाश्रितवात्सल्यातिशयादाविर्भूतमिह पुरेव मधुरायां मकुटकटकमकरकुण्डलकेयूरकाञ्चीकाञ्चनाम्बरादिविभूषणविभूषितं, तुलसीकमलोत्पलमल्लिकामालतीचम्पकजातीप्रभृतिसुमनस्ततिसंशोभितं कस्तूरीतिलकोल्लसमाननिटालं, कुङ्कुमपङ्काङ्गरागरुचिराङ्गं, सरोवरमिव लक्ष्मणाकान्तं, वृत्तमिव यतिरञ्जितं श्रीकृष्णमासेव्य भगवन्तं, स्तुत्वा च विविधैः स्तवैः अनुदिनमनवच्छिन्नस्वीयनैयमिकः सोऽयमाचार्यस्तत्रोवास वासरान् पञ्चदश ॥

प्रस्थाय तस्माद्गुरुसार्वभौमो
विप्रैश्चतुर्भिः सहितो महात्मा ।
कोटीश्वराख्यं बहुपुण्यलभ्यं
क्षेत्रं पुरारेरभिवन्द्य यातः ॥ ९ ॥

तदनन्तरमतीत्य कुम्भकाशीं सरससारसचक्राह्वपरपुष्टकाककेकिभारद्वाजैः करिवरकोलादिभिश्च परिमण्डितमासाद्य कोल्लूराभिधदेशमनुग्रहलवमात्रेण मूकानपि पण्डितान् विदधतीं वेधोमुखसौधोल्लासिनीं निखिलबुधजनाराधितपादपीठां मूकाम्बिकां बहुकृत्वः समासिषेवे ॥

ततोऽस्मदार्यवर्यस्तामार्यां संस्तूय नैकधा ।
त्रिवासरमुवासात्र कुतूहलितमानसः ॥ १० ॥

प्रस्थाय तस्माद्गुणवारिधिर्गुरुः
क्षेत्रप्रवेकं सह तैर्द्विजन्मभिः ।

गोकर्णसंज्ञं तमयं ययौ महा-
पुण्येन लभ्यं तपसां परं पदम् ॥ ११ ॥

गोकर्णमूर्तिं गिरिजेष्टमेनं
संसेव्य तुष्टाव गुरुः स तत्र ।
अभीष्टदं शिष्टजनेभ्य इष्टं
हृष्टं रमेशस्य सुरेशजुष्टम् ॥ १२ ॥

को वा वर्णयितुं शक्त आदिगोकर्णमद्भुतम् ।
यत्र त्रिरात्रतपसा प्रत्यक्षीक्रियते शिवः ॥ १३ ॥

तदनन्तरं वारणसीपुरमिव शेखरीकृतगङ्गोद्भासितं, चिन्तामणिमिव चिन्तितप्रदं, स्वनायिकाश्लेषणसमासक्तेनेव तटिनीपतिना पुनः पुनः प्रसारिततरङ्गकरैरालिङ्गितगङ्गाधरमन्दिरप्राकारं, विविधविचित्रगृहादिविराजितं क्षेत्रमालोक्य गोकर्णमुपेक्षितकोङ्कणदेशो देशिकः सन्तार्य तरङ्गिणीं घटापहारिणीं स्नातृजनमलापहारिणीमासाद्य मलापहारिलहरीं दिशादशान्ताविश्रान्तयशसं सम्प्राप्तातिविचित्रवचःसिद्धिं निजवागनुवर्तिसमस्तार्थं महान्तं तं चिदम्बरमखीन्द्रमालक्ष्य तत्समर्पितविविधोपहारः समाससाद मरीचिनामकनगरम् ॥

तस्मान्मरीचिनगरादथ तत्र तारकां
गत्वा पुरीं न्यवसदेकदिनं ततोऽयम् ।
सादारनाम पुरमाप ततो ययौ सः
श्रीमन्तराजनगरं बहुसौष्ठवाढ्यम् ॥ १४ ॥

सूर्यनारायणाभिख्ययज्वनो न्यवसद्गृहे ।
तत्राग्निहोत्रवीथिस्थे सोऽष्टरात्रं महात्मनः ॥ १५ ॥

तदानीं खलु तेषु सहागतेषु

यथा —

असम्भृतपयोधराममलचन्द्रसौम्याननां
श्रमेण महतागतो मदनबाणवेगातुरः ।
परिष्वजति पीडितं रहसि यः प्रसुप्तां प्रियां
मृतोऽपि स न बन्धुभिः समनुशोचनीयो नरः ॥

वंशपत्रपतितं तीमारु नू ॥ ८८ ॥

(सातवत्, धीवराश्, तरातिम्, सातवत्, ननुर्, कुरुतेल्)

यथा —

पुष्पसमुज्ज्वलाः कुरवका नदति परभृतः
कान्तमशोकपुष्पहसितं चलति किसलयः ।
चूतसुगन्धयश्च विपिने भ्रमररुतवहाः
सम्प्रति काननेषु सधनुर्विचरति मदनः ॥

मन्दाक्रान्ता सेरुशो नीनू ॥ ८९ ॥

(गङ्गास्, तेश्रीःक्वब्, ननुर्, कुरुतेल्, धीवराश्, लोलमालाष्)

यथा —

बाला तन्वी मृदुरियमिति त्यज्यतामत्र शङ्का
दृष्टा नैव भ्रमरभरतो मञ्जरी भज्यमाना ।
तस्मादेषा रहसि भवता निर्दयं पीडनीया
मन्दाक्रान्ता विसृजति रसं नेक्षुयष्टिः समस्तम् ॥

धृतिः ॥ ९० ॥

१. 'भवता म' क. ख.

धृतिर्नाम द्विसप्तत्यक्षरं छन्दः ।

कुसुमितलता स्सायृशो नु ॥ ९१ ॥

(गङ्गाम् , गङ्गास् , सातवल् , कमलिनीय् , धीवराश् , लोलमालाष्)

यथा —

आमोदामत्तोद्भ्रमरनयना प्रस्फुरत्पल्लवोष्ठी
पुष्पव्यापाण्डुः परभृतरुतव्यक्तरक्तप्रगीता ।
नृत्तोत्क्षिप्तांसा प्रचलितकरा भाति कान्तेव मत्ता
वायुव्याघूर्णा कुसुमितलतावेल्लिता चूतयष्टिः ॥

अतिधृतिः ॥ ९२ ॥

अतिधृतिर्नाम षट्सप्तत्यक्षरं छन्दः ।

शार्दूलविक्रीडितं गुकुस्तज् नौ ॥ ९३ ॥

यथा—

(नूनंसाग् , कुरुतेल् , विभातिक् , कुरुतेल् , गङ्गास् , कृशाङ्गीङ् , नदीज्)

यस्यां मत्तवरेभकुम्भदलनस्थूलप्रहारा रणे
वीराः संहृतदन्तिदन्तकषणक्षुण्णोरुवक्षःस्थलाः ।
बद्धाच्छादसिधेनुसत्कटितटा रम्योज्ज्वलद्भूषणा
राजद्वारमुपागता विदधते शार्दूलविक्रीडितम् ॥

वायुवेगा गुकुदु नौ ॥ ९४ ॥

(नूनंसाग् , कुरुतेल् , विभातिक् , कुरुतेल् , नचरतिद् , कुरुतेल्)

यथा —

नीलैर्विद्युदलङ्कृतोरुशिखरैर्विपुलजलधरै-
व्योम छन्नमुदारधीरनिनदैः क्षरदमृतलवैः ।
केकारावमिदं विमुञ्चति मुदा भुजगरिपुकुलं
सम्प्राप्ते जलदागमेऽतिशिशिरो विचरति पवनः ॥[1]

कृतिः ॥ ९५ ॥

कृतिर्नामाशीत्यक्षरं छन्दः ।

सुवदना स्स्तृणूद्र् नृन्न ॥ ९६ ॥

यथा —

(गङ्गास् , गङ्गास् , कृशाङ्गीङ् , जयनखरण्
नूनंसाग् , नचरातिद्)

तत्पीतं हन्ति संज्ञां कलुषयति वचो बुद्धिं भ्रमयति
हीधर्मौ प्रच्छिनत्ति स्मृतिमपहरति द्वेषं जनयति ।
मुष्णाति प्रीतिमग्र्यां मलिनयति कुलं वृत्तं तुलयति
तन्मोहात्पानसंज्ञं यदि पिबति नरो मृत्युं स पिबति ॥

वृत्तं शिशिशिप् ॥ ९७ ॥

(धीवराश् , विभातिक् , धीवराश् , विभातिक् , धीव-
राश् , विभातिक् , चन्द्रप्)

यथा —

पुष्पपल्लवोज्ज्वलेषु पद्मषण्डमण्डितेषु मत्तकोकि-
लालिवृन्दकूजितेषु सार्धमेव माधवेन यो जघान ।
मीनशत्रुमायतेन मायतेन सायकेन सन्नताङ्गि
सव्यचापबाणपाणिरब्जचारुलोचने ससम्भ्रमीव ॥

[1] Mss. 'विरचति'

प्रकृतिः ॥ ९८ ॥

प्रकृतिर्नाम चतुरशीत्यक्षरं छन्दः ।

स्रग्धरा गोदृशो नृन् ॥ ९९ ॥

(नूनंसाग्, लोलमालाष्, नचरतिद्, कुरुतेल्, धीवराश्, लोलमालाष्)

यथा —

दन्ताग्रप्रोतचैञ्चुद्युति[1]दनुतनयासृग्वसादिग्धदेहो
यो भात्याजौ प्रधावद्व्रजतगिरिरिवाव्रासलन्ध्याभ्रलेखः ।
सोऽव्यादैरावतो वः स्वकटघटतटप्रक्षरद्दानधारा-
स्वादोन्मत्तप्र[2]हृष्टभ्रमरगुमुगुमारावकोलाहलास्यैः[3] ॥

आकृतिः ॥ १०० ॥

आकृतिर्नामाष्टाशीत्यक्षरं छन्दः ।

मद्रकम् तीयिल्कु नै ॥ १०१ ॥

(सातवत्, धीवराश्, कमलिनीय्, विभातिक्, कुरुतेल् विभातिक्, कुरुतेल्)

यथा —

मृत्युपरायणे परमदुर्बले जगति तोयबुद्बुदसमे
व्याधिजरात्मके व्यसनभाजने रुदितशोकशल्यविहते

१. 'चञ्चद्द्युति' ख. ग.
२. 'हृष्यद्भ्र' ख.
३. 'लास्य:' क, 'लाव्यः' ख.

क्रन्दितमूर्ध्वभोजवसिनिम्नधीरिह च यत्र नोभयत्र शतं
तत्र गतव्यथो विषयगोचरः शमयसीन्द्रियाणि नः ॥

अस्यैव ने पिङ्गळस्य ॥ १०२ ॥

अस्यैव मद्रकस्य दशमेऽक्षरे यतिर्भवति पिङ्गळ-स्याचार्यस्य मतेन ।

निकृतिः ॥ १०३ ॥

निकृतिर्नाम द्विनवत्यक्षरं छन्दः ।

अश्वललितं दीयिल्कु ने ॥ १०४ ॥

(नचरतिद्, धीवराश्, कमलिनीय्, विभातिक्-कुरुतेल्, विभातिक्, कुरुतेल्)

यथा —

मरतकशैलभित्तिसदृशोर्मिपातचलितप्रवाळविटप-
प्रकुपितभीमनक्रमकरक्षुतक्षुभितवारिवारणझषः ।
विविधविकीर्णरत्नकिरणातपच्छुरितनिर्मलोदरजलं
सजलपयोदगर्जितरवं स पालयतु वः कुलं जलनिधिः ॥

मत्ताक्रीडा स्गूण्णु न्रू ॥ १०५ ॥

(गङ्गास्, नूनंसाग्, नूनंसाग्; जयनखरण्, जयनचरण्, कुरुतेल्)

1. The latter half of this verse is defective in the Mss., and the third foot has one short syllable more and the fourth two short syllables less.

यथा—

विद्युन्नद्धं खं नष्टार्कं ससुर-
पतिधनुरुपनतजलधरं
शष्पश्यामा रम्याः शैलाः द्रुत-
मुपलविवरनिपतितसलिलाः ।
वृक्षाकम्पो वायुश्चण्डः परिप-
तनशिशिरजलपृषतयुतः
फेनैः शुक्लैः कीर्णा नद्यो नव-
सलिलविसरसमुपहततटाः[1] ॥

सङ्कृतिः ॥ १०६ ॥

सङ्कृतिर्नाम षण्णवत्यक्षरं छन्दः ।

तन्वी तेमुतादस् नुनृ ॥ १०६ ॥

(सातवत्, तेश्रीःक्वब्, तरतिम्, कुरुतेल्, सातवत्, सातवत्, नचरतिद्, गङ्गास्)

यथा—

कामवशार्त्तस्तव सखि ! रमणः
सम्प्रति शुष्यति निशि शशिपादै-
र्विह्वलगात्रः प्रपतति शयने
निःश्वसिताकुलविगलितधैर्यः ।

१. 'समुपहत' ख, ग.

प्राञ्जलिनोक्तः प्रणमितशिरसा
साध्ववधारय रमणवचस्त्वं
मा तव कोपोज्ज्वलवररिपुहा
धक्ष्यति मामिति कथयति तन्वी ॥

मेघमाला णीशीश्शी ॥ १०७ ॥

(जयनरवरण्, धीवराश्, धीवराश्, धीवराश्, धीव-
राश्, धीवराश्, धीवराश् .)

यथा—

चलकिसलयशोभिताशोकसाल-
प्रियालाम्रपुंनागनागादिभि-
स्तरुभिरुरुभिरुज्ज्वलैर्मत्तपुं-
स्कोकिलोन्नादितैर्भूषितं काननम् ।
विकसितकमलोत्पलामोदग-
न्धोत्कटो वात्ययं दाक्षिणात्योऽनिलः
तव सुतनु समागतः कामसन्दी-
पनः काल एष प्रियः[1] सुन्दरि ॥

अभिकृतिः ॥ १०९ ॥

अभिकृतिर्नाम शताक्षरं छन्दः ।

क्रौञ्चीपदा ओण्णु नुन् ॥ ११० ॥

(रौतिमयूरोञ्, रौतिमयूरोञ्, जयनरवरण्, जयनर-
वरण्, कुरुतेल्)

१ 'प्रिये सु' ग.

यथा—

प्रोल्बणदर्पोद्वृत्तममन्त्रं भ्रमदुरुघनघननिभकरिवरकलिलं

प्रज्वलितास्त्रप्रेङ्खितरौद्रद्रुततरगतिपरभृतकुलबहुलम् ।

सिंहविगर्जद्वीपिविकीर्णं हरिरिव मृगगणमरिगणमपभीः

स त्वमनन्यो द्रावयसीति प्रचरति भुवमुरु तव नृवर!
यशः ॥

उत्कृतिः ॥ १११ ॥

उत्कृतिर्नाम चतुश्शताक्षरं छन्दः ।

भुजङ्गविजृम्भितं स्मूर्णुत्री नूनै ॥ ११२ ॥

(गङ्गास् , नूनंसाग्, नूनंसाग्, ननुर् , जयनरवरण्, कुरुतेल्, नदीज्, ननुर्, धीवराश्)

यथा—

कोऽसि त्वं मे का वाहं ते विसृज शठ मम
निवसनं मुखं किमवेक्षसे

न व्यग्राहं जाने ही ही तव सुभग दशन-
वसनं प्रियादशनाङ्कितम् ।

या ते रुष्टा सा ते नाहं व्रज चपलहृदय
निलयं प्रसादय कामिनी-

मित्येवं वः कन्दर्पार्त्ताः प्रणयकृतकलह-
कुपिता वदन्तु वरस्त्रियः ॥

अपवाहकं ग्म्मूर्ण्णू नुनू ॥ ११३ ॥

१. 'मपि मित्रं' क.

२. ख. ग. omit 'व'

३. 'भव' क.

४. 'जगति' क.

स्पर्शमोक्षबिन्दूनां मस्तकानुगं मार्गमापादयितुं पूर्वं तावन्मत्स्यद्वयमापाद्य तयो-र्मत्स्ययोरास्यपुच्छनिर्गतसूत्रद्वयसंयोगबिन्दौ कर्कटकाग्रं विन्यस्यान्यदग्रमेकस्मिन् बिन्दौ कृत्वान्यद्बिन्दुद्वयमस्तकावगाहिनी रेखा धनुराकृतिवदालेख्ये कृता सती तद्ग्राहकवर्त्म स्यात् । क्व पुनरिह पूर्वं तावत् मत्स्यद्वयमापाद्यते । स्पर्शमध्यबिन्द्वोर्मध्ये पूर्वमेकं मत्स्यं ताभ्यामेव बिन्दुभ्यां कल्पयेत् । पुनर्मोक्षमध्यबिन्दोर्मध्ये चापिताभ्यामेव बिन्दुभ्यां द्वितीयमत्स्यम् । एवमालिखितमत्स्ययोरग्रद्वयस्य परस्पराभिमुखासन्नतया मत्स्यद्वयनि-स्सृतसूत्रद्वयस्यापि शकटाग्रयोगवत् सूत्रद्वयसंयोगोऽप्यस्त्येव । किमर्थमिह ग्राहकवर्त्म-प्रदर्शनमिति चेत् इष्टकालग्रासप्रमाणावगमनार्थम् ॥ ३० ॥

कथं पुनस्तदवगम्यत इत्यत आह—

स्थित्यर्धेनेष्टहीनेन हत्वा गत्यन्तरं हरेत् ।
षष्ट्या लब्धकृतिं युक्त्वा विक्षेपस्य कृतेः पदम् ॥ ३१ ॥
तन्नयेत् केन्द्रतो वर्त्म यत्र सम्यक् तयोर्युतिः ।
तत्रेष्टकालजो ग्रासो ग्राहकार्धेन लिख्यते ॥ ३२ ॥

स्पर्शस्थित्यर्धे मोक्षस्थित्यर्धे वा स्वेष्टकालप्रमाणं विशोध्य स्थित्यर्धानयनविपरीतेन स्थितिलिप्ताश्चानीय ता लिप्ता वर्गीकृत्य विक्षेपकृतिमपि कृत्वा तयोर्वर्गयोर्योगं कृत्वा तस्मान्मूलमादाय तत्पदं पुनरर्धीकृत्याङ्गुलमापाद्य तदप्यङ्कितशलाकायामङ्कितप्रमाणमव-गम्य तेन प्रमाणेन प्रमितां वंशशलाकां केन्द्रतो ग्राहकवर्त्म यावत् गत्वा स्पृशति तथा शलाकां केन्द्रतो नीत्वा तदग्रे बिन्दुं कृत्वा तत्रैकमग्रं कर्कटस्य विन्यस्य ग्राह्यबिम्बं खण्डयेत् । तत्र यावत्खण्डितं यथा दृश्यते तावत्तदानीं ग्रासप्रमाणं भवति । कथं पुनः स्थित्यर्धानयनविपरीतेन स्थितिलिप्तानयनम् । ननु स्वेनैवोक्तामिष्टकालविहीनेन स्थित्य-र्धेन चन्द्रादित्यगत्यन्तरं हत्वा षष्ट्यादिभागहारेण विभज्य यत् फलं गृह्यते तदिष्ट-कालविहीनस्थित्यर्धविलिप्ता भवन्तीति । तासां वर्गं विक्षेपवर्गेण युज्यते । गत्यन्तरमिति यदुच्यते तदिहापि स्फुटभुक्त्यन्तरमेव गृह्यते । अस्मिन्नर्थे राज्ञा केरलवंशप्रदीपेन कदाचित् कुलशेखरेणेदमुक्तम्—

अङ्गर्त्वम्बरनन्दवेदमनुभिर्याते दिनानां गणे
ग्रस्ते तिग्ममयूखमालिनि तमोभूतेऽपराह्णे दिवि ।
पृष्टं प्रग्रहणाद्द्वितीयघटिकाग्रासप्रमाणं रवे-
र्भत्रा श्रीकुलशेखरेण विलसद्वेलावृताया भुवः ॥ ३१-३२ ॥

इति शङ्करनारायणीये विवरणे भास्करीये
चन्द्रग्रहणाध्यायश्चतुर्थः ॥

अथ पञ्चमोऽध्यायः ।

एवं चन्द्रग्रहणमुपदिश्येदानीं सूर्यग्रहणविषये विशेषमुपदिदिक्षुराह —

लम्बकाभिहता त्रिज्या परमक्रान्तिसंहृता ।
लब्धं स्वदेशसम्भूतो व्यवच्छेदः प्रकीर्तितः ॥ १ ॥

अवलम्बकेन त्रिज्यां हत्वा परमापक्रमज्यया विभज्य यल्लभ्यते तत्स्वदेशलम्बकव्यासार्धोत्पन्नत्वात् स्वदेशजो भूमिव्यवच्छेदो नाम भवति । अनेन पुनरुत्तरत्र मध्यज्यागुणितायाः प्राग्विलग्नभुजाजीवायाः भागहारत्वेनोच्यते ॥ १ ॥

अथेदानीं मध्यलग्नानयनार्थमाह —

लङ्कोदयानुपातात्तानवगम्य रवेरसून् ।
तिथिमध्यान्तरासुभ्यो हित्वा शोद्ध्यं गतं ततः ॥ २ ॥

अत्र तावल्लङ्कोदयप्राणाः पठिताः पूर्वमेव 'शून्याद्रिरसरूपाणि भूतरन्ध्रमुनीन्दवः, पञ्चाग्निरन्ध्रशशिनः' इति क्रमोत्क्रमाभ्यां पुनरपि मेषाद्यास्तुलादयश्च । तैरिह मध्यलग्नमापाद्यते । कथम् । यस्मिन् दिने यावत्पर्वप्रमाणमादित्योदयादूर्ध्वं दृश्यते तत्सर्वं प्राणराशीकृत्य स्फुटदिनार्धप्रमाणप्राणानप्यापाद्य पूर्वाह्णे स्फुटदिनात् पर्वप्राणान् विशोद्ध्यापराह्णे पर्वणो दिनार्धप्रमाणं विशोद्ध्य वा यदन्तरमुभयथावशिष्यते तत्तिथिमध्यान्तरासुराशिर्भवति । तत्सर्वं क्वचिदवस्थाप्य समादित्यभुक्तभागाः सर्वा लिप्तीकृत्यादित्याधिष्ठितराशिना लङ्कोदयेन हत्वा पुनरेकराशिलिप्ताभिः खखाष्टचन्द्राभिर्विभज्य यत् गृह्यते तल्लङ्कोदयानुपातासवो भवन्ति । तानसून् तिथिमध्यान्तरासुभ्यो हित्वा समादित्यगतभागादिसर्वमपोह्य पुनरुत्क्रमेण यावन्तो लङ्कोदयराशयः शोद्ध्यन्ते तेषामेकैकं राशिं राशिस्थाने हित्वा शेषं त्रिंशदादिगुणं कृत्वा वर्तमानलङ्कोदयेन विभज्य भागादि सर्वं तस्मादेव राशिस्थानादेकमवरोप्य हित्वा यदवशिष्यते तत्पूर्वाह्णे मध्यलग्नं भवति । कथमिह मध्याह्नासन्नतिथिमध्यान्तरासुभ्यो गतगन्तव्यप्राणविशोधनहीनेभ्यो मध्यलग्नानयनम् । तत्र तिथिमध्यान्तरासूनेव त्रिंशदादिगुणं कृत्वादित्याधिष्ठितलङ्कोदयराशिप्राणसमूहेनैव विभज्य समादित्यभुक्तभागादौ विशोद्ध्य क्षिप्त्वा वा प्रागपरकपालयोः मध्यलग्नं भवति ॥ २ ॥

तदर्थमिदमुक्तम् —

शेषेऽपि यावतां सन्ति व्युत्क्रमात्तावतस्त्यजेत् ।
भागलिप्ताश्च पूर्वाह्णे मध्यलग्नमुदाहृतम् ॥ ३ ॥

---

१. AF लब्धः स्वदेशजो भूमेः, B लब्धं स्वदेशजं भूमेः.
२. S2, om मध्य.
३. १८००

अपराह्णे मध्यलग्नानयनार्थमाह —

अपराह्णे चयः कार्यो गन्तव्यादेर्विवस्वतः ।
पातहीनात्ततः कल्प्यो विक्षेपः सौम्यदक्षिणः ॥ ४ ॥

अपराह्णे तावत् पर्वणो दिनार्धं विशोध्य तिथिमध्यान्तरासूनादाय क्वचिदवस्थाप्य समादित्यस्याभुक्तलिप्ताल्लङ्कोदयप्राणानुपातलब्धासून् तिथिमध्यान्तरासुभ्यो हित्वा राशिशेषमपि समादित्ये प्रक्षिप्य शेषादपि यथाक्रमेण लङ्कोदयराश्यसून् विहाय समभानौ प्रक्षिप्य शेषात् त्रिंशदादिगुणितात् वर्तमानलङ्कोदयलब्धभागादीनपि प्रक्षिप्य मध्यलग्नं भवति। अथापराह्णे चयः कार्य इतिभानोर्गन्तव्यादेः प्रक्षेपोऽभिहितः। एतदुक्तं भवति। अपराह्णे तिथिमध्यान्तरासुभ्यः प्राग्विलग्नवल्लङ्कोदयैः मध्यलग्नमानीयत इति। पातहीनात्ततः कल्प्यो विक्षेपः सौम्यदक्षिणः इति मध्यलग्नाद्विक्षेपानयनमुक्तम्। कथम्। मध्यलग्नादपक्रमसंस्कारसंस्कृतात्तत्कालराहुस्फुटं विशोध्य दक्षिणोत्तरदिशावुपलक्ष्य भुजाजीवामादाय परमविक्षेपज्यया खत्रिघनसंख्यया हत्वा व्यासार्धेन विभज्य लिप्तादिमध्यलग्नविक्षेप आनीयते। कथमिह व्यासार्धेन हरणमुच्यते। ननु चन्द्रकलाकर्णेनाविशिष्टेन हरणमभिहितम्। नैष दोषः। कर्णशब्देन व्यासार्धमप्युच्यते। तर्हि चन्द्रग्रहणे कस्माद् व्यासार्धेन विक्षेपग्रहणं नोक्तम्। तत्र चन्द्रकलाकर्णेनैव केचिदाचार्या विक्षेपानयनं कुर्वन्ति। इह तु तथा विक्षेपानयनं न घटते। कुतः। व्यासार्धादधिकहीनसंख्यस्य कर्णस्य भागहारकल्पनया परमविक्षेपगुणस्य खत्रिघनसंख्यस्यागमनाभावात्। कथमभावः कल्प्यते। यदि व्यासार्धस्य खत्रिघनसंख्या लभ्यते व्यासार्धहीनस्य पातोनमध्यलग्नसमुत्पन्नभुजागुणस्य कियतीति विक्षेपानयनत्रैराशिकमुच्यते। एतत्तु पुनः स्वयमेव बृहति कर्मनिबन्धे वक्ष्यति च। कथम्।

"सैंहिकेयविहीनस्य जीवा लग्नस्य ताडिता ।
तिथिभिश्चन्द्ररन्ध्रैकैर्विक्षेपज्या विलग्नजा ॥"

इति। तत्र व्यासार्धं परमविक्षेपं च भागहारगुणकाराविति परिकल्प्य तावुभौ संक्षिप्तौ चन्द्ररन्ध्रैकाश्च तिथिसंख्या च भागहारगुणकारावुभौ भवतः। अत्रापि किं विक्षेपस्य विपरीतदिग्ग्रहणमिष्यते। नेष्यते। यथागतदिग्वशादेव दिग्गृह्यते। तथा दिग्ग्रहणं चन्द्रग्रहणविषय एव विधीयते नान्यत्र। किमर्थं विक्षेपानयनविषये अपक्रमसंस्कारता विधीयते। 'शशिविक्षेपोऽपमण्डलार्धम्' इत्युक्तत्वात्। अपक्रममण्डलाद्विक्षेपमण्डलस्यार्धमांशप्रमाणविक्षेपत्वादित्यर्थः। तथाहि गोले दृश्यते।

१. S2. 3 मध्यमलग्न.

अतोऽपक्रमस्य विक्षेपस्य च समानत्वादुभयोरपक्रमसंस्कारतेष्यते। तर्हि चन्द्रग्रहणविक्षेपानयनं कस्मान्नोक्तत्। मध्यमलग्नविक्षेपस्येति संप्रदायः, न पुनरन्यत्र ॥ ४ ॥

अथेदानीं मध्यलग्नात् मध्यजीवाग्रहणार्थमाह—

मध्यलग्नापमक्षेपपलज्याधनुषां युतिः।
तुल्यदिक्त्वे विदिक्कानां विश्लेषः शेषदिग्वशात् ॥ ५ ॥

मध्यलग्नात् भुजाजीवामादाथ दिशं चोपलक्ष्य तां परमापक्रमेण सप्तरन्ध्राग्निरूपेण हत्वा व्यासार्धेन विभज्यापक्रमजीवां गृहीत्वा काष्ठीकृत्य विक्षेपज्यामपि काष्ठीकृत्य स्वदेशपलज्यां च नित्यदक्षिणामपि काष्ठीकृत्य तेषां धनुषां तुल्यदिक्त्वे योगं कृत्वा भिन्नदिक्त्वे विश्लेषं वा कृत्वा विश्लेषितस्य दिग्वशात् पुनस्तस्मात्काष्ठात् मध्या जीवा गृह्यते सेह मध्यज्या भवति। तामेकत्र विन्यस्य प्राग्विलग्नभुजज्या पुनर्ग्राह्या ॥ ५ ॥

तदर्थमथेदानीमाह—

मध्यजीवा तया क्षुण्णां प्राग्विलग्नभुजां हरेत्।
व्यवच्छेदेन यल्लब्धं वर्गीकृत्य विशोधयेत् ॥ ६ ॥

यस्मिन् दिने यावत् पर्वप्रमाणमादित्योदयात् ऊर्ध्वमवगम्यते तत्सर्वं प्राणराशीकृत्य समादित्यभुक्तप्राणानादाय पर्वणो विशोद्ध्य राशिशेषमपि रवौ क्षिप्त्वा पुनः पुनः स्वदेशोदयराशिभिर्विशोधितांस्तांस्तान् राशीन् प्रक्षिप्य शेषादपि त्रिंशदादिगुणिताद्गतमानोदयराशिप्राणलब्धभागादीनपि क्षिप्त्वा प्राग्विलग्नमापाद्य तस्माद् भुजाजीवामादाय तां मध्यज्यया हत्वा पूर्वानीतस्वदेशभूमिव्यवच्छेदेन विभज्य यल्लब्धं तद्वर्गीकृत्य मध्यजीवामपि वर्गीकृत्य तस्माद्विशोधयेत् ॥ ६ ॥

तदर्थमाह—

मध्यज्यावर्गतः शेषो वर्गो दृक्क्षेपसम्भवः।
तत्कालशङ्कुवर्गेण युक्त्वा तं प्रविशोधयेत् ॥ ७ ॥

एवं मध्यज्यावर्गतः शुद्धावशिष्टं दृक्क्षेपसम्भवं नाम भवति। यस्मान्मूलं गृहीतं दृक्क्षेपज्या स्यात् अतो दृक्क्षेपसम्भव इत्युच्यते। कदा पुनस्तन्मूलं दृक्क्षेपज्येति गृह्यते। उत्तरत्राविशिष्टे सति न पुनरिदानीं गृह्यते। इदानीं तु पुनर्दृक्क्षेपसम्भवमेकत्र विन्यस्य पूर्वापराह्णयोर्गतगन्तव्यप्राणपिण्डाभ्यां स्वाहोरात्रादिभिश्च गोलवशान्महा-

शङ्कुमानीय वर्गीकृत्य तेन वर्गेण दृक्क्षेपसम्भवं युक्त्वा तत्सर्वं व्यासार्धवर्गाद्विशोध्य शेषान्मूलं ग्राह्यम् ॥ ७ ॥

तदर्थमाह —

विष्कम्भार्धकृतेर्मूलं रूपरन्ध्रनिशाकरैः ।
हृत्वा लब्धस्य भूयोंऽशो विज्ञेयो योऽर्धपञ्चमैः ॥ ८ ॥

एवं मूलमादाय तन्मूलं [1]रूपरन्ध्रनिशाकरैर्विभज्य यत्फलं गृह्यते तदेकत्र विन्यस्य तच्छेषमप्यनष्टं विन्यस्य तदुभयं द्विगुणीकृत्य शेषाद्रूपरन्ध्रनिशाकरेणैवाप्तमन्यस्मिन् द्विगुणिते प्रक्षिप्य तच्छेषमनष्टं कृत्वा तदर्धपञ्चमैर्द्विगुणितैः नवभिर्विभज्य यत्फलमवाप्यते तल्लम्बनघटिका भवन्ति । पुनस्तच्छेषं पूर्वशेषं च षष्ठ्या हत्वा पूर्वशेषाद्रूपरन्ध्रनिशाकरेणैवाप्तफलसहितं लम्बनघटिकाशेषं कृत्वा नवभिरेव विभज्य फलं विनाडिका भवन्ति । पुनष्षड्भिरुभयं हत्वा तेनैवाप्तमन्यस्मिन् युक्त्वा नवभिरेव प्राणा ग्राह्याः । अत्र तु पुनरर्धपञ्चमैरंशैः हरणे विहिते सति कथं नवभिरुच्यते । अत एव हार्यं द्विगुणीकृत्य हारकमपि नवसंख्यया विभजनमस्माभिरुच्यते । इतरथा हि चतुर्भिर्भागैः अर्धसहितैः कथं गृह्यते । अथवात्र पूर्वमूलमेव द्विगुणीकृत्य पूर्वोक्तभागहारसमवर्गेण नवेन्दुमुनिरूपेण[2] विभज्य घटिकादयो ग्राह्याः । अथवा मूलं षष्ट्या हत्वा [3]खस्वरेष्वेकभूत इत्यनेन विभज्य घटिकादिफलं ग्राह्यम् । एवं त्रयाणां प्रयोगेणैकेन लम्बनघटिकादिफलं गृहीत्वा यद् दृश्यते तल्लम्बनकालो नाम भवति ॥ ८ ॥

तदर्थमाह—

लम्बनाख्यो भवेत्कालो नाडिकाद्यो रवेर्ग्रहे ।
पर्वणश्शोध्यते प्राह्ने दीयते मध्यतोऽपरे ॥ ९ ॥

लम्बनकालं प्राणराशीकृत्य पूर्वाह्ने पर्वणस्तद्दिनोद्भवाच्छोधयेत् । अथापराह्ने पर्वणि दीयते क्षिप्यत इत्यर्थः । मध्यतोऽपर इत्यत्रापराह्ण इति यावत् । एवं पर्वणि लम्बनसंस्कारं कृत्वा तान् लम्बनप्राणानादित्यस्फुटभुक्त्या हत्वाहोरात्रासुना विभज्य स्फुटभुक्तिवशाल्लिप्ता विलिप्ता वा गृहीत्वा शोधनक्षेपणे कृत्वा समादित्ये पूर्वाह्णापराह्णयोः पुनस्ताभ्यां पर्वार्काभ्यां पूर्ववन्मध्यलग्नप्राग्विलग्नदृक्क्षेपसम्भवतत्कालशंकुभिश्च लम्बनघटिकाद्यानीय ताभिर्घटिकाभिः प्रथमपर्वणि समादित्ये च प्राग्वत्कृत्वा ताभ्यां पर्वार्काभ्यां

---

१. १९१
२. १७१९
३. ५१५७०

पुनरपि मध्यमलग्नादिलम्बनान्तं आनीय तल्लम्बनेनापि समपर्वादित्ययोरेव संस्कृत्य भूयोभूयस्तावद्यावदविशेषदर्शनात् मागक्रमेव कार्यः। इयान्विशेषः प्रथमपर्वणि समादित्ये च सर्वदा शोधनक्षेपणकर्म क्रियत इति। क्व पुनरिह लम्बनभोगस्य समादित्यशोधनक्षेपणमिति विधीयते। उक्तं ननु प्रथमाध्यायावसाने देशान्तरयुक्त्या प्रलम्बनयुक्तिर्भिद्यत इत्यत्र। कथम्।

धनर्णे स्तस्तिथेस्तस्य कालस्येन्द्वर्कयोरपि।
लम्बनस्यैव नात्र स्याद्युक्तिर्देशान्तरस्य सा॥

इति इन्दोरपि सत्यविशेषे अविशिष्टलम्बनेनेष्यते॥ ९॥

एवं लम्बनाविशेषकरणार्थमाह—

एवं कृतेन भूयोऽपि पर्वणा कर्म कल्प्यते।
कालस्य लम्बनाख्यस्य निश्चलत्वं दिदृक्षुणा॥ १०॥

निश्चलत्वं नामाविशेषकर्मोच्यते। दिदृक्षुणा द्रष्टुमिच्छता देवदत्तेनेति यावत्॥ १०॥

अथेदानीं अवनतिस्फुटापादनार्थमाह—

दृक्क्षेपज्यामविश्लिष्टां गत्यन्तरहतां हरेत्।
खस्वरेष्वेकभूताख्यैर्लब्धास्ता लिप्तिकादयः॥ ११॥

तत्कालशशिविक्षेपसंयुतास्तुल्यदिग्गताः।
भिन्नदिक्का विशेष्यन्ते रवेरवनतिस्फुटाः॥ १२॥

अविशिष्टदृक्क्षेपसम्भवमूलं दृक्क्षेपज्यां च चन्द्रादित्यस्फुटभुक्त्यन्तरेण हत्वा खस्वरेष्वेकभूत इत्यनेन विभज्य स्फुटभुक्त्यन्तरवशात् लिप्ता वा विलिप्ता वा गृहीत्वा यत् फलमानीयते तस्य दिगपि मध्यजीवावशाद्दक्षिणोत्तरावगन्तव्या। अतो लम्बनाविशेषणकाले दृक्क्षेपसम्भवं प्रतिराश्य विशेषणं कर्तव्यमित्येतदर्थापन्नम्। तत्कालशशीति यो निगद्यते स तावदविशेषणलम्बनप्राणभोगसंस्कृत इत्यर्थः। तद्यथा लम्बनप्राणं चन्द्रस्फुटभुक्त्या[3] हत्वाहोरात्रासुना विभज्य तेन फलेन पूर्वाह्णापराह्णयोः शोधनक्षेपणसंस्कारयुत इत्यर्थः। एवं समचन्द्रं संस्कृत्य तस्मात्तत्कालीकृतपातस्फुटं विशोध्य

---

१. G क्रमेण.
२. BH संयुक्ताः.
३. S चन्द्रभुक्त्या.

दिशमुपलक्ष्य जीवामादाय तां खत्रिखनेनैव हत्वा व्यासार्धेन विभज्य विक्षेपमानीय पूर्वानीतदृक्क्षेपफललिप्ताभिर्दिग्वशाद्योगो वियोगो वा कृतो विक्षेपस्फुटावनतिर्नाम भवति । एवं रविग्रहणविषयविधानाद्रवेरेव नतिरित्युच्यते स्फुटविक्षेप इति यावत् ॥ ११–१२ ॥

अथेदानीं स्थित्यर्धनाडिकाद्यानयनार्थमाह—

अर्केन्दुबिम्बसम्पर्कदलावनतितः स्फुटाः[1] ।
स्थित्यर्धनाडिकास्साध्याः प्राग्वद्वलनकर्म च ॥ १३ ॥

प्रग्रासमोक्षयोरेवं लम्बनावनती सकृत् ।
लम्बनान्तरसंयुक्ते स्थित्यर्धे निर्दिशेत्स्फुटे ॥ १४ ॥

यथा चन्द्रग्रहणे स्थित्यर्धवलने कथिते तथेहापि तदुभयं विधीयते । कथम् । अर्कचन्द्रबिम्बावेकीकृत्यार्धीकृत्य वर्गीकृत्य तस्मात्सम्पर्कार्धवर्गात् अपनीतिवर्गं विशोध्य शेषान्मूलमादाय षष्ट्या हत्वा भुक्त्यन्तरेण विभज्य घटिकादिप्राणान्तं फलं गृहीत्वा सवर्णीकृत्य प्रतिराश्यविशेषलम्बनसंस्कृतपर्व द्विधा कृत्वा स्थित्यर्धमेकस्मिन् संशोध्यान्यस्मिन् प्रक्षिप्य स्पर्शमोक्षपर्वद्वयमेवमापाद्य पुनः स्थित्यर्धमुभयत्र विन्यस्य चन्द्रादित्यस्फुटभुक्तिभ्यां हत्वा खखषट्घनेन हृत्वा यदवाप्तं फलद्वयं तदपि लम्बनकालसंस्कृतचन्द्रादित्ययोरेव द्विधाकृतयोः शोधनक्षेपणे कृत्वा यथा तावुभौ चतुर्विधा भवन्ति तेषु चतुर्विधेषु द्वौ शोधितौ स्पर्शार्कचन्द्रौ भवतः । प्रक्षिप्तौ मोक्षचन्द्रार्कौ स्याताम् । तत्र पूर्वं स्पर्शपर्वार्कचन्द्रैः स्पर्शस्थित्यर्धं पूर्वोक्तन्यायेनैव लम्बनान्तरं युक्त्वा सकृदानीयाविशेषलम्बनसंस्काराविशिष्टे पर्वाणि लम्बनान्तरसंयुतं कृत्वा विशोधिते सति स्पर्शकालो भवति । एवं मोक्षपर्वार्कचन्द्रैः स्थित्यर्धमानीय लम्बनान्तरयुतं कृत्वा विशिष्टपर्वण्येव प्रक्षिप्ते सति मोक्षकालोऽप्यादेष्टव्यः । तत्रोभयकपालग्रहणे लम्बनं समस्तं स्थित्यर्धे युक्त्वा शोधनक्षेपणमिष्यते । कुतः । मध्याह्ने लम्बनस्य मान्द्यत्वात् । उभयकपालमिति किमिहोच्यते । ननु चोक्तं पूर्वाह्णे स्पर्शं कृत्वा मध्याह्नमतीत्य मोक्षश्चेत् तदुभयकपालग्रहणमिति । क्व पुनर्लम्बनान्तरं विहाय लम्बनेन समस्तेन स्थित्यर्धे युक्त्वा स्पर्शमोक्षकालसाधनमुच्यते । अनेनैव शास्त्रान्तरेऽप्युक्तम् । कथमिह स्थित्यर्धे योजयितुं लम्बना-

1. AB दलेनावनतिस्फुटात्, C दलेनाववतेः स्फुटात्, DF. दलादवनतेः स्फुटात्

न्तरं गृह्यते। स्पर्शपर्वणो भानोश्च मध्यलग्नादिसर्वं पूर्ववत् कृत्वा लम्बनप्राणानादाय तान् क्वचिद्विन्यस्य पूर्वानीताविशिष्टलम्बनप्राणानप्येकत्र पूर्वमेव विन्यस्य तयोरेकस्मान्महतो विशोध्य यद्विशेषं दृश्यते तल्लम्बनान्तरं स्यात्। तत्रानीतदृक्क्षेपज्यया स्पर्शचन्द्रेण चावनतिस्फुटमपि कृत्वा वर्गीकृत्यार्केन्दुबिम्बसम्पर्कदलवर्गादेव विशोध्य मूलमादाय षष्ठ्यादिगुणं कृत्वा भुक्त्यन्तरेणैव विभज्य घटिकादिप्राणान्तं फलमानीय वर्गीकृत्य तस्मिन् लम्बनान्तरं युक्त्वा शोधनपर्वण्यविशिष्टे कृते स्पर्शकालो भवतीति। मोक्षकालोऽप्येवं मोक्षभागैः पर्वार्कचन्द्रैः मध्यलग्नादिस्थित्यर्धान्तं कृत्वा अविशिष्टपर्वणि क्षिप्त्वा मोक्षकाल आदेष्टव्य इति। तत्र स्थित्यर्धाविशेषणं नेष्यते। कुतः सकृदानयनमेव विधीयते लम्बनावनती सकृदिति। अत्र वलनमपि पूर्ववदिह कर्तव्यमिति विहितम्। कथमिति चेत् प्रग्रासमध्यमोक्षकालत्रयं प्राणरूपीकृतं स्फुटदिनार्धप्रमाणात् प्राणरूपीकृताद्विशोद्ध्य पूर्वाह्णे तिथिमध्यान्तरालासूनादाय अक्षवलनत्रयमानीयते। अथापराह्णे प्रग्रासमध्यमोक्षपर्वभ्यो दिनार्धमानं विशोध्य तत्रापि तिथिमध्यान्तरालासूनवगम्य तेभ्यो वलनत्रयमानेतव्यम्। पुनरयनवलनमपि प्रग्रासमध्यमोक्षकालतत्कालीकृतसूर्यस्फुटत्रयं विन्यस्य तेभ्यः कोट्युत्क्रमज्यापक्रमत्रयमानीय काष्ठीकृत्याक्षवलनकाष्ठत्रयसंयोगवियोगं दिग्वशात् कृत्वा तेभ्यो जीवामादाय सम्पर्कार्धहतां कृत्वा त्रिज्यया विभज्य तस्मिन् विक्षेपाभ्यां दिग्वशाद्योगं वा वियोगं वा कृत्वा मध्यवलनविक्षेपयोरपि पूर्ववत्कृत्वा वलनस्फुटत्रयमानीय वलनं सम्पर्कार्धाधिकं चेत् सकलसम्पर्काद्विशोद्ध्य तत्र परिशिष्टं स्फुटवलनमिति परिकल्प्य वा यद्विहितं तत्रापि सूर्यग्रहणेऽपि प्रकीर्तितं प्राग्वद्वलनकर्म चेति। अत्र तु पुनः परिलेखनविधिः पूर्वोक्तवत्। सर्वमविस्मृत्य कर्तव्यम्। अत्र ग्राह्यबिम्बं सूर्यबिम्बं ग्राहकबिम्बं चन्द्रबिम्बम्॥ १३-२४॥

अथेदानीं ग्रहणसद्भावासद्भावप्रदर्शनार्थमाह —

सम्पर्कार्धकलातुल्यकलासङ्ख्यानतौ शशी।
न रुणद्धि रवेर्बिम्बं ध्वान्तविध्वंसदीधितेः॥ २५॥

मध्यग्रहणकालानीतस्फुटावनतौ सम्पर्कार्धकलातुल्यायां सत्यां रवेर्बिम्बं शशी न रुणद्धि न स्थगयतीत्यर्थः। अष्टमांशं सम्पर्कार्धस्य परित्यज्य यच्छेषं तस्माद्धीनाधिकत्वमालोच्यते॥ २५॥

इति भास्करीये विवरणे शङ्करनारायणीये
सूर्यग्रहणाध्यायः पञ्चमः॥

हरिवरहनुमन्मतानुगस्तं
परिसर एव निवेश्य लालयित्वा ।
परिचितपरिशुद्धसौहृदात् त्वं
परममुतः परमर्म नन्वबुद्धाः ॥ २ ॥

'कतिपयथदिनात्परं तु लङ्का
पतिरहितैव भविष्यती परस्तात् ।
भवतु पतिमती त्वये'ति मन्त्रं
परिपठता भवताभ्यपेचि बन्धुः ॥ ३ ॥

तदनु तदुदितव्रतोपवासी
हृदि सगरं गुरुमात्मनो विभाव्य ।
तदुपचितमहोदधिप्रसत्त्यै
द्रुतरचितं कुशतल्पमभ्यशेथाः ॥ ४ ॥

सहजविगम*भीतिभाग्दशास्य-
श्चरविदितेऽखिले छलेन भेदम् ।
अकृत शुकमुखेन यं स जज्ञे
विकृतिनिदानविदां विहासहेतुः ॥ ५ ॥

अभिशयितवतोऽथ दर्भशय्यां
सुदृढसमाधिजुषोऽर्थनापरस्य ।
अमितशमदमस्य ते निशाना-
मगमदहृष्टफलं त्रयं क्रमेण ॥ ६ ॥

---

४. तदुदितेति विभीषणाभिप्रायानुरोधेन व्रतोपवासग्रहणमिति सिध्यति ।

५. सहजविगमेन हेतुना भीतिभागिति चरप्रेषणहेतुः । शुकेति सारणस्याप्युपलक्षणम् । सः भेदः विकृतेः शुकसारणयोर्वानररचितविकारस्य निदानं विदन्तीति तेषाम् ।

६. त्रीणि दिनानि प्रायोपवेशो व्यरचीति । तथापि न प्रससाद सागर इति च भावः ।

---

* 'दैन्यभाग्' इति पाठान्तरम् ।

अथ पुनरुदितेऽरुणेऽधरोष्ठ-
द्युतिविकटभ्रुकुटीपटीनटीके ।
प्रतिघनटपटुस्त्वदास्यरङ्गे
प्रनटितुमैहत दीप्तनेत्रदीपे ॥ ७ ॥

चितमनुयाचनं प्रभुष्व-
प्यविनयपर्वततुङ्गशृङ्गभाक्षु ।
उपनय सनिषङ्गमङ्ग! शार्ङ्गं
रिपुवशगो रिपुरेव मे पयोधिः" ॥ ८ ॥

तपरिकरबन्धमित्थमुक्त्वा
सदरसहोदरसादरोपनीते ।
सपदि समदधा धनुष्यमोघं
सलिलविशोषणकर्मठं विपाठम् ॥ ९ ॥

विशिखमुखविनिर्गतोग्रवह्नि-
क्वथितघृतोदमिळत्प्रतप्तपाथाः ।
प्रकटतटलुठत्प्रभीतयादाः
प्रतिबुबुधे तव सङ्कटं प्रचेताः ॥ १० ॥

प्रथमविरचिते कबन्धनाशे
कथमधुनापि समुद्यतोऽसि नाथ! ।
इति शरणमगादपांपतिस्त्वां
प्रदिश स मे कुशलानि सङ्गमेश! ॥ ११ ॥

इति पञ्चत्रिंशदशकम् ।

---

७. अथ दिनत्रयातियानानन्तरम् ।

९. विपाठं शरविशेषम् ।

१०. घृतोदेति समुद्रान्तराणामपि सन्तापः स्फुरति । प्रचेता वरुणः । समुद्रसप्तकाधिपतिः खल्वयम् ।

११. कबन्धोऽसुरो जलं च । अपांपतिः बहुळग्रहणादलुक् ।

"दाहावहत्वं यदिदं हुताशने
सागाधता सा मयि कल्पिता त्वया ।
हा हा जिहासामि न तामहं क्वचित्
स्नेहातिरेकानुगुणं तु भण्यताम्" ॥ १ ॥

एवं नमस्कृत्य वितीर्य गाधतां
यावन्निशाचारिपुरीं निजार्णसाम् ।
याते प्रचेतस्यमुचस्त्वमाशुगं
स्फीते तदुक्त्या द्रुमकूलभूतले ॥ २ ॥

प्रीतो न्यधास्त्वं (तृ ? त्रि)णतां *निजानुजे
स्फीतोन्नतौ सोऽप्यहिते दुरीहिते ।
मोदोन्नतां भ्रूलतिकां कपीश्वरे
सेतोर्निरूढ्यै स च यूथपेषु ताम् ॥ ३ ॥

पुत्रो नलाख्यः पुरुहूतशिल्पिनः
प्रस्तावविद्वान् प्लवगस्तवेङ्गितात् ।
उत्थाय नत्वावददुद्वहन्मुदं
कर्त्तास्मि सेतुं करकौशलादिति ॥ ४ ॥

राज्ञा कपीनां भवतापि चादरा-
दाज्ञां वितीर्णामुपलभ्य वानलः ।
प्राज्ञानथान्यान् व्यवसायिनो बहून्
स्वाज्ञाकरानारचयद् गिरैव वाम् ॥ ५ ॥

---

१. जिहासामि हातुमिच्छामि ।

२. निशाचारिपुरीं यावत् लङ्कापर्यन्तं तदुक्त्या वरुणवाक्येन ।

३. त्वं प्रीतः सन् निजानुजे लक्ष्मणे तृणतां चापं न्यधाः । स लक्ष्मणः स्फीतोन्नतावपि दुरीहिते अहिते रावणे तृणतां तृणत्त्वबुद्धिं निहितवान् । स सुग्रीवः यूथपेषु नळादिषु तां भ्रूलतिकाम् ।

४. पुरुहूतशिल्पिनो विश्वकर्मणः ।

५. वां तव सुग्रीवस्य च सर्वनामैकशेषः ।

---

* 'च सोदरे' इति पाठान्तरम् ।

गन्धर्वविद्याधरकिन्नराणै-
रन्तर्विगाढाद्भुतहर्षमैक्ष्यत ।
सेतुर्विधूताखिलपातकः स ते
श्रीसङ्गमाधीश्वर ! राम ! पाहि माम् ॥ ११ ॥

इति षट्त्रिंशदशकम् ।

सेतुवर्त्मकरणाय नियुक्ता
यातुसद्म रुरुधुः कृतकृत्याः ।
भूधरानयनकर्मरता ये
ते तु तानतिबहूनुपनिन्युः ॥ १ ॥

अङ्गदोढसहजः सहसैन्य-
स्त्वं गतो हनुमता समुदूढः ।
स्वीयमन्त्रियुतनूतनलङ्का-
नायकप्लवगराजपुरोगः ॥ २ ॥

पूर्णमाशरपुरीं परितस्त-
त्तीर्णवारिधि तरच्च तरिष्यत् ।
घूर्णमानचतुरर्णवतुल्यं
कीर्णमैक्षि खचरैः कपिसैन्यम् ॥ ३ ॥

सोग्रनादबधिरीकृतलोका
भाग्यसम्पदिव मूर्तिमती ते ।
श्लाघ्यतामभृत वानरसेना
मार्गवीक्षकविभीषणगुप्ता ॥ ४ ॥

---

११. विधूतेति सेतुदर्शनस्यैव पातकनाशकत्वस्मरणात् ।

१. कृतकृत्याः कृतसेतुमार्गाः । अतिबहून् यावदुपयोगाधिकान् ।

२. नूतनलङ्कानायको विभीषणः ।

३. आशरपुरीं परितः लङ्कायाः समन्तात् । 'अभितः परितः' इत्यादिना द्वितीया ।

४. सविस्मयखचरोक्षिता ।

वा[illegible]पजापक एको
   रावणप्रणिधिरत्र निबद्धः ।
'मुच्यता'मिति गिरा तव मुक्तः
   प्राप्य रावणमवोचदवस्थाम् ॥ ५ ॥

तद्वचस्तु स तृणीकृतवान् द्वौ
   मन्त्रिणौ च शुकसारणसंज्ञौ ।
प्राहिणोद् गणयितुं कपिवीरां-
   स्तावुभौ विविशतुस्तव सैन्यम् ॥ ६ ॥

वीक्ष्य वीक्ष्य सुभटान् गणयन्ता-
   वेष्यदाशरपतिः कपिवेषौ ।
प्रेक्ष्य तौ तव सकाशमनैषीत्
   प्रेष्यतां तव गतौ ययतुस्तौ ॥ ७ ॥

तावुभौ तव बलं कथयन्तौ
   रावणाय मणिसौधगताय ।
सेवकावपि वितर्क्य निरस्तौ
   भाव एवमगदस्य मुमूर्षौ ॥ ८ ॥

रावणस्त्वथ परैरपि चारै-
   स्तावकं बहु विदन्ननुभावम् ।
मायिके तव धनुःशिरसी तां
   दर्शयन्ननृतमाह स सीताम् ॥ ९ ॥

---

५. उपजापकः भेदयितुं समायातः ।

७. प्रेष्यतां भृत्यताम् ।

८. मुमूर्षौ विषये अगदस्यौषधस्य भावः स्वभाव एवं औषधं निरस्येतेति यावत् ।

९. मायिके मायया विरचिते ।

"त्वत्प्रियः कपिबलेन सहासो
मङ्कटैर्विंशसितो निशि निद्रन् ।
लक्ष्मणस्तु विचितो न च लब्धः
पश्य तन्मुखमिदं च धनुश्च" ॥ १० ॥

इङ्गिशङ्कितमवेक्ष्य दृशेदं
विद्विषा कथितमप्युपकर्ण्य ।
सत्यमित्यतिशुचा विलपन्तीं
प्रत्यगात् स च विहाय रणाय ॥ ११ ॥

'सत्यमेतदिति मा कुरु शङ्का'-
मित्युदीर्य सरमा परमार्थम् ।
पत्युरुद्यममियं कथयन्ती
मृत्युवक्त्रत इमामुदहार्षीत् ॥ १२ ॥

'सत्परायणगुणस्तव भर्ता
त्वत्परो वसति यत्पुररोधी ।
तत्प्रियस्य तव चेक्षणविघ्नो
यः पुरा खरवधेऽद्य च तावान् ॥' १३ ॥

वैभवादिति विभीषणपत्न्या
प्रापिता प्रकृतिमास्त वधूस्ते ।
सङ्कटे सुजनसङ्गमदायी
सङ्गमेश्वर! स मां परिपाहि ॥ १४ ॥

इति सप्तत्रिंशदशकम् ।

---

११. इङ्गिशङ्कितमिति क्रियाविशेषणम् ।

१२. सरमा, तन्नामिका राक्षसी बिभीषणपत्नी ।

सत्कृत्य प्रियवचसः प्रहस्तमुख्यान्
न्यक्कुर्वन् हितमपि माल्यवन्मतं सः ।
रक्षार्थं पुरि परितो नियुज्य वीरान्
रक्षोराडवसदुदीचि गोपुराग्रे ॥ १ ॥

तद्वृत्तं त्वमथ विदन् विभीषणोक्तं
निर्दिश्य प्रतिदिशमात्मसैनिकानि ।
निर्लक्ष्यन् विमतपुरीमवैक्षथास्त्वं
प्रत्यक्षं प्रचुरबलः सुवेलसंस्थः ॥ २ ॥

सुग्रीवो दशवदनं तदा निरीक्ष्य
प्रोत्प्लुत्य प्रसभमुपेत्य तत्समीपम् ।
उच्चैस्तं हृतमकुटो निपात्य भूमौ
निर्जित्य त्वरितमगात् भवत्सकाशम् ॥ ३ ॥

'क्षुद्राणामिदमुचितं न हि प्रभूणा'-
मित्युक्त्वा प्रियसखसाहसादतुष्यन् ।
दृष्ट्वा तामरिनगरीमरीणरक्षां
प्रत्यागाः प्लवगबलैः सुवेलशृङ्गात् ॥ ४ ॥

मन्देहो दशवदनोऽभिपत्य दृष्टः
सन्देशं तव हरताङ्गदेन पृष्टः ।
'सन्देहोऽभवदिह भोः स ते ह्यपोह्यः
सन्धित्सा यदि वद तेऽथवा युयुत्सा' ॥ ५ ॥

'कस्त्वं रे कपिभट' 'वालिनन्दनोऽहं'
'किं नामा' 'खलबलभंगदोऽङ्गदाख्यः ।'
'नाश्रौषं' 'परिचितिरस्ति नौ' 'क्व देशे ?'
'दोर्मूले मम हि पितुः सहोषितौ स्वः' ॥ ६ ॥

---

१. उदीचि उत्तरे ।

४. प्रत्यागाः वानरसेनानिवेशमिति गम्यते ।

५. इह वक्ष्यमाणविषये । स सन्देहः । ते त्वयेति यावत् ॥

'भीमत्त्वात् कुत इह जानकीममुष्णा
सामर्थ्यं शृणु, सुसखा विभीषणो मे ।
सामर्थ्यं समिति तवास्मि बोद्धुकामो
रामस्त्वां जगदभिराम एवमाह' ॥ ७ ॥

इत्युक्तिप्रतिवचनादनूक्तवाच्यो
विद्वद्भिर्दशमुखकिङ्करैर्गृहीतः ।
उद्युक्तस्तदपि च सौधसद्म भङ्क्त्वा
निर्धूय त्रिदशरिपूनवाप स त्वाम् ॥ ८ ॥

तद्वाचा विदितविरोधिवीर्यदर्पः
कृत्वाजावभिमुखमस्त्रमन्त्रजातम् ।
रुद्ध्वाशामुखमखिलं बलैः कपीनां
गत्वा तामरिनगरीममर्दयस्त्वम् ॥ ९ ॥

अद्वारा पुरमविशन्नशङ्कमेके
चत्वारि व्यधिषत गोपुराणि चूर्णम् ।
उद्यानान्यपि भवनान्यभाङ्क्षुरन्ये
त्वद्वाचा कृतबहुविप्लवाः प्लवङ्गाः ॥ १० ॥

विध्वस्तां निजनगरीं निरीक्ष्य रोषा-
दुद्वृत्तारुणनयनेन रावणेन ।
निर्दिष्टा रजनिचराः पुरान्निरीता
निष्पिष्टानकुरुत वानरानसङ्ख्यान् ॥ ११ ॥

सत्कोणप्रहतगभीरभूरिभेरी-
निर्घोषैर्बधिरितदिग्गजेन्द्रमासीत् ।
तत्काले रणमतुलं युगान्तकल्प-
प्रक्षोभं जय जय सङ्गमालयेश ! ॥ १२ ॥

इत्यष्टात्रिंशदशकम् ।

---

७. भीरस्त्यस्येति भीमान् तस्य भावस्तत्त्वं तस्मात् ।

शतांगमातङ्गतुरङ्गपत्तीन्
शतं शतं कोऽपि कपिर्जघान ।
शतं कपीन् कोऽपि निशातशूले
चखान पीनो युधि यातुधानः ॥ १ ॥

निहत्य रक्षांसि कपिप्रवीराः
सहस्रशस्तत्र सदस्त्रशस्त्रे ।
विहस्य चारुह्य रथेभवाहे
व्यधुः स्वसैन्यस्य च चातुरङ्ग्यम् ॥ २ ॥

असृक्पशाखामृगयुद्धरङ्गे
विसृत्वरे पांसुभरान्धकारे ।
अदृक्प्रचारादवशेषु योधे-
ष्वसृक्प्रवाहैररुणैरुदीये ॥ ३ ॥

'कबन्धमूर्ध्वप्रसृतं त्वनन्तं
बबन्ध सद्यःफलमस्मदन्तम् ।
बलीयसां नो हि' बलीमुखौघान्
सलीलमित्यब्रुवताशरौघाः ॥ ४ ॥

बलक्षयेण क्षणदाचरौघा
विपक्षतिर्यग्गतयो बभूवुः ।
गुणक्षतिः स्वामिगता भटानां
घुणक्षतिर्दोषति काननस्य ॥ ५ ॥

---

२. रथेभवाहे कर्मणोऽधिकरणत्वविवक्षया सप्तमी। सेनाङ्गत्वादेकवद्-भावः ।

३. असृक्प्रवाहाः परागं पङ्कयकार्षुरिति भावः ।

४. वानरापेक्षया वयं बलीयांसः । अत एवास्माकं कबन्धान्मूर्ध्वं प्रयान्ति । अस्मदन्तामित्युक्त्या एतावत्पर्यन्तमस्माकं न कदापि लाघवं [illegible]दिति गम्यते ।

५. विपक्षतिर्यग्गतयः पलायनप्रवृत्ता इति यावत् । गुणक्षतिः दोषति दोष इवाचरति । काननस्य वनस्य ।

दिनं नियुध्यापि मृतावशेषाः
पुनर्न दोषा व्यरमन् सरोषाः ।
द्वये भटास्ते विहिताभिलाषा
अये सभूषा दिवि वीक्ष्य योषाः ॥ ६ ॥

मनोरथस्येव रथस्य भङ्गं
महेन्द्रपौत्रादुपलभ्य कुप्यन् ।
तिरोहितात्मा दिवि मेघनादः
शरैर्ननाहाहिमयैर्भवन्तौ ॥ ७ ॥

परैरसंहार्यतमान्महास्त्रात्
परान् परेतानवबुद्ध्य पुत्रात् ।
दुराशयो राक्षसराडपश्यत्
स्मराधिशान्त्यर्थमुपायमेकम् ॥ ८ ॥

रणे शयानोऽथ भवानवैक्षि
धनेशयानेन सहाशरीभिः ।
दशाननोक्त्या जनकेन्द्रपुत्र्या
दशानयावापि च वागतीता ॥ ९ ॥

भ्रमापनीतिप्रवणैः प्रगीता
प्रमाणपूर्वैस्त्रिजटावचोभिः ।
समा न शोकेन ततोऽपनीता
विमानराजेन जिजीव सीता ॥ १० ॥

---

६. दिनं अत्यन्तसंयोगे द्वितीया । दोषा रात्रौ ।

७. महेन्द्रपौत्रादंगदात् ।

८. पुत्रादिन्द्रजितः तत्प्रयुक्तादिति यावत् ।

९. धनेशयानेन पुष्पकविमानेन । अनया जनकेन्द्रपुत्र्या वागतीता दशा अवापि च ।

१०. भ्रमापनीतिप्रवणैः रामो मृत इति भ्रममपनयद्भिरिति भावः । समा सलक्ष्मीः प्रसन्नमुखीति भावः । न शोकेन शोकं विना । ततो युद्धरङ्गात् ।

अथानुगृह्णन् भुजगास्त्रशक्तिं
यथोदधौ तप्त इवावगाढः ।
यथावदैच्छस्तत उत्तरीतुं
स तावदस्मानव सङ्गमेश ॥ ११ ॥

इत्येकोनचत्वारिंशदशकम् ।

अपि पाक्षिकजीवितो भवाः
नथ तार्क्ष्येण सुखेन जीवितः ।
अवलोप्तुमियेष विद्विषं
सबलोद्योगभरः ससोदरः ॥ १ ॥

प्लवगर्षभगर्वगर्जित-
श्रवणोद्भूभयरावणाज्ञया ।
यमशासनतश्च नैर्ऋताः
क्रमशो निर्ययुराहवोत्सुकाः ॥ २ ॥

प्रथमं हनुमानथावधीद्
युधि धूम्राक्षमकम्पनं पुनः ।
वधमाप च वज्रदंष्ट्र-
त्यपरो वालिसुताच्चदन्तरे ॥ ३ ॥

प्रथितो जगति प्रहस्त
इत्यथ नक्तंचरसैन्यनायकः ।
व्यधुनीत बलं वनौकसां
युधि नीलेन च लीलया हतः ॥ ४ ॥

---

११. अनुगृह्णन् कमपि कालमनुसरन्निति भावः । तप्तः शक्तेः ।

१. पाक्षिकं केषांचिन्मते नष्टत्वेन प्रतिभासं जीवितं यस्य सः । सुखेन वस्तुतो जीवितनाशाभावात् ।

४. नीलेनाग्निपुत्रेण वानरसेनापतिना । प्रहस्तो रावणसेनापतिः ।

पृतनापतिनाशदुःखितो-
ऽप्यथ नानामुखमुद्यतीं रुषम् ।
विषवद् द्विषि वर्षितुं स्वयं
दशकण्ठो रणरङ्गमाविशत् ॥ ५ ॥

परिपृष्टविभीषणेरितं
प्रथितप्राभवयुक्तवैभवम् ।
पुरतोऽभिमुखं निरीक्ष्य तं
परितोषाद्भुतरोषभागभूः ॥ ६ ॥

कपिसैन्यविभीषणोद्यतं
कुपितोऽभ्येत्य बिभीषणोऽनमत् ।
'उपयाहि विनीतवत्प्रभुं ,
विफलं चापल'मित्यभाषत ॥ ७ ॥

श्रुतिदग्लवलुब्धमुद्धतं
प्रतिरुध्य प्लवगैः सहाग्रजम् ।
प्रतियोद्धुमना हनूमता
प्रतिषिद्धो न्यवृतद्विभीषणः ॥ ८ ॥

अनिलानलभानुजाजिजां
स निजां ग्लानिमथौजसा जयन् ।
अनुजेन च ते जितोऽसृजद्
व्रणजासृङ्ज्यजशक्तिमप्यहो ॥ ९ ॥

---

६. परिपृष्टेन विभीषणेन ईरितं इदन्तया सपरिवारं निर्दिश्य प्रदर्शित-मिति यावत् ।

७. प्रभुं श्रीरामम् ।

८. श्रुतिदृशोर्लवे छेदे लुब्धम् । परैरुक्तं हितं न शृण्वन्तं स्वयं हितमपश्यन्तं च । तत्र हेतुरुद्धतमिति ।

९. व्रणजासृञ्जि व्रणप्रसृतरक्तानि शक्तिं लक्ष्मणं प्रति ।

स खलो भवताथ योधितो
मुखलग्नेषदमर्षमञ्जसा ।
विफलाखिलसाधनो ययौ
सुखलब्ध्यै भव सङ्गमेश मे ! ॥ १० ॥

इति चत्वारिंशदशकम् ।

त्वद्बाणेभ्यः स बिभ्यत्त्वरितमवरजं बोधयन् कुम्भकर्णं
तद्बाहुच्छाययान्तर्द्दवथुभपशमय्यास्त पुत्रेण सार्धम् ।
कल्पान्तोभिद्रुद्रप्रतिभटवपुषा शूलिना तेन तेने
दुर्बाधा या कपीनामशनिरजनि सा पादपानां तपान्ते ॥ १ ॥

पत्ये शाखामृगाणां प्रहितमभिपतत्प्रेक्ष्य रूक्षं स शूलं
मध्ये गृह्णन् हनूमानहिमिव गरुडो निर्बभञ्जेक्षुभञ्जम् ।
क्षिप्त्वाद्रेः सोऽथ शृङ्गं क्षितिपतितमुपादाय सुग्रीवमुग्रः
प्रत्यावृत्तेन तेन स्वसृमुखविकृतिं लम्भितः कुम्भकर्णः ॥ २ ॥

कीशक्रीडाद्रिमूर्तिर्निजरुधिरसुराक्षीबधीः स्वान् परान् वा
नीचः खादन् निकृत्ते युधि करचरणे निष्पतन्नुत्पतंश्च ।
आशु 'स्वप्नग्लथायं कथमपि गुरुणा बोधितोऽत्र स्वपात्वि'-
त्योजस्वी त्वच्छरस्तं युधि विधिवदथासूषुपत् दीर्घदीर्घम् ॥

---

१०. ययौ स्वपुरीमेव ।

१. पादपानामशनिस्तत्तुल्येति यावत् ।

२. इक्षुभञ्जं इक्षुमिवानायासेन । स्वसृमुखविकृतिं कर्णनासाछेदमिति यावत् ।

३. असूषुपत् स्वापितवान् ।

।

। ४ ॥

वैवश्यं प्रापयत् को व्यवसितमनसां व्याजमार्गे विवेकः? ॥ ५ ॥

आपन्नौ जाम्बवत्प्रेषितहनुमदुपानीतदिव्यौषधाद्रा-
वासन्नेतान्निलीनौषधिमहिमधुतालस्यमुत्तिष्ठमानौ ।
चैतन्यं प्राप्य पूर्वाधिकमहितपुरीमग्निसात्कृत्य रात्रौ
बाधं नानाविधं चक्रथुररिपुरुषालोलसालातसैन्यौ ॥ ६ ॥

कुम्भे सुग्रीवभग्ने हनुमति च निकुम्भद्विषि त्वं व्यहिंसीः
पुत्रं शत्रोः खरस्याहितकपटरणं, रावणिस्त्वां जिघांसुः ।
मायासीतामहिंसीत् पवनसुतपुरः सोऽभिचारं विधित्सु-
*स्त्यक्ष्यन्मन्युश्च सज्जेन हि सह सहजेनामुचश्चाञ्जनेयम् ॥ ७ ॥

---

४. पितृव्येण कुम्भकर्णेन प्रयातम् ।

६. बाधशब्दस्य स्त्रीत्वं पुंस्त्वं चानुमते एव ।

७. त्यक्ष्यन् नश्यन्निति यावत् मन्युरभिचारकर्तृत्वेन तादृशः सन् सहजेन लक्ष्मणेन सह आञ्जनेयं हनुमन्तं विभीषणस्याप्युपलक्षणमेतत् । अमुचः क्रतुविघाताय प्रेषितवान् ।

---

* 'तं जं मन्युं च' इति पाठभेदः.

पौलस्त्यावेदिताध्वा प्लवगकळकळैर्भाययन्नाशरौघान्
बाहीकृत्याञ्जनेयं विहतिमुपनयन् कर्म नैकुम्भिलं सः ।
निन्दन्तं स्वं पितृव्यं निजकपटविदं राजयुध्वानमेनं
भिन्दन्तं कीशवृन्दं वलरिपुजयिनं प्रत्यरुन्धानुजस्ते ॥ ८ ॥

अस्त्रप्रत्यस्त्रवित्रासितखचरसुरव्रातमुन्मुक्तचित्तो
युद्ध्वा नक्तन्दिवं तं द्विरथ विरथमाधाय युत्सौत्यदक्षम् ।
सुत्रामास्त्रेण हत्वा त्रिदिवसविगमे मेघनादं सुमित्रा-
पुत्रः प्रत्यागतस्त्वरसविधमनुचरैश्चामरैश्चेड्यमानः ॥ ९ ॥

नत्वा साष्टांगपातं शयितमनुशयी पीवराभ्यां भुजाभ्या-
मुत्थाप्याश्लिष्य गाढं स्रवदसृगुरसं सोदरं सादरं तम् ।
कृत्वाङ्के मूर्ध्नि जिघ्रन् दशमुखजवधादार्जितागण्यपुण्यं
स्मृत्वा स्वं ज्योतिरास्थाः जय जय भगवन्! सङ्गमग्रामनाथ! ॥

इत्येकचत्वारिंशद्दशकम् ।

योऽवापि शूर्पणखया निजचेतसा च
यो वापि पापविषपादपपाकरूपः ।
दैवाद्दशाननमनोरथमुन्नतं तं
दावाभिपत्तिरशनिर्नु तदा ददाह ॥ १ ॥

---

८. पौलस्त्यो विभीषणः । कर्माभिचारहोमम् । राज्ञा युध्यतीति राजयुध्वा । ते अनुजः लक्ष्मणः ।

९. द्विर्द्विवारं विरथं नष्टरथं आधाय कृत्वा । युधि सौत्ये सूतकर्मणि च दक्षम् । सूते निहते सौत्यं युद्धं च स्वयमिन्द्रजिदकरोदिति प्रसिद्धम् । ईड्यमानः स्तूयमानः ।

१०. स्वं ज्योतिर्वैष्णवं तेजः स्मृत्वा ।

१. अवापि उप्तः । शूर्पणखया आपि प्राप्तः । ददाह रामं हन्तास्मीति दशाननमनोरथो मूलतो भग्न इत्यर्थः ।

MANUSCRIPTS NOTICES AND STUDIES

VI

VEDĀNTARATNAMĀLĀ OF DEVANĀRĀYAṆA

BY

S. VENKITASUBRAMONIA IYER

Several works are known by the name *Vedāntaratna-mālā*, as for instance: (1) a commentary on the *Śārīraka-sūtras* from the Viśiṣṭādvaitic point of view by Śrīnivāsa-dāsa[1], (2) a work on the Nimbārka school of Vedānta by Anantabhaṭṭa[2], (3) a commentary on the *Dakṣiṇā-mūrtistotra*[3], and (4) a commentary on the first śloka of *Śrīmadbhāgavata* by Devanārāyaṇa. The present account is about the last work.

There are two manuscripts of this work in this Library, both palm-leaf and in Malayalam script, No. 607 of the Curator's collections and No. 11089 of the University collections, and both procured from Sri Mitran Namputiri, Chempakasseri matom, Kutamaloor, Kottayam, a descendant of the author of the work. The first is noticed in the Descriptive Catalogue of Sanskrit Manuscripts in the Curator's Office Library, Vol. III. p. 825, and this is a well-preserved manuscript. The other is older but slightly damaged. The work comprises about 2700 *granthas*, and both manuscripts contain an Appendix giving the principal statements in the text.

The work commences with the following verses :

अविघ्नायाद्यविघ्नाय नमस्कुर्वे परात्मने ।
अशुभापहंगात्राय शुभावहनिजाङ्घ्रये ॥

1. Ms. Madras, R. 3831.
2. CC. II. 127.
3. *ibid*, I. 606.

यन्मायाकार्यधीवृत्तिरूपिणी वरदा नृणाम् ।
वाणी परात्परा विद्या तां वन्दे निखिलात्मिकाम् ॥

नीलकण्ठाभिधांस्तद्वन्नारायणसमाह्वयान् ।
अन्यांश्च कृष्णकलया सम्भूतान् नौमि देशिकान् ॥

यद्रोत्रजो यत्प्रसादाद् वेदान्तानां प्रकाशकम् ।
कुर्वे शास्त्रप्लवं भक्त्या तं व्यासं नौमि चक्रिणम् ॥

देवनारायणप्राप्यं देवनारायणाश्रयम् ।
देवनारायणकृतं देवनारायणाभिधम् ॥

वेदान्तरत्नापरनामधेयं कालाहिकाकोलविनाशहेतुम् ।
शृण्वन्तु जीवा विवशा नितान्तं सञ्चिन्त्य सञ्चिन्त्य भवाब्धिखेदम् ॥

वेदान्तरत्नमालेति चाख्यातं विश्वमुक्तिदम् ।
वेदान्तवाक्यरत्नौघैर्निर्मितं कृष्णभक्तिदम् ॥

जीवाभयप्रदाने दक्षं ह्येतद् विमुक्तिदं जगताम् ।
स्मरतां गृणतां नित्यं निशमयतां बल्लवीसुतैकरसम् ॥

श्रीमद्भागवतश्लोके प्रथमे योज्यतेऽधुना ।
वेदान्तरत्नमालेयं तत्परस्मृतिभिः सह ॥

From these verses we are able to know that this *Vedānta-ratnamālā* was written by Devanārāyaṇa, that the work is also known as *Devanārāyaṇa*, that it is a commentary on the first śloka of *Śrīmadbhāgavata* from the Advaitic point of view and that in it are profusely interspersed *vedānta-vākyas*.

Devanārāyaṇa was the hereditary name of the rulers of Cempakaśśeri, modern Ampalapuzha, a principality which was annexed to Travancore about the middle of the 18th century A. D., by Maharaja Martanda Varma And Devanārāyaṇa, the author of the present work, seems to be identical with the king at whose instance Melputtar

Nārāyaṇa Bhaṭṭatiri wrote his *Prakriyāsarvasva*, for Bhaṭṭatiri speaks of him in that work as a profound scholar well-versed in the Vedas and Śāstras and arts and letters, as a supreme devotee of Lord Kṛṣṇa disinterested in everything else, and as one who received the highest *upadeśa* from a great sage of Brindavana in the same manner as Dhruva from Nārada. *Cf*:

तिष्ठत्येवानिलोऽपि प्रचरति गिरिरप्याज्ञया यस्य राज्ये
शत्रोः सर्वाभिसारे सति रचयति यस्तस्य सर्वापहारम् ।
सोऽयं निश्शेषशास्त्रश्रुतिनिवहकलानाटकेष्वद्वितीयो
भाति श्रीदेवनारायणधरणिपतिर्मग्नचेता मुकुन्दे ॥

यो वृन्दावनवासिनो नियमिनः साक्षात्कृताधोक्षजाद्
दुष्प्रापं खलु नारदाद् ध्रुव इव प्रापोपदेशं परम् ।
यस्यापास्तसमस्तवस्तुकुतुकं कृष्णावलोकोत्सव-
क्रीडाकौतुकि मानसं विजयते सोऽयं महात्मा नृपः ॥

There are also references to the saintliness of this king in his *Devanārāyaṇapraśasti*[4]. These qualities well apply to the author of *Vedāntaratnamālā* and so the identification is quite possible. He can, therefore, be taken to be a contemporary of Bhaṭṭatiri and assigned to the latter half of the sixteenth and early part of the seventeenth centuries of the Christian Era. We may also notice that the Chempakasseri matom at Kudamaloor is the family of the descendants of the Devanārāyaṇas, and so the present manuscripts of *Vedāntaratnamālā* have the special significance that they belong to the author's own family.

It is also quite likely that of the two *gurus*, Nārāyaṇa and Nīlakaṇṭha, referred to in the introductory verse नीलकण्ठाभिधान् etc., Nārāyaṇa is Bhaṭṭatiri himself, he being one of the greatest Bhāgavatas known to Kerala. The indentity of Nīlakaṇṭha is not known. The view that he may be the same as the Nīlakaṇṭha Dīkṣita, the author of *Prakriyā*-

4. Vide TSS. 153, *Prakriyāsarvasva*, Part III, Introduction, p. xvi.

sarvasvavyākhyā[5], does not appear sound, since we know the date of this Nīlakaṇṭha Dīkṣita to be the 18th century A. D.[6]

The text proper of the work is the following:

जन्माद्यस्य यतोऽन्वयादितरतश्चार्थेष्वभिज्ञः स्वराट्
तेने ब्रह्म हृदा य आदिकवये मुह्यन्ति यत्सूरयः ।
तेजोवारिमृदां यथा विनिमयो यत्र त्रिसर्गो मृषा
धाम्ना स्वेन सदा निरस्तकुहकं सत्यं परं धीमहि ॥

श्रीकृष्णाभिधं तं परमानन्दचिद्घनं भूमानं परमात्मानं धीमहि । नित्यशुद्धपूर्णबोधानन्दनिरतिशयनिरञ्जनकेवलसुमङ्गलाद्वितीयानन्दाविक्रियस्य स्वतस्सतः असद्विक्रियामयमायाज्ञानविज्ञानविज्ञेयमयपञ्चमहाभूतब्रह्मविष्णुरुद्रादिसर्वजगतस्तस्मिन्नेव चिद्घने आत्यन्तिकलयो भूयादित्यर्थः । ब्रह्मविष्णुरुद्रादीति अस्वातन्त्र्योत्पादकजडशक्तिबद्धसुपुण्यपुञ्जभगवद्भक्तियुक्तजीवहेतुकप्रसादोन्मुखसुस्वातन्त्र्यात्मकचिच्छक्तिमयब्रह्मविष्णुरुद्रादिदेहादिविषयोत्पत्तिर्हि । समूलाज्ञानविज्ञाने स्वस्मिन् परस्मिन् लीने सति स्वयं जीवः स्वराट् भवति । परो भवति, कुतः, परः स्वराट् खलु । पर एव जीवः । जीवो नामान्तःकरणरूपः । अन्तःकरणं नाम महदाकाशादिभेदप्रपञ्चरूपं मायाकार्यम् । 'स ऐक्षत' इतीक्षामात्रं माया । ईक्षा नाम सङ्कल्पः, तत्कार्यमज्ञानं, तत्कार्यं महदाकाशादिविज्ञातृविज्ञेयरूपमद्भुतं वस्तु । आत्मैव भेदप्रपञ्चः, यद्वद् घटपटौ मृत्तन्तू । महदहंमानादौ च वियन्मरुदादौ च एकरूपेणावस्थित आत्मा । स्ववक्षसि स्पृशन् 'मम मनः सचेतनं, द्रष्टृत्वाद्, इन्द्रियपञ्चकावगम्यं पुरोवर्ति वस्त्वचेतनमेव, दृश्यत्वात्' इति यो वदति स पामर एव विज्ञातृविज्ञेययोरभेदेन स्थित एवात्मा । परस्मिन् परमसति परमचिति परमानन्दे करुणासिन्धौ चिच्छक्तिमाश्रित्य ध्यानविषयत्वमवतीर्णे मन्दस्मितसुन्दरानने मनोनयननन्दने नन्दनन्दने ध्याते सति सर्वोत्पत्तिकरसर्वकर्मतद्वासनारूपं त्रिगुणं मनः समूलं स्वात्मनि परमानन्दसच्चिद्घने लीयते । सतैलवर्तिविक्रियावज्ज्योतिः स्वाश्रयं समूलं दग्ध्वा स्वस्मिन्नविक्रियेऽग्नौ प्रलीनं

5. *Sāhityapariṣad Traimāsikam*, Vol. XIII., p. 12.

6. Vide, Vol. III. Nos. 2—3 of this Journal, 'Manuscripts Notices and Studies', p. 4.

विभुत्वं यथा गच्छेत् तथा सकर्मवासनामयतैलवर्ति ध्येयरूपेणावतीर्ण-श्रीकृष्णरूपं मनोज्योतिः स्वाश्रयं निरवशेषं दग्ध्वा परस्मिन् विभौ ब्रह्माग्नौ लीयेत। श्रीकृष्णरूपं मन इति यद्यच्चिन्तितं तत्तदाकारं मनो हि। मनो नामात्मतः प्रतिक्षणमुत्पत्तिनाशवत्, प्रदीपवत्। दीपो नाम वर्त्याश्रितामितः प्रतिक्षणमुत्पत्तिनाशवान्। प्रादेशमात्रोऽयं दीप इति ज्ञानं कुत इति उत्पत्ति-सातत्यादलातचक्रवत् प्रादेशमात्रत्वम्। प्रादेशमात्रत्वमिति परिमितत्वं कुत इति प्रतिक्षणं नाशतो हि प्रारब्धकर्मवासनामयवर्त्याश्रिताग्नेः तत्तदाकारविषयानु-रूपसुखदुःखमोहरूपनीलपीतधवलश्यामरक्तमनोदीपोत्पत्तिः। भगवद्ध्यानयुक्तं मनः समूलस्य स्वस्य भूम्नि भगवति विलयकृत् स्यात्। जन्मत आरभ्य आचरमश्वासं ये ये काललवाः तेष्वेकः काललवः उत्कृष्टनिकृष्टोच्चावचमायाकार्येषु एकचिन्तायुक्तः अपरिमितजन्मकृत् स्यात्। आमरणं चेत् किं पुनः। यस्मिन् जन्मनि यो वा काललवो भगवद्ध्यानयुक्तः सोऽपरिमितकर्मतद्वासनावदपरिमित-जन्मविनाशकृत् स्यात्। अनन्तः परमात्मा। जीवः पर एव। ततो जीवोऽप्यनन्तः। परमात्मा जीवो भूत्वान्तःकरणबहिःकरणविषयाभिमानी भूत्वा यद्वा कर्म कृतवानित्यभिमानी स्यादनन्तकृतं कर्मानन्तं स्यात्। अनन्तकर्मनाशः अनन्त-ध्यानेनैव भवति। यस्मिन् क्षणेऽनन्तो ध्यातो भवति तदुत्तरक्षणे तदन्यचिन्त-नमपरिमितकर्मजन्मोत्पत्तिकृत् भवेत्। चरमश्वासकालेऽनन्तचिन्तनमपरिमित-कर्मतद्वासनाजन्मात्यन्तप्रलयकृद् भगवत्यात्मनि स्यात्। अस्य भेदप्रपञ्चस्य जन्मादिसृष्टिस्थितिसंहाररूपं विक्रियावन्मायाकार्यं यतो यस्मिन् आनन्दाब्धौ आत्मनि भवति, अन्वयात् संहारक्रमतो दृश्ये द्रष्टरि लीनेऽस्मिन् अज्ञा-नाब्धौ ततः परे काठिन्ये सर्पिषो यद्वद् द्रवरूपेण तथा भवेत्। इतरतश्च सृष्टिक्रमतः आत्ममायाकृताज्ञानजन्यं द्विविधमेव हि विज्ञातृज्ञेयरूपेण मह-द्विष्णुपदादिकम्। यथा स्वप्नप्रपञ्चः, स्वप्नप्रपञ्चस्य उपादाननिमित्तवृन्दकारणं स्वयमेव यथा तथा जाग्रत्प्रपञ्चस्यापि। अर्थेषु मायाकार्येषु अभिज्ञः आत्य-न्तिकज्ञप्तिस्वरूपः। पुरुषदर्शने स्थाणुरयमिति निश्चिन्वानस्यैव स्थाणुभ्रमः पुरुषस्य पुरुषो नास्मीत्यनुभवाभावात् पुरुषत्वमेव यथा तथा आत्मनि दृशि-द्रष्टृदृश्यदर्शनबुद्धिः। अहंमानरूपे आत्मनि पुरुषे अहंमानरूपस्याणुत्वाव-गतिरहंमानस्यैव। आत्मनस्तु ज्ञातृज्ञानज्ञेयेष्वभेदेन ज्ञप्तिमात्रत्वमेव। तेने ब्रह्म हृदा य आदिकवय इति। आदिकवये समष्टिजीवाय। समष्टिजीवो नाम

जीवनिकायाभिमानी । जीवनिकायामभिमानी नाम चैतन्यरूपः स्थूलसूक्ष्मपरजाग्रत्स्वप्नसुषुप्त्यादिविग्रहः । हृदा हृन्नाम अनादिजन्मकर्मतद्वासनारूपान्तःकरणबहिःकरणविषयाकारम् । ईदृक्स्वरूपेण हृदा सह यो जीवनिकायाभिमानिने ब्रह्म तेने अपारवेदार्णवात्यन्तानुस्मरणशक्तिं कृतवानित्यर्थः । अपारत्वं कथमिति 'अनन्ता वै वेदाः' इति श्रुतेः । वेदो नाम कर्मदेवताब्रह्मकाण्डमयः । कर्मकाण्डस्तु त्रिगुणात्मकतः उत्तममध्यमाधमभेदेन त्रिविधः । उत्तमादिष्वप्यानन्त्यं स्यात् । देवताकाण्डोऽपि प्रायेण कर्ममयः त्रिगुणतस्त्रिविधोऽनन्तश्च । जीवानामप्यानन्त्यं स्यात् 'पादोऽस्य विश्वा भूतानि' इति श्रुतेः । अनन्तस्य पादस्याप्यानन्त्यतः अनन्तजीवश्रुतिविचित्रकर्मतल्लोकगतागतवैचित्र्यानन्त्यमवाङ्मनसगोचरमद्भुताद्भुतं स्यात् । ब्रह्मकाण्ड एव सत्यपरः क्षेमङ्करश्च, नेतरौ । मुह्यन्ति यत्सूरयः । सूरयः समष्टिव्यष्टिजीवस्थूलसूक्ष्मशरीरावयवाभिमानिनो देवाः । मुह्यन्ति अभिमानं कुर्वन्ति । यद्यतो हृदो हेतोः अन्तःकरणाद्यन्तःकरणादिमन्त इत्यर्थः । यत्र त्रिसर्गः त्रिसर्गो नाम आत्मनि दुर्घटमायातत्कार्यसुषुप्तिस्वप्नजाग्रत्सर्गः । आत्मरूपस्वार्द्रघृतमायात्वशीतस्पर्शसुकठिनखण्डत्रितयास्निग्धेपात्स्निग्धसुस्निग्धाप्रतिबिम्बेपत्प्रतिबिम्बसुप्रतिबिम्बोचितरूपविलीनसर्वेषत्प्रतिबिम्बितसुप्रतिबिम्बितविषयानुस्यूतार्द्रतारूपः । मायात्वशीतस्पर्शसुकठिनात्मघृतार्द्रीकरणसुविदग्धभगवत्कथाश्रवणादिजन्मनः शुद्धिजभगवद्ध्यानजतीव्रभक्तिनिभृतोष्मस्पर्शैकैवस्यार्द्रताप्तिः । अनादिबन्धकमायातत्कार्यानादिबद्धजीवस्वाज्ञानकारणमायातत्कार्यानादिबद्धजीवस्वाज्ञानकारणमाया तत्कार्यस्वात्मलयस्वानन्तपूर्णबोधसच्चिदानन्दमयत्वं स्यात् । अतस्त्रिसर्गश्च त्रिसर्गविनिमयश्च तेजोवारिमृदश्च तेजोवारिमृदां विनिमयश्च यत्र मृषा कारणापेक्षया कार्यं यथा विनिमयः अन्योन्यसम्मेलनम् । धाम्ना स्वेन सदा निरस्तकुहकं सत्यस्वरूपाधिष्ठानात्मना निरस्तासत्यस्वरूपाधिष्ठेयं यद्वा सत्यं परं धीमहि प्रत्यगात्मानं परं धीमहि सर्वाधिष्ठानरूपः प्रत्यगात्मा विलीनमायातत्कार्याधिष्ठेयः पर एवापादानसापेक्षपरत्वस्यापि अविषयत्वतः आत्मैव ॥

Every word in the commentary is substantiated with profuse quotations from the Vedas, Upaniṣads and Puraṇas, and these constitute the main bulk of the work. It is a very learned treatise and bespeaks the author's extensive knowledge of Vedantic lore.

MAHĀBHĀRATA MANUSCRIPTS IN THE TRAVANCORE UNIVERSITY COLLECTION

By

P. K. NARAYANA PILLAI

[In continuation of the description of Manuscripts pertaining to the Ādi and Sabhā Parvans described in the Bulletin of the Deccan College Research Institute, Poona, Vol. V. (Sukthankar Memorial Volume) pp. 35—54.]

Vana Parvan — Complete Manuscripts

40—41. Nos. 1240—41. Begins with *Evam dyūtajitāḥ* etc. (3. 1. 1.) after the benediction *hari-śrī-gaṇapataye namaḥ, avighnamastu.* Both the manuscripts together contain the whole of Vana. The manuscript No. 1241 ends with 3. 315. 29. Malayalam characters; palm-leaf— $14\frac{3}{4}'' \times 2''$; folios-322 (175 in 1240 and 147 in 1241) excluding blank folios and those containing other matter; lines—10; letters—60.

Nos. 1240 and 1241 together form a complete Ms. of Vana, copied by the same hand. For the sake of convenient handling the Ms. is kept in two parts. Both the codices are in good condition. In 1240 folio 110 is missing. The writing is excellent, legible and uniform. A very few corrections of spelling mistakes are seen in 1241 (see folios 45, 47). The folios are numbered by *akṣaras.* Eventhough the codex No. 1241 is the continuation of codex 1240 the serial number of the folios of the former is not continued in the latter. In this

Ms. there are 302 chapters parallel to 315 in the Kumbhakonam edition. Colophons are generally long and mention the name of work, parvan, upaparvan, upākhyāna and the name and number of the adhyāyas.

A folio at the end of No. 1241 contains some matter connected with medicine; after this appear six more folios which partly contain the commentary on the *ekādaśaskandha* in *Bhāgavata*.

The Ms. belongs to Kūṭallūr illam in Malabar and was copied by one Vāsudevan.

42. No. 6929. Begins with 3. 1. 1. (*evam dyūtajitāḥ* etc.) after the benediction *śrīgaṇeśāya namaḥ*, and extends up to the end of Vana (4. 1. 50). Devanāgari characters; Indian paper—13" × 5¼"; folios—384; lines—12; letters—32—40

The Ms. looks very old. Folios 177, 223—37 are missing. The sides are worn out. The white colour of the paper has faded much and many folios have assumed a bad colour due to dirt. The writing has also faded considerably. The margin in some folios is painted with yellow pigment (see folios 202—211). Four different styles of writing can be distinguished in the Ms. Yellow pigment is applied to the mistaken portions and the mistakes are corrected either in the Ms. itself or on the margin. The Ms. is thus corrected from the beginning to the end. The margin of fol. 26 is used to complete the first chapter and to write the first half of the first verse in the second chapter. The first two folios are not written by the hand that wrote the continuation; probably the original first two folios were lost and were substituted by new ones on a later occasion. Additions are made on the margin of a good number of folios. Red pigment is applied to the fragments like *Vaiśampāyana uvāca* and colophons.

The pagination is confused to a certain extent. No. 53 is given to three folios. Folios 221 and 222 are not numbered. The colophons give only the name of parvan and upākhyāna.

The Ms. includes in Vana the first chapter of Virāṭa also.

43. No. 10137 C. Begins with 3. 1. 1. after the benediction *Nārāyaṇam namaskṛtya* etc., and extends up to the end of Vana (4. 1. 50). Devanāgari characters; Indian paper— 15½″ × 6½″; folios — 460; lines – 12; letters—48. Date — Saṁvat 1840 (A. D. 1783)

The MS. is in good condition. The writing is fair and legible. End of every hemistich is marked by two vertical lines in red ink. A few folios here and there are painted lightly with an yellow pigment. The margin is also occasionally used to complete certain portions. On the left hand margin is written *va* or *bhā*. *va*. *ṭī*. Bhāratam vanaparva ṭīkā) Folios are numbered correctly. Verses are also numbered.

The colophons usually read *ityāraṇyake 110* etc.; rarely the upākhyāna is also mentioned in the colophons.

According to the MS. the first chapter in Virāṭa also belongs to Vana. (See MS. No. 6929).

Ms. there are 302 chapters parallel to 315 in the Kumbhakonam edition. Colophons are generally long and mention the name of work, parvan, upaparvan, upākhyāna and the name and number of the adhyāyas.

A folio at the end of No. 1241 contains some matter connected with medicine; after this appear six more folios which partly contain the commentary on the *ekādaśaskandha* in *Bhāgavata*.

The Ms. belongs to Kūṭallūr illam in Malabar and was copied by one Vāsudevan.

42. No. 6929. Begins with 3. 1. 1. (*evam dyūtajitāḥ* etc.) after the benediction *śrīgaṇeśāya namaḥ*, and extends up to the end of Vana (4. 1. 50). Devanāgari characters; Indian paper—13" × 5¾"; folios—384; lines—12; letters—32—40

The Ms. looks very old. Folios 177, 223—37 are missing. The sides are worn out. The white colour of the paper has faded much and many folios have assumed a bad colour due to dirt. The writing has also faded considerably. The margin in some folios is painted with yellow pigment (see folios 202—211). Four different styles of writing can be distinguished in the Ms. Yellow pigment is applied to the mistaken portions and the mistakes are corrected either in the Ms. itself or on the margin. The Ms. is thus corrected from the beginning to the end. The margin of fol. 26 is used to complete the first chapter and to write the first half of the first verse in the second chapter. The first two folios are not written by the hand that wrote the continuation; probably the original first two folios were lost and were substituted by new ones on a later occasion. Additions are made on the margin of a good number of folios. Red pigment is applied to the fragments like *Vaiśampāyana uvāca* and colophons.

The pagination is confused to a certain extent. No. 53 is given to three folios. Folios 221 and 222 are not numbered. The colophons give only the name of parvan and upākhyāna.

The Ms. includes in Vana the first chapter of Virāṭa also.

43. No. 10137 C. Begins with 3. 1. 1. after the benediction *Nārāyaṇam namaskṛtya* etc., and extends up to the end of Vana (4. 1. 50). Devanāgari characters; Indian paper— 15¼" × 6½"; folios — 460; lines – 12; letters—48. Date — Saṁvat 1840 (A. D. 1783)

The MS. is in good condition. The writing is fair and legible. End of every hemistich is marked by two vertical lines in red ink. A few folios here and there are painted lightly with an yellow pigment. The margin is also occasionally used to complete certain portions. On the left hand margin is written *ra* or *bhā. va. ṭī.* Bhāratam vanaparva ṭīkā) Folios are numbered correctly. Verses are also numbered.

The colophons usually read *ityāraṇyake 110* etc.; rarely the upākhyāna is also mentioned in the colophons.

According to the MS. the first chapter in Virāṭa also belongs to Vana. (See MS. No. 6929).

Extracts from a Radio talk on

"RAW MATERIAL OF HISTORY"

BY

SIR MAURICE GWYER.

* * * * *

For the very early history of India we have to rely on the archaeologists ; and, valuable as their work has been, they themselves will tell you that they are only at the beginning of their task. But for the later periods, written records of all kinds are the raw material of the historian. Many of these are public records, in public custody ; but there is also a great wealth of material to be found in the letters and memoranda of private individuals, and in local records. The keeping even of public records has often left much to be desired, but until the establishment of the Indian Historical Records Commission, there was no organization of any kind covering the whole of India which interested itself in the preservation of private manuscripts. The Commission was set up in 1919 and its contribution towards the creation of public interest in historical records and the stimulation of research has been very substantial. Nevertheless, there are still many provinces which have no organized record offices ; and even where these exist they often provide no facilities for research scholars by means of reference books, calendars and indexes. But one of the main objects of the Commission was to organize a survey of records of all kinds with a view to rescuing valuable manuscript records in private custody from the ravages of time, of insect pests and other destructive agencies, including, it must be admitted, man himself.

In 1942, the Commission was reconstituted and at its meeting in that year in Mysore it decided that regular

machinery should be set up throughout the whole of India for the purpose of salvaging documents in private custody. The World War was raging at the time and money was difficult to find for purposes more appropriate to times of peace. Hence no Provincial Government, except in the Punjab, found itself able to act on the recommendations of the Commission. The Commission, however, taking into consideration the great urgency of the matter and especially the dangers arising from the demand for old documents for pulping and re-making into paper, decided to set up temporary Committees to carry on the work until the Provincial Governments found themselves able to take over the responsibility at a later date.

The written records of every country, whether they are in public or private hands form part of that country's national heritage. I do not suppose there is any country in the world where such records have not at some period or other been in danger of loss or destruction through ignorance or neglect; but as appreciation of their importance grows and people become more and more interested in their own history, organizations like the Indian Historical Records Commission have been set up in most civilized communities and for the same purposes.

The growth of a school of modern Indian historians has been remarkable, and comprehensive schemes for the writing of Indian history through the combined efforts of groups of historians are now being undertaken. But no historian can write true history unless the original materials are available and unless he knows where to put his hand upon them. There are ancient and aristocratic families in India, as everywhere else, who have preserved valuable collections of important documents from generation to generation. Too often, however, these have been found by the Commission to be ill-kept and ill-cared for, sometimes only preserved in

wooden boxes, sometimes merely tied into bundles and wrapped in cloth. It is to be feared that many documents have been lost or irretrievably damaged in the course of years; but many could still be rejuvenated by the application of modern scientific processes. The havoc wrought by white-ants is familiar to all of us, but it is not so generally known that some insects which make their home among ancient manuscripts are not even visible to the naked eye and can only be detected by a microscope. Insect-life is indeed responsible for much destruction, nor has any race of insects yet been discovered which knows how to distinguish between a valuable manuscript and a worthless one. It is a not uncommon practice among some more prudent owners of manuscripts to put *neem* leaves between the sheets of paper; I am told that the research laboratory of the Imperial Record Office has satisfied itself that the insecticide properties of highly concentrated *neem* extract are quite effective as is commonly believed. But it is not only living creatures which can destroy a manuscript. The direct rays of the sun have been found to be as injurious as inundation by water. Humidity promotes the growth of mildew and various types of fungus. The alternate absorption of moisture during the monsoon and its drying over during the cold weather causes brittleness and a steady deterioration of paper. In parts of India, where the climate is very dry, paper requires to be humidified at intervals; and where humidity is so great as to produce mildew and fungus, fumigation from time to time is required. In great cities there is the further danger of acids and gases present in the atmosphere.

In times past many valuable manuscripts of all kinds have been exported to foreign countries, because no legislation existed which would enable them to be preserved in the land of their origin; and it must be regretfully admitted that very often they have been far better looked after in their new than in their old homes. With the growth of the

national consciousness, and one might also add, the national conscience in such matters, it is to be hoped that all measures taken by governments in India, both Central and Provincial, for the preservation and protection of these national treasures will receive an ever-increasing support from Indian citizens of every class and community.

There is a great deal of romance about collections of old manuscripts, and there must be many collections in India, as in other lands, in which a researcher can never be certain that he may not come unexpectedly upon some hidden treasure beyond all price. Let me give one or two examples of what I mean from other countries. At the beginning of the last century, a German scholar discovered in the Vatican library in Rome a manuscript of the Institutes of Gaius, a famous work on Roman Law of the classical period, of which no copy had ever before come to light. About fifty years ago, near the site of the old Greek town of Oxyrrhynchus in Upper Egypt buried heaps of town rubbish were discovered and, preserved for fifteen hundred years by the dryness of the sand, were found to contain, among much of course which was quite worthless, very important and hitherto unknown fragments of classical Greek authors ; and also what might be described as the contents of numerous waste-paper baskets, including household bills and accounts, letters exchanged between friends, even invitations to dinner, in short, material from which an extra-ordinarily vivid picture could be constructed of the domestic life and habits of the people of that particular region. And only last spring, in a private library in the north of England a volume was discovered containing pirated copies of nine of Shakespeare's plays, all published during his lifetime, of which no other copy was known to exist in England, though I believe that there is one in the United States. This of course was the case of a book, not a manuscript ; but it shows how a rarity of great value (it has been sold for Rs. 15,000) can lie hidden and unsuspected for centuries in private ownership.

Why should not similar discoveries be made in India also? The scholar and the archivisit will always pray that such miracles will one day happen to him; and I think that it was the late Mr. G K. Chesterton who once observed that the most remarkable thing about miracles is that they do sometimes happen.

I venture, therefore, as the Vice-Chancellor of a University and numbering scholars and historians among my friends not only in Delhi, but in other Universities also, to invite the attention of the public to the problems which arise in connection with preservation of documents in private custody. I am perfectly certain that this generation will never be forgiven by the generations which come after, if all these valuable national treasures are allowed to be lost or damaged beyond repair by neglect or indifference.

* * * * *

(*From The Indian Archives, Vol. I, No. 2*).

Licence No. 444 dated 26-4-1945.

VOL. IV, NO. 2 JULY 1948

JOURNAL


OF THE

TRAVANCORE UNIVERSITY

ORIENTAL MANUSCRIPTS

LIBRARY

TRIVANDRUM



[Annual Subscription Rs. 4]

TRIVANDRUM :
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1948

CONTENTS

॥ श्रीः ॥

रामपाणिवादविरचितः

विष्णुविलासः

विष्णुप्रियाख्यव्याख्यासनाथः ॥

प्रथमः सर्गः ।

चकास्ति चूर्णीसरितस्तटे शुभे
  निकेतनं यस्य जयन्तमङ्गलम् ।
सनातनश्चेतसि नः प्रकाशतां
  स नारसिंहं वपुरास्थितो हरिः ॥ १ ॥

श्रीमद्विष्णुविलासाख्यकाव्यस्यानतिविस्तरम् ।
इदं विष्णुप्रियानाम व्याख्यानं लिख्यते मया ॥

चकास्तीति । चूर्णीसरितः शुभे तटे यस्य जयन्तमङ्गलं निकेतनं चकास्ति, नारसिंहं वपुः आस्थितः सनातनः स हरिः नः चेतसि प्रकाशताम् इत्यन्वयः । चूर्णीसंज्ञायाः सरितो नद्याः शुभे पुण्ये तटे तीरप्रदेशे यस्य हरेः जयन्तमङ्गलमिति प्रसिद्धं निकेतनं क्षेत्रं चकास्ति शोभते । स तादृशं नारसिंहं नरसिंहसम्बन्धि वपुः शरीरमास्थितोऽङ्गीकुर्वन् सनातनः शाश्वतः अनाद्यन्त इत्यर्थः । हरतीति हरिः महाविष्णुः । नोऽस्माकं चेतसि मनसि प्रकाशतां प्रतिभातु । सन्निधानं करोत्वित्यर्थः । प्रार्थनायां लोट् ॥ १ ॥

महासुरोरःस्थलशोणितस्पृशां
जयन्ति यत्पाणिरुहां मरीचयः ।
विशालबालातपपुञ्जरञ्जिताः
प्रगेतनेन्दुद्युतिकन्दला इव ॥ २ ॥

महासुरेति । महासुरस्य हिरण्यकशिपोः उरःस्थले वक्षःस्थले यच्छोणितं नखकृतविदारणेन प्रविगलितं रुधिरम् । तत् स्पृशन्तीति तथाभूतानां, शोणितादिग्धानामित्यर्थः । यस्य नरसिंहस्य पाणिरुहां नखानां मरीचयो रश्मयो जयन्ति सर्वोत्कृष्टत्वेन वर्तन्ते । अत्रोपमामाह — विशालानां विस्तीर्णानां बालातपानां प्रभातार्कप्रभाणां पुञ्जेन समूहेन रञ्जिताः रक्तीकृताः प्रगेतनस्य प्रभातकाले भवतः इन्दोश्चन्द्रस्य द्युतिकन्दला रश्मय इवेति ॥ २ ॥

सटाच्छटा यस्य कटाहवर्तुल-
स्फुटोन्मिषन्नेत्रपुटारुणांशुभिः ।
विभाति लिप्ता गिरिराजगैरिक-
प्रभानुबद्धेव शरद्घनावली ॥ ३ ॥

सटेति । यस्य तु हरेः सटानां स्कन्धरोम्णां छटा समूहः । कटाहः पात्रविशेषः । तद्वद्वर्तुलयोः वृत्ताकारयोः स्फुटं स्पष्टं यथा भवति तथोन्मिषतोर्विकसतोर्नेत्रयोः पुटेऽन्तर्भागे येऽरुणा रक्ता अंशवस्तैर्लिप्ता संपृक्ता सती । गिरिराजस्य महागिरेर्गैरिकाणामरुणधातूनां प्रभाभिरनुबद्धा विमिश्रिता, शरद्घनावली शरन्मेघसमूह इव विभाति प्रदीप्यते । उपमालङ्कारः ॥ ३ ॥

अथ कविरात्मनो गुरुपादानां प्रसादं प्रार्थयमान आह ।

करोतु नारायणभट्टदेशिक-
प्रसादनिर्दोषतुषारदीधितिः ।
मदन्तरिन्दूपलमुक्तिमाधुरी-
झरीपरिष्यन्दितयातिसुन्दरम् ॥ ४ ॥

करोत्विति । नारायणभट्टानां देशिकानां प्रसाद एव निर्दोषो निष्कलङ्कस्तुषारदीधितिश्चन्द्रः । मदन्तः अन्तःकरणं तद्रूपमिन्दूपलं चन्द्रकान्तमणिम् । उक्तिमाधुरी उक्तेर्माधुर्यम् । तद्रूपां झरीं प्रवाहं परिष्यन्दयतीति

परिष्यन्दी, तस्य भावस्तत्ता, तया हेतुनातिसुन्दरमतिशयेन सुमनोहरमित्यर्थः । करोतु । अत्रापि प्रार्थनायां लोट् । अत्र परम्परितमलङ्कारः । देशिकप्रसादस्य तुषारदीधितित्वेन रूपणम् अन्तःकरणस्येन्दूपलत्वेन रूपणं प्रति हेतुः । तच्च माधुर्यां झरीत्वेन रूपणं प्रति हेतुरिति । तदुक्तम् —
"अन्यारोपणमूलं स्यादन्यस्यारोपणं यदि । तत्परम्परितम्" इति ॥ ४ ॥

अथ चिकीर्षितं प्रतिजानीते—

नवाम्बुदश्यामलकोमलत्विषो
नवावताराननुकीर्तये हरेः ।
नवार्थक्लृप्तिः पुनरस्तु वा न वा
न वामतां यान्ति बुधा विमत्सराः ॥ ५ ॥

नवेति । अहं हरेः नव अवतारान् अनुकीर्तये इत्यन्वयः । हरेर्विष्णोः नवावतारानिति मत्स्यावतारमारभ्य कृष्णावतारावधि । अनुकीर्तये क्रमेण वर्णयामि । (खड्गि ? कल्कि)रूपस्य दशमावतारस्येदानीमनिष्पन्नत्वाद्धि तदननुकीर्तनमिति द्रष्टव्यम् । कीदृशस्य हरेः । नवाम्बुदो नीलमेघः स इव श्यामला श्यामवर्णा कोमला मनोहरा त्विट् प्रभा यस्य स तथोक्तः । नवा अर्थक्लृप्तिः पुनः अस्तु वा न वा । अस्मिन् काव्ये नूतनमर्थकल्पनं अस्तु वा क्वचित् भवतु वा न भवतु वा । उभयथापि विबुधा ह्यनुकूला एव भवेयुः । विमत्सरा मात्सर्यरहिता बुधा विद्वांसो वामभावं प्रातिकूल्यं न यान्ति । नवार्थकल्पनविरहा(दि ? द्) दुष्टमेवेति न परित्यजन्ति । अस्य कवेरियत्येव प्रतिभेति बोद्धुं समर्थत्वात् । अत एव हि बुधा इत्युक्तम् । "गुणदोषौ बुधो गृह्णन्" इत्यादिवचनानुसारादिति भावः ॥ ५ ॥

अथ मत्स्यावतारमनुकीर्तयन्नाह

अभूदमर्त्यारिरमित्रजैत्रया
श्रिया हयग्रीव इति प्रतापवान् ।
जनैरदण्ड्येष्वपि दण्डधारिणो
यतः कृतान्तादपि तत्रसेऽधिकम् ॥ ६

अभूदिति । हयग्रीव इत्यमर्त्यारिरभूदित्यन्वयः । अमर्त्यारिरसुरः । सः कीदृशः । प्रतापवान् पराक्रमशाली । अमित्रान् शत्रून् जेतुं शीलमस्या इति तथाभूतया श्रिया ऐश्वर्येण उपलक्षितः । अथवा तादृशेन स्वतेजसोपलक्षितः । तदेवाह जनैरित्यादिना । जनैर्निखिलैरितीमे यतो यस्माद् हयग्रीवासुरात् सकाशात् कृतान्तादन्तकादप्यधिकं तत्रसे त्रस्तम् । अन्तकसकाशाज्जनानां यादृशस्त्रासः ततोऽप्यधिकोऽस्य सकाशात्त्रास इत्यत्र हेतुमाह । अदण्ड्येषु दण्डयितुमनर्हेषु सज्जनेष्वपि । दण्डं धारयतीति दण्ड-धारी । (यो?) अन्तकस्तु दण्ड्यानेव दण्डयति धर्मानुसारित्वात् , अयन्त्वसुरो विजयित्वात् सतोऽसतोऽप्यविशेषेण दण्डयति इत्ये(सम ? वा)र्थः । व्यतिरेकोऽलङ्कारः । तत्रस इति भावे लिट् ॥ ६ ॥

गदाभिघातक्षपितारिवारणे
रणे तृणेढि स्म नृणां कुलानि यत् ।
अजीगणन्निर्जरनिर्जयाय तत्
खलूरिकाभ्यासमिवासुरोरसम् ॥ ७ ॥

गदेति । असुरोरसं असुरश्रेष्ठः । "अप्राख्यायामुरसः" (५-४-९३) टच् समासान्तः । उरःशब्दस्य नपुंसकत्वात् नियतनपुंसकत्वम् । गदाभिघातेन गदाप्रहारेण क्षपिता नाशिता अरीणां शत्रूणां वारणाः सैन्यगजा यत्र तादृशे रणे युद्धे, नृणां कुलानि समूहान् तृणेढि स्म हिंसितवान् । तृह हिंसाया-मित्यतः श्नम्विकरणे "तृणह इम्" (७-३-९२) इतीमागमे सति रूपम् । यत् यस्मात् कारणात् । तद् हिंसनं कर्म, निर्जरनिर्जयाय निर्जराणां देवानां निर्जयं कर्तुं खलूरिकाभ्यासमिव (वायां ? खलूरिकायां) व्यायामशालायां योऽभ्यासः आयुधविद्यापरिश्रमः, तमिवाजीगणद् गणितवान् । नृणां निबर्हणं निर्जरजयं प्रति सौकर्यार्थमभ्यास एव न त्वत्र तात्पर्यम् , तस्याकिञ्चित्करत्वादिति भावः ॥ ७ ॥

पुरा निरीहानपि निर्भरस्फुरत्-
प्रतापभीष्मः स हरद्रुहोऽदिताम् ।
निजैर्निजैरूमभिरस्थयूयुज-
न्निजस्य रूढा द्युमणिमणीनिव ॥ ८ ॥

---

१. 'द्विषो' इति पाठान्तरम् ।

पुरेति । स हयग्रीवः पुरा राज्यप्राप्तात् पूर्वम् । निरीहान् निर्व्यापारानपि अखिलान् निश्शेषान् सुरद्रुहो दैत्यान् । निर्भरमत्यर्थं स्फुरता प्रकाशमानेन करोष्मणा भुजप्रतापेन भीष्मो भयङ्करः सन् । निजैर्निजैर्दैत्यानां प्रत्येकमात्मीयैरूष्मभिः प्रतापैरभ्यधूयुजदभियोजितवान् । पूर्वं मन्दीभूतं तेषामपि प्रतापं पुनरुद्दीपयामासेत्यर्थः । अत्रोपमामाह — द्युमणिः सूर्यः निजत्वेनात्मीयत्वेन रूढान् प्रसिद्धान् मणीन् सूर्यकान्तानिवेति । अस्मिन्नर्थे पुरा निरीहान् जडान् कराणां रश्मीनामूष्मणा भीष्मः निजैर्निजैः स्वस्मिँल्लीनप्रदीपनशक्ति(भि)रिति व्याख्येयम् ॥ ८ ॥

समग्रशक्तिः समरेऽमरेश्वरं
जिगीषुरुच्चैरुदतिष्ठतासुरः ।
कियच्चिरं सम्भृतसर्वसाधनः
परावलेपं विषहेत वीर्यवान् ॥ ९ ॥

समग्रेति । समग्राः संपूर्णाः शक्तयः उत्साहप्रभुमन्त्ररूपं शक्तित्रयं यस्य तादृशोऽसुरो हयग्रीवः । समरे युद्धेऽमरेश्वरमिन्द्रं जिगीषुर्जेतुमिच्छुः सन् । उच्चैरुदतिष्ठत उद्युक्तोऽभूत् । 'उदोऽनूर्ध्वकर्मणि' (१-३-२४) इत्यात्मनेपदम् । वीर्यवान् वीर्यशाली पुरुषः सम्भृतसर्वसाधनः सम्पादितसकलरथतुरगपादातादिसङ्ग्रामपदार्थः सन् । परेषां शत्रूणां अवलेपमहङ्कारं कियच्चिरं विषहेत कियन्तं कालं प्रतिविधानमकुर्वाणस्तिष्ठेत् । क्षणमपि न सहेतेत्यर्थः ॥ ९ ॥

चला परेषां सुरतासिमाशु या
करोति कण्ठग्रहणादनन्तरम् ।
अथामुनासावसुहारिणी धृता
कृपाणयष्टिर्गणिकेव पाणिना ॥ १० ॥

चलेति । अथानन्तरममुना हयग्रीवेणासुरेण । कृपाणयष्टिः प्रशस्तखड्गः पाणिना करेण धृता गृहीता गणिकेव वेश्याङ्गनेव । 'वारस्त्री गणिका वेश्या' इत्यमरः । अथोभयसाधारणं विशेषणमाह । चला विधूननाद्धेतोश्चञ्चला कृपाणयष्टिः । अन्यत्र धनलोभात् प्रतिपूरुषं प्रवृत्त्या चपला । या परेषां शत्रूणां कण्ठग्रहणात् कण्ठे निपतनादनन्तरकालम् आशु क्षिप्रं

सुरतायाः सुरत्वस्याप्तिं लाभं करोति । साम्मुख्येन शत्रोरायुधपातेन निहतानां वीरस्वर्गप्राप्तिरिति प्रसिद्धिः । अन्यत्र कण्ठग्रहणमालिङ्गनम् । तदुत्तरकालं सुरताप्तिं निधुवनलाभं करोति । असुहारिणी शत्रूणां प्राणहारिणी कृपाणयष्टिः । अत्र (असौ, अ) न्यत्रसेति (च) छेदः । वसुहारिणी द्रव्यहारिणीति । श्लेषोऽलङ्कारः । "नानार्थसंश्रयः श्लेष" इति हि तल्लक्षणम् ॥ १० ॥

रथं रयाधःकृतमातरिश्वभि-
स्तुरङ्गमैरूढमुदूढकेतनम् ।
दिगन्तरेष्वप्रतिबन्धमास्थितो
महारथः स्वस्य मनोरथोपमम् ॥ ११ ॥

रथम् इति । महारथो युद्धसमर्थः । हयग्रीवो रयेण वेगातिशयेनाधःकृतो न्यक्कृतः, विजित इत्यर्थः, मातरिश्वा वायुर्यैस्तादृशैस्तुरङ्गमैरश्वैरूढं निबद्धं युक्तमिति यावत् । उदूढकेतनं धृतध्वजम् । दिगन्तरेषु सर्वासु दिक्ष्वप्रतिबन्धमप्रत्यूहम् अबाधितमित्यर्थः । अत एवाह स्वस्य आत्मनो मनोरथोपमं मनोरथतुल्यम् । मनोरथस्य कचिदपि ......॥ १२ ॥

तुरङ्गमातङ्गरथाधिरोहिभिः
पदातिभिश्चानुसृतेन दानवैः ।
भयोद्भ्रमत्किन्नरसिद्धचारणः
सुमेरुरध्यारुरुहे सुरद्विषा ॥ १२ ॥

तुरङ्गेति । सुरद्विषा हयग्रीवेण तुरङ्गमातङ्गरथानधिरोढुं शीलमेषामिति तादृशैः तुरङ्गिभिः (मातङ्गिभी) रथिभिश्चेत्यर्थः । पदातिभिः पत्तिभिश्च दानवैरनुसृतेनानुगतेन सता । भयेन हेतुना उद्भ्रमन्तः सम्भ्रान्ताः किन्नरादयो यस्मिन्निति तत्कालविशेषणम् । सुमेरुर्महागिरिरध्यारुरुहे आरूढः । कर्मणि लिट् ॥ १२ ॥

प्रचण्डवेतण्डसमूहबृंहित-
प्रबुद्धकण्ठीरवकण्ठगर्जितैः ।
गभीरभेरीरणितैश्च पूरिता
दिगन्तदन्तावलकर्णकन्दराः ॥ १३ ॥

प्रचण्डेति । प्रचण्डानां क्रूराणां वेतण्डानां गजानां समूहस्य बृंहितेन शब्दविशेषेण हेतुना प्रबुद्धानाम् अपनीतनिद्राणां कण्ठीरवाणां सिंहानां कण्ठगर्जितैः कण्ठनादैः कर्तृभिः, गभीरैर्गम्भीरैर्भेरीणां रणितैः शब्दैश्च कर्तृभिः दिगन्तदन्तावलानां दिग्गजानां कर्णकन्दराः कर्णरन्ध्राणि पूरिताः प्रतिरुद्धाः निर्विवरीकृता इत्यर्थः ॥ १३ ॥

खुराञ्चलक्षुण्णसुवर्णसानुजैः
परागपूरैः कृपयेव वाजिनः ।
हठग्रहोत्काय गुहाविहारिणं
सुरद्रुहे न्यह्नुवताप्सरोगणम् ॥ १४ ॥

खुरेति । वाजिनोऽश्वाः खुराञ्चलैः खुराग्रैः क्षुण्णात् सञ्चूर्णितात् सुवर्णसान्नोः स्वर्ण(र ? म) थप्रस्थप्रदेशाज्जातैः परागपूरैः धूलिसन्ततिभिः करणभूतैः कृपयेव कारुण्यादिव अप्सरोगणं स्वर्गनारीसमूहं सुरद्रुहे हयग्रीवाय न्यह्नुवत छादयाञ्चक्रुः । मा तावदसावेनं पश्यत्विति तद्दर्शनपथान्निवर्तयामासुरित्यर्थः ।"श्लाघह्नुङ्स्थाः"(१ ४-३५) इत्यादिना सम्प्रदानसंज्ञा । कीदृशमप्सरोगणम् । गुहाविहारिणं पर्वतकन्दरासु विहर्तुं शीलमस्येति तथाभूतम् । कीदृशाय सुरद्रुहे । बलात्कारेण हरणे उत्काय उत्सुकाय । अत एव तद्दर्शनपरिहारः कृतः । तुरगखुररजोभिर्गुहामुखस्य पिहितत्वादयं हयग्रीवोऽप्सरोगणं न दृष्टवानित्यर्थः । अत्र कृपयेवेति हेतूत्प्रेक्षा । अहेतौ हेतुत्वेन सम्भावनात् ॥ १४ ॥

निशासु च प्रज्वलदोषधिद्रुमे
नमेरुदारुप्रतिबद्धवारणाः ।
सुगन्धिशैलेयरसेऽस्य सैनिका
मणिस्थलीनां निचये विशश्रमुः ॥ १५ ॥

निशास्विति । अस्य हयग्रीवस्य सैनिकाः सेनासमूहाः । निशासु रात्रिकालेषु । नमेरुषु सुरपुन्नागवृक्षेषु दारुषु देवदारुद्रुमेषु च । सत्यभामा भामेत्यादिवद्देवदारौ दारुशब्दप्रयोगः । प्रतिबद्धा नियमिता वारणाः सेनागजा यैस्तथा सन्तः । प्रज्वलन्त ओषधिद्रुमा यस्मिन् । यदुक्तम् "तमसि ज्वलन्ति

सहसैव महौषधयः" इति। सुगन्धयः सुरभयः शैलेयरसा शिलायजतुद्रवा यस्मिन्नादर्शे मणिस्थलीनां रत्नमयाकृत्रिमप्रदेशानां निचये सञ्चये विश्रश्रुः विश्रान्ताः। अध्वश्रममपनीय स्थिता इत्यर्थः ॥ १५ ॥

स चापघोषेण पुरः प्रसर्पता
निवेदितात्मागमनो मरुत्वते।
रुरोध दैतेयपृता समं ततः
समन्ततः संसृतयामरावतीम् ॥ १६ ॥

स इति। ततोऽनन्तरं (स) हयग्रीवः पुरः प्रसर्पता पुरस्तामध्याप्नुवता चापघोषेण ज्यानिनादेन करणेन, मरुत्वते निवेदितात्मागमनो विज्ञापितानिजप्राप्तिः सन्। समन्ततः परितः संसृतया व्याप्तया दैतेयपृता असुरपृतनया ("मांसपृतना)सानूनां मांस्पृत्स्नवो वाच्याः" इति पृतनायाः पृदादेशः। असुरसेनया समं सहामरावतीमिन्द्रराजधानीं रुरोध व्यावृणोत् ॥ १६ ॥

घनस्तनद्वन्द्वभरावसादितै
र्विहस्तहस्तच्युतवल्लकीगुणैः।
ससम्भ्रमोत्सृष्टममर्त्ययौवतैः
सुरद्विषोऽध्यासत नन्दनं वनम् ॥ १७ ॥

घनेति। सुरद्विषो दैत्याः। घनस्य गुरोः स्तनद्वन्द्वस्य कुचयुगलस्य भरेणावसादितैरालस्यं प्रापितैः, विहस्तेभ्यो विवशेभ्यो हस्तेभ्यः पाणिभ्यश्च्युताः पतिता वल्लकीगुणा विपञ्च्यो येषां तादृशैरमर्त्ययौवतैः सुरयुवतिसमूहैः ससम्भ्रमं सभयं यथा भवति तथा उत्सृष्टं त्यक्तं नन्दनं वनम् अध्यासत अधिष्ठितवन्तः। नन्दनवनमाक्रम्य स्थिता इत्यर्थः ॥ १७ ॥

सुवर्णपङ्केरुहपांसुमांसलैः
सुरापगावीचिसखैः समीरणैः।
निषेव्यमाणेन निलिम्पवैरिणा
निषण्णमैन्द्रे मणिमन्दिरोदरे ॥ १८ ॥

सुवर्णेति। निलिम्पानां देवानां वैरिणा हयग्रीवेण। ऐन्द्रे इन्द्रसम्बन्धिनि मणिमन्दिरस्य रत्नभवनस्योदरेऽन्तर्भागे निषण्णं स्थितम्। भावे क्तः।

कीदृशेन । सुवर्णपङ्केरुहाणां कनककमलानां पांसुभिः परागैर्मांसलैः स्थूलैः । निबिडैरित्यर्थः । सुरापगाया आकाशगङ्गाया वीचयस्तरङ्गाः सखा(यः) येषाम् । वीचिषु सञ्चरद्भिरित्यर्थः । तादृशैः समीरणैर्वातैर्निषेव्यमाणेन नितरामध्वश्रमापनोदेन परिचर्यमाणेन । तत्रत्यसुखानीन्द्र(व)देवानुभूय स्थितवानित्यर्थः ॥ १८ ॥

यदर्थिनामर्थितमर्थमर्पयत्
पुलोमजोत्तंसितपुष्पपल्लवम् ।
तदेव तेनामरशाखिपञ्चकं
चमूगजालानमकारि मानिना ॥ १९ ॥

यदिति । मानिना अभिमानशालिना तेन हयग्रीवेण तदेव तथा प्रसिद्धमेव अमरशाखिनां सुरपादपानां पञ्चकम् । "मन्दारः पारिजातकः । सन्तानः कल्पवृक्षश्च पुंसि वा हरिचन्दनम् ।" इत्यमरः । एवं पञ्च सुरद्रुमा अपि चमूगजानां सेनागजानामालानं बन्धस्तम्भः अकारि कृतम् । तेषु सुरद्रुमेषु गजान् बबन्धेत्यर्थः । तदेवेति निर्दिष्टं यच्छब्देनोपपादयति । यत् सुरद्रुमपञ्चकं कर्तृ, अर्थिनां याचकानाम् अर्थितं प्रार्थितमर्थं पदार्थमर्पयद् भवति । किञ्च पुलोमजया शचीदेव्या उत्तंसितानि शिरोऽलङ्कारीकृतानि पुष्पाणि पल्लवानि च यस्य तथा च भवति । एवमुत्कृष्टमपि गजबन्धनस्तम्भं कृतवानयमित्यहो तस्य नैर्घृण्यमिति भावः ॥ १९ ॥

यदा मदान्धैरसुरेन्द्रसैनिकै-
रहारि यद्यत्पदमुद्यतायुधैः ।
ततोऽपि पूर्वप्रहरे ततस्ततः
पलायि भीतैरमृतान्धसां गणैः ॥ २० ॥

यदेति । यदा यस्मिन् काले, मदान्धैरहङ्कारेणाविवेकिभिरसुरेन्द्रस्य हयग्रीवस्य सैनिकैः सेनासमूहैः । उद्यतायुधैरुद्धृतशरचापाचशस्त्रविशेषैः

१. 'वात' इति पाठान्तरम्

सद्भिः। यद्यत् पदं स्थानमहारि हृतं स्वीकृतम्। ततोऽपि तस्मात् कालादपि पूर्वस्मिन् प्रहरे यामे, 'द्वौ यामप्रहरौ समौ' इत्यमरः। ततस्ततः तस्मात् तस्मात् प्रदेशाद् भीतैरमृतान्धसां देवानां गणैः पलायि पलायितम्। भावे चिण्। "उपसर्गस्यायतौ" (८-२-१९) इति पराशब्दरेफस्य लत्वम्॥ २०॥

अथाभ्यमित्रोऽजनि तत्र वृत्रहा
सहामरैरभ्रमुकान्तवाहनः।
स्फुटामपि ह्यभ्रघटातिरस्क्रियां
न दीर्घकालं प्रसहेत भानुमान्॥ २१॥

अथेति। अथ सुरगणापक्रमणानन्तरम्। तत्र तेषां मध्ये वृत्रहा इन्द्रः। अभ्रमुकान्त ऐरावतः, स वाहनं यस्य तथा सन्। अमरैः सह पूर्वं पलायितैरपि स्वामिनो युयुत्सादर्शनाद् योद्धुमेवानुमिलितैरित्यर्थः। अभ्यमित्रोऽजनि अमित्रमभिमुखीकृत्य स्थितो जातः। दृष्टान्तेनोक्तमर्थं समर्थयति। भानुमान् सूर्यः स्फुटामपि स्फुटतया स्थितामप्यभ्रघटया मेघसमूहेन या तिरस्क्रिया तिरोधानं ताम्। दीर्घकालं न प्रसहेत न क्षमेत। हि यस्मात् तस्मादयमभ्यमित्रोऽभूदित्यर्थः॥ २१॥

ततो हयग्रीवसुराग्रगामिनो-
रभूदभूयस्तरवाक्यविस्तरम्।
प्रशस्तशस्त्रास्त्रमिथोविघट्टन-
स्फुटानलाविष्करणभीषणं रणम्॥ २२॥

तत इति। ततोऽनन्तरम्। हयग्रीवस्य सुराग्रगामिन इन्द्रस्य च। तयो रणं युद्धमभूत। कीदृशम्। भूयस्तरो बहुतरः तथा न भवतीत्यभूयस्तरः अपू-(र्व) इत्यर्थः। वाक्यविस्तरोऽन्योन्याधिक्षेपवाक्प्रपञ्चो यस्मिन्। प्रशस्तानामुत्कृष्टानां शस्त्राणामस्त्राणां च मिथोविघट्टने अन्योन्यसंघट्टने स्फुटैः प्रकाशमानैरनलस्याविष्करणैः स्फुलिङ्गैर्भीषणं भयङ्करम्। तादृशं रणं सञ्जातम्॥ २२॥

स वज्रनिष्पेषविभिन्नमस्तक-
प्रभिन्नकुम्भीनि चकार जम्भजित्।

निरन्तरोदित्वरबाणधोरणी-
निमग्नवाजीनि बलानि वैरिणः ॥ २३ ॥

स इति । स तथा प्रसिद्धो जम्भजिदिन्द्रः वैरिणो हयग्रीवस्य बलानि सैन्यानि वज्रनिष्पेषेण वज्रप्रहारेण विभिन्नमस्तकां विदारितकुम्भस्थलाः प्रभिन्नकुम्भिनो मत्तवारणा येषु। "प्रभिन्नो मत्तवारण" इति निघण्टुः । निरन्तरं निर्विवरं यथा भवति तथोदित्वरायामुत्पतनशीलायां बाणधोरण्यां शरप्रवाहे निमग्ना वाजिनोऽश्वा येषु तथाविधानि चकार कृतवान् ॥ २३ ॥

रणाङ्गणागत्वररक्तवाहिनी
विभिन्नयान्वक्रियताभ्रगङ्गया ।
प्रफुल्लबन्धूकवितानबन्धुरा
तुषारभूमीभृदुपत्यकास्थली ॥ २४ ॥

रणेति । रणाङ्गणाद् युद्धभूमेः सकाशाद् आगत्वरया आगमनशीलया रक्तवाहिन्या रुधिरनद्या विभिन्नया मिश्रया । संपृक्तयेत्यर्थः । अभ्रगङ्गया आकाशगङ्गया कर्त्र्या। प्रफुल्लानां विकसितानां बन्धूकानां जपापुष्पाणां वितानेन समूहेन बन्धुरा सुन्दरा । तुषारभूमीभृतो हिमवत उपत्यकास्थली आसन्नभूमिः, "उपत्यकाद्रेरासन्नभूमिः" इत्यमरः, अन्वाक्रियत अनुकृता । सा(तदाऽतिशुभ्रा)पि गङ्गासलिलप्रवाहशोणितमिश्रितत्वाद् विकसितबन्धूकपुष्पवती हिमवत्कटकस्थलीव शुशुभ इत्यर्थः ॥ २४ ॥

अथासुरेन्द्रः सदृशोर्जितं रिपुं
सुरेन्द्रमाप्त्वा सुतरामजृम्भत ।
न किं भवत्युज्ज्वलितं दवानलं
प्रपद्य सद्यो भृशमूष्मलो रविः ॥ २५ ॥

अथेति । अथानन्तरमसुरेन्द्रो हयग्रीवः सदृशोर्जितमात्मना तुल्यपराक्रमं सुरेन्द्रं रिपुमाप्त्वा शत्रुत्वेनाधिगम्य सुतरामत्यर्थमजृम्भत प्रवृद्धप्रतापो बभूव। अत्र दृष्टान्तमाह—रविः सूर्यः उज्ज्वलितं प्रदीप्तं दवानलमरण्यवह्निं प्रपद्य प्राप्य सद्यस्तदानीमेव भृशमधिकमूष्मल औष्ण्ययुक्तो न किं भवति । भवत्येवेत्यर्थः ॥ २५ ॥

अथाटनीसङ्घटितोरुकिङ्किणी-
झणज्झणद्ध्वानकरम्बिताम्बरम् ।
हरिर्दधावभ्रविशेषभूषणं
विचित्ररत्नद्युतिकर्बुरं धनुः ॥ २६ ॥

अथेति । अनन्तरं हरिरिन्द्रो धनुर्निजकार्मुकं दधौ धृतवान् । कीदृशम् । अटन्या(इवाग्वरो? चापकोट्या) सङ्घटितानां सम्बद्धनामुरूणां पृथूनां किङ्किणीनां घण्टानां झणज्झणद्ध्वानेन । झणज्झणदिति शब्दानुकरणम् । तद्रूपशब्देन करम्बितं व्याप्तमम्बरं नभस्तलं यस्य । विचित्राणां भिन्ना(नां) नानावर्णानां रत्नानां द्युतिभिः प्रभाभिः कर्बुरं (अम्बरं?शबलम्)। अभ्रस्य मेघस्य विशेषभूषणं विशिष्टाभरणं जातम् । "अम्बुधरमण्डनं धनुः" इत्यादिप्रयोगप्रसिद्धमस्याभालङ्करणत्वम् । तादृशं धनुः गृहीतवानिति सम्बन्धः ॥ २६ ॥

श्रुतिप्रवृत्तानृजुतामयुञ्जतः
सदात्मवादानिव तस्य सायकान् ।
अखण्डयच्चण्डतरैर्महासुरः
प्रसह्य पाषण्डनयैरिवाशुगैः ॥ २७ ॥

श्रुतीति । महासुरो हयग्रीवश्चण्डतरैरतिक्रूरैराशुगैः शरैस्तस्येन्द्रस्य सायकान् शरान् प्रसह्य बलात्कारेणाखण्डयत् खण्डितवान् । पाषण्डनयैः पाषण्डानां सौगतपाशुपतदिगम्बरादीनां नयैस्तर्कैः । यत् सत् तत् क्षणिकमित्याद्यनुमानोपोद्बलितदुर्वादडम्बरैः । सदात्मवादान् सदात्मानो वेदान्तिनः । अदास्यात्मेत्यवष्टम्भादास्तिकाः । तेषां वादानिव । यथा पूर्वपक्षतया दुस्तर्कैराक्षिप्यन्ते तथेत्यर्थः । कीदृशान् । श्रुतिप्रवृत्तान् आकर्णाकृष्टत्वात् कर्णावधेः प्रवृत्तान् सायकान्; अन्यत्र श्रुतेः वेदात् प्रवृत्तान् । ऋजुतामयुञ्जतः ऋजुतां सरलतामत्यजतः; दण्डवदृजूनित्यर्थः; अन्यत्र ऋजुता सत्यत्वम्, तामयुञ्जत इति समानम् ॥ २७ ॥

अथाशनिः स्वप्रतिपक्षनाशिनी
वलारिणा या समरे समीरिता ।
न्यवर्ततास्मादफलैव दानवा-
दनेलमूकादिव सूरिभारती ॥ २८ ॥

अथेति। अथानन्तरं वलारिणेन्द्रेण समरे युद्धे स्वस्य प्रतिपक्षान् शत्रून् नाशयतीति तादृशी या अशनिः वज्रं समीरिता प्रयुक्ता (या? सा) अशनिः अफलैव निष्फलैव दानवाद् हयग्रीवात्सकाशात् न्यवर्तत पराङ्मुखीभूता। तच्छरीरविदारणमकृत्वैव निवृत्तेत्यर्थः। अत्रोपमामाह। सूरीणां महाकवीनां भारती गद्यपद्यादिरूपा सरस्वती अनेलमूकादिव। स्वयं वक्तुं परेणोक्तमर्थं-द्वारा श्रोतुं चाशिक्षितो ह्यनेलमूकः। "अनेलमूकस्तु वक्तुं श्रोतुमशिक्षितः" इत्यमरः। तत्सकाशान्निष्फला यथा निवर्तते सूरिभारती तथास्मादशनिर्निवृत्ते-त्युपमा। स्वप्रतिपक्षनाशिनीत्युभयत्र साधारण्यात्साधारणधर्मः। पूर्वत्राफलत्वं तदविदारणम्, अन्यत्र तु तदबोधनमिति विवेकः॥ २८॥

ततो हयग्रीवमुदग्रविग्रहं
विबुध्य दुर्निग्रहमग्रधाविभिः।
सहासदैतेयनिरीक्षितैः सुरैः
सह प्रदुद्राव सहस्रलोचनः॥ २९॥

तत इति। ततोऽनन्तरं सहस्रलोचनः इन्द्रः। उदग्रविग्रहमुत्कृष्टसंग्राम-चातुर्यं हयग्रीवम्। दुर्निग्रहं निग्रहीतुमशक्यं विबुध्य ज्ञात्वा। अग्रधाविभिः पुरस्तात् पलायनशीलैः, अत एव सहासैः सपरिहासैर्दैतेयैरसुरैर्निरीक्षितैरव-लोकितैः सुरैः सह प्रदुद्राव प्रधावनं कृतवान्॥ २९॥

द्विषद्बलाक्रान्तवृषण्वसुर्वृषा
मृषार्थमिन्द्रत्वमसाववधारयत्।
भियोपगूढो हि विहीयतेतरां
प्रियोऽप्यसूयाकुलयेव सम्पदा॥ ३०॥

द्विषदिति। वृषा इन्द्रः। द्विषद्बलैः शत्रुसैन्यैराक्रान्तमाहृतं वृषण्वसु ऐन्द्रं धनादि वस्तु यस्य "वृषण्वसु धनाद्यैन्द्रम्" इत्यमरः। तथा सन्। असावि-न्द्रत्वं मृषार्थमयथार्थमर्थशून्यमधारयद् धृतवान्। 'इदि परमैश्वर्ये' इति धातो-र्निष्पन्न इन्द्रशब्दः। ऐश्वर्यविनाशात्तदर्थाभाव इति मृषार्थत्वम्। भिया त्रासेनो-पगूढ उपाश्रितः पुरुषः प्रिय इष्टः सन्नपि सम्पदा श्रिया विहीयतेतरां दूरं परित्य-ज्यते। अत्र प्रसिद्धौ। भीः श्रीश्च सहैकत्र न वर्तेत इत्यर्थः। अत्रोत्प्रेक्षते असूया-

कुलयेवेति । असूयायुक्तया । स्त्रीणां सपत्नीदर्शनादसूया संभवत्येव । श्रियो मियश्च स्त्रीत्वादिदमुत्प्रेक्ष्यं भवति ॥ ३० ॥

महासुरस्तावदहानि कानिचि-
न्महेन्द्रलक्ष्मीमनुभूय भूयसीम् ।
अमेयमायाकृतविग्रहान्तरो
निरत्ययं धाम जगाम वेधसः ॥ ३१ ॥

महासुर इति । तावत्तदानीं महासुरो हयग्रीवो भूयसीं बहुतरां महेन्द्रस्य लक्ष्मीं सम्पदम् । कानिचिदहानि कांश्चिद्दिवसान् अत्यन्तसंयोगे द्वितीया । अनुभूय उपभुज्य । अमेयया मातुं परिच्छेत्तुमशक्यया मायया कृतं निर्मितं विग्रहान्तरमन्यद् विग्रहं येन तथा सन् । वेधसो ब्रह्मणो निरत्ययं नाश-रहितं धाम भवनं सत्यलोकम् । जगाम गतवान् । ऐन्द्रपदलाभेऽप्यतृप्तस्तदुपरि-लोकम(ह ? पि) स्वाधीनं कर्तुं ततो गतवानित्यर्थः ॥ ३१ ॥

ततस्तमैक्षिष्ट स पद्मविष्टरे
सुखोपविष्टं परितुष्टमानसम् ।
मुनीश्वरेष्वास्यविवर्तनं विना
कृताभिमुख्यं परितः स्थितेष्वपि ॥ ३२ ॥

तत इति । ततः सत्यलोकगमनानन्तरम् । स हयग्रीवः पद्मविष्टरे पद्ममये आसने (सुखं) स्वच्छन्दं यथा भवति तथोपविष्टमासीनं तं वेधसमैक्षिष्ट दृष्टवान् । कीदृशम् । परितुष्टमानसं सन्तुष्टहृदयम् । परितः समन्ततः स्थितेष्वपि मुनीश्वरेषु पुलस्त्यपुलहवसिष्ठादिषु । आस्यविवर्तनं मुखपरिवर्तनं (विना) विहितम् आभिमुख्यमाभिमुखीभावो येन तादृशम् । तस्य चतुर्मुखत्वात् परितः स्थितान् प्रत्याभिमुख्यमिति भावः ॥ ३२ ॥

अकाण्डनिद्राजडनेत्रपक्ष्मणः
क्षणार्धमस्वस्थधियो यदृच्छया ।
जहार वेदांश्चतुरोऽपि वेधस-
श्चतुर्मुखीतोऽपि समं स मायया ॥ ३३ ॥

अकाण्डेति । सः हयग्रीवः अकाण्डे अनवसरे या निद्रा तया हेतुना जडान्यलसानि नेत्रपक्ष्माणि यस्य । क्षणार्धमल्पकालमस्वस्थधियोऽजाग्रद्-

बुद्धेर्वैभ्रसः। यदृच्छया दैवयोगाच्चतुर्मुखीतोऽपि मुखचतुष्कादपि। चतुरो वेदानपि समं समकालमेव, मायया करणभूतया जहार हृतवान् ॥ ३३ ॥

जगत्त्रयीवन्द्यमहत्त्वशालिनी
शिखित्रयीव स्वयमन्त्यजन्मनः ।
अथ त्रयी तस्य वशं गतान्वभू-
दशेषशोच्यामतिदुस्सहां दशाम् ॥ ३४ ॥

जगदिति। अथ तदनन्तरम्। जगत्त्रयीवन्द्येन त्रैलोक्यवासिभिर्वन्द्येन महत्त्वेन महिम्ना शालिनी श्लाघ्या, 'शल श्लाघायाम्' इति धातुः। त्रयी वेदाः। शिखित्रयी आहवनीयाद्यग्नित्रयम्। अन्त्यजन्मनः शूद्रस्येव तस्य हयग्रीवस्य वशं गताधीनतां प्राप्ता सती स्वयमशेषैः सर्वजनैः शोच्यां शोचितुमर्हामतिशयेन दुःसहां सोढुमशक्यां दशामवस्थामन्वभूदनुभूतवती ॥ ३४ ॥

प्रमुष्य वेदान् जगतामसूनिव
प्रकामचण्डप्रकृतिः कृतान्तवत् ।
सह स्वसैन्यैस्तरसा रसातलं
प्रविश्य तत्र क्वचन न्यलेष्ट सः ॥ ३५ ॥

प्रमुष्येति। स हयग्रीवः जगतां जगद्वासिनामसूनिव प्राणानिव (वेदान्) प्रमुष्य चोरयित्वा। कृतान्त इव प्रकामचण्डा अतिशयेन क्रूरा प्रकृतिः स्वभावो यस्य तादृशः स्वसैन्यैः सह तरसा क्षिप्रं रसातलं पातालं प्रविश्य तत्र पाताले क्वचन क्वापि प्रदेशे न्यलेष्ट निलीनवान् गूढं स्थितवान् ॥ ३५ ॥

विधेर्मुखश्रीर्विमतावलुण्ठित-
श्रुतेरतीवाधिगता विवर्णताम् ।
तमस्समाच्छादितभास्करद्युते-
र्दिनश्रियस्तुल्यदशामशिश्रियत् ॥ ३६ ॥

विधेरिति। विमतेन शत्रुणावलुण्ठिता वञ्चिता, 'लुटि स्तेये' इति धातुः, श्रुतयो वेदा यस्मात्तस्य विधेर्ब्रह्मणो मुखश्रीर्मुखानां शोभा। अतीवात्यर्थं विवर्णतां मलिनतामधिगता प्राप्ता सती तमसा राहुणा, "तमस्तु राहुः स्वर्भानुः"

इत्यमरः, समाच्छादिता तिरोहिता भास्करद्युतिः सूर्यप्रभा यस्यां तस्या दिनश्रियो दिवसश्रियस्तुल्यदशां सदृशावस्थामाशिश्रियदाश्रितवती। सूर्योपराग इवाप्रकाशाभूदित्यर्थः ॥ ३६ ॥

त्रयीविनाशेन तदेकसम्भवा
खिलीबभूवाखिलधर्मपद्धतिः।
विरुग्णमूला विततापि वल्लरी
विशुष्यति द्रागिति विश्रुतं खलु ॥ ३७ ॥

त्रयीति। त्रयीनां वेदानां विनाशेन हेतुना। तदेकसम्भवा सैकः सम्भव उत्पत्तिस्थानं यस्यास्तादृशी, अखिला निश्शेषा धर्मपद्धतिः धर्ममार्गः खिलीबभूवाप्रहताभूत्। 'द्वे खिलाप्रहते समे' इत्यमरः। वेद-विनाशाद्वेदमूलस्य धर्ममार्गस्यापि विनाशे दृष्टान्तमाह—वल्लरी लता विततापि आश्रयवृक्षस्य सर्वशाखासु व्याप्तापि विरुग्णमूला खण्डितमूला सती द्राक् क्षिप्रं विशुष्यति विशेषेण शुष्का भवतीति यद्वस्तु तद्विश्रुतम्। खलु प्रसिद्ध-मेव। तद्वदित्युपमैवार्थतः ॥ ३७ ॥

विनापि मन्त्रैर्विधिराराध तं
विविक्तया भावनयैव शूद्रवत्।
अजस्रमन्तश्च बहिश्च देहिना-
मनादिमध्यान्तदशश्चकास्ति यः ॥ ३८ ॥

विनेति। यो देहिनां शरीरिणामजस्रमनवरतमन्तश्च बहिश्च चकास्ति जीवात्मपरमात्मतया सर्वव्याप्तो विद्यते। कीदृशः। अनादिमध्यान्तदशः जन्मवृद्धिविनाशात्मकावस्थात्रयरहितः। आदिदशया मध्यदशयान्तदशया रहितोऽनादिमध्यान्तदशः, तथाभूतो महाविष्णुरित्येवोक्तं भवति। तं तादृश-प्रभावं मन्त्रैर्विनापि, वेदा एव हि मन्त्राः तद्वि(दा/ना)शान्मन्त्रोच्चारण-रहितम्। विधिर्ब्रह्मा शूद्रवत् शूद्र इव। तस्य मन्त्रोच्चारेऽनधिकाराद् भक्तिरेव साधनमीश्वराराधनस्य। तद्वत्, विविक्तया विशुद्धया भावनया ध्यानेनैवाराराध आराद्धवान्। जगत्साक्षी प्रसीदतु महाविष्णुरिति ध्यातवा-नित्यर्थः ॥ ३८ ॥

यातावुभौ कोङ्कणदर्शनेच्छया
पूर्वागतो विप्रवरः स्विकां पुरीम् ।
यातो महानेष समं स वर्णिना
वैराग्ययुक्तेन पुनापुरेऽवसत् ॥ १६ ॥

तदनु पयःपारावारेणेव सितांशुसुधोद्भासितेन, मन्दारपादपेनेव नन्दनालङ्कारेण, पम्पातीरेणेव मातङ्गधरेन्द्रभासुरेण, रङ्गविमानेनेव तुरङ्गराजराजमानेन, मेदिनीश्वरेणेव सदामित्रराजसंस्पर्धिना, पुरुहूतेनेव अनन्तामरलालितेन, त्रिदिवेनेव महारम्भोरुजारामरमण्युसमालङ्कृतेन, धनदालयेनेव विविधाक्षयकोशभासुरेण, यन्त्राकृष्टोदकशीतलसौधतलेन सद्मसहस्रेण समुद्भासमानां, कौस्तुभेनेव कलानिधिसन्तानसोदरेण, उत्तरदिगीशेनेव धनदेन, बालिचक्रवर्तिनेव [illegible], श्रीनाथेनेव कुमारसमानेन, अम्भोनिधिनेव सुशोभनक्रमकरेण, बन्धविशेषेणेव सर्वतोभद्रेण, तरणिसारथिनेव अरुणांशुकेन, दुग्धाब्धिनेव सत्सन्तानसम्भवेन, पाकशासनेनेव विबुधाधिपेन, श्रीमन्थाचलमध्यमानचतुस्तन्त्रदुग्धाम्भोधिसमुद्भूतश्र[illegible], सज्जनसङ्घातेन समधिष्ठितां, मदनेनेव रतिकामुकेन, मानससरसेव समहंसालङ्कारेण, वृत्तलक्षणेनेव चम्पकमालामञ्जुलेन, उपवनेनेव सदालिकुचदीप्यता, रत्नसानुनेवोल्लसत्कनकमेखलेन, पार्थेनेव प्रियार्थसम्पादनभासदंशुकमणिहारिणा, सरोरुहेणेव नतारकान्तसंराञ्जितेन, किष्किन्धानगरेणेव तारापालकाननेन नगरमण्डनामण्डलेन परिमण्डितां, वनमालामिव नन्दनीयस्यन्दनोपेतां, [illegible]पर्वनगरीमिव सुमनोऽलङ्कृतां, सत्कविराजिमिव सालङ्कारगोकुलां, युवतिमिव सुरतारम्भोचितां, मेदिनीन्द्रसंघट्टितपादपीठश्रीमन्तराजपरिपाल्यमानां पुनाभिधानां नगरीं तामवलोक्य समन्ततः प्रस्थाय ततः सन्तारितभीमापगः मुनिवरैरिवोपशमशीलैः, हरिचरणारविन्दगाथारसलोलैः, तुलसीनलिनोऽत्पलमालतीप्रभृतिसुमनःसमाराधितवासुदेवैः, मुनिमानससारसराजहंसस्य भक्तवात्सल्यातिशयादिष्टकोपरि राजमानचरणारुणसारसस्य भगवतः सरसीरुहवासिनीकान्तस्य नितान्तं सेवारसभरितान्तःकरणैः धरणीगीर्वाणगणैः शरणीकृतमाधिगत्य पत्तन पण्ढाभिधानमनुदिनमनवच्छिन्न-

नैयमिकः सादरमाराधितः सज्जनैरनुसवनमासेवमानो भगवन्तं तं कमलाकान्तं मासमुवास सहर्षं स हि महानुभावः ॥

काञ्च्यां गौतमवंशवारिधिविधुः सत्सेवनीयो गुरुः
श्रीमान् सद्गुणवारिराशिरवसद् गोपालकृष्णाभिधः ।
सीतारामपदाम्बुजार्चनपरो बाल्येऽपि भक्त्यैकया
त्रय्यां तत्र चतुष्टये च निपुणो मन्त्रार्थपारङ्गतः ॥ १७ ॥

तदनु कदाचिज्जानकीजानिचरणनीरजपरिपूजनानिरतः सेवितुमवगाहितुं च गङ्गादिमहासरितो मन्दिराणि नारायणस्य प्रस्थितः स काञ्च्या अनुमोदनाद्वरदराजस्य समगान्नगरीं गरीयसीं क्रमशः पुनाभिधानाम् ॥

अथागतं तं स निशाम्य मन्त्री
श्रीमन्तराजस्य महोपचारैः ।
आराध्य नारायणनामधेयो
गङ्गावगाहे धिषणां चकार ॥ १८ ॥

शताङ्गमातङ्गतुरङ्गपत्तिभि-
र्वृतः पुनापत्तनतोऽथ निर्ययौ ।
समं धरानिर्जरराजिभिश्शनैः
सदेशिकः सैष गुणार्णसां निधिः ॥ १९ ॥

ततः पुरीं तामधिगत्य पण्ढ्रीं
शिष्टांश्च मृष्टान्नघृतैः पयोभिः ।
विप्रान् स गोपालगुरुः सहस्रं
सम्भोजयामास सुधीः स एषः ॥ २० ॥

श्रीनारायणमन्त्रिणा सह गुरुर्गोपालकृष्णाभिधः
कृष्णं सेवितुमाययौ तदनु स श्रीविट्ठलाख्यं सदा ।
सीतारामगुरूत्तमेन बहुधा नत्यादिभिः पूजित-
स्तस्मिन् प्रीतिमसौ चकार कृपया श्रीरामभक्तोत्तमे ॥ २१ ॥

नारायणपदाम्भोजसेवकावपि तत्र तौ ।
नारायणाराध्यमानावूषतुर्दिवसत्रयम् ॥ २२ ॥

ततो ययौ पञ्चवटीं सदेशिको
गुरुः स नारायणमन्त्रिसंयुतः ।
सुरेशसिद्धेश्वनिषेवितां सदा
सपुण्यपृथ्वीरुहसंविराजिताम् ॥ २३ ॥

तत्रस्थमायामयहेमरङ्कु-
संवीक्षणस्थानविलोकनेन ।
संस्मारितश्रीरघुवर्यगाथ-
स्तन्मन्दिरं प्राप गुरुः सहार्यः ॥ २४ ॥

ब्रह्मप्रार्थनयार्यमान्वयभवं सीतासमेतं पितु-
र्वार्तापालकमङ्गदाभयकरं लङ्केशमित्रेतरम् ।
रामं सोदरसंयुतं गुणनिधिं राज्याभिषिक्तं ततो
गोपालार्ययुतः प्रणम्य विविधैस्तुष्टाव सोऽस्मद्गुरुः ॥

उपदिदेश स रामषडक्षरीं
गुरुवरो गुणवारिनिधिस्तदा ।
निगमसारतमं च स मे गुरुः
सविनयं जगृहे महितो भृशम् ॥ २६ ॥

श्रीराममन्त्रान् स जपन् पठन् श्री-
वेदान्तसारं सह देशिकेन ।
गोदावरीतीर्थपवित्रिताङ्गः
तत्सन्निधौ पञ्चदिनान्युवास ॥ २७ ॥

सीतारामाभिधोऽस्माकमाचार्यस्तदनन्तरम् ।
तीर्त्वा नद्यद्रिदर्यादीन् रेवातीरं ययौ महान् ॥ २८ ॥

तदनु स गुरुः लोपामुद्रामिव सागस्त्यां, सुग्रीवसेनामिव दर्शितदशाननमदभङ्गां, जम्बूसरितामिवार्जुनोल्लसन्तीं, विकटकविवभ्र-मदां, तरुणीमिव रमणीयवेणीं, मारुतचित्तवृत्तिमिव सदारामोद्भास-मानां, उद्यानभूमिमिव विलसद्द्विजां, स्नातृजनसन्दोहसर्वमङ्गलसञ्ज-नित्रीं वारं वारमवगाह्य रेवावारं सुमनःसङ्गमिव सप्रचेतसं, सरोवरमिव सत्कविराजमानं, राशिचक्रमिव बुधाधिष्ठितमाससाद भृगुवत्सं क्षेत्रम् ॥

ततो बिन्दुसरो गत्वा सरस्वत्याप्लुतं गुरुः ।
स्नात्वा नैयमिकं चक्रे कर्दमाश्रममण्डितम् ॥ २९ ॥

स ततः सिद्धनदीं प्रदक्षिणतः प्रासादवरसमुल्लसन्तीमासाद्य पुरीमवन्तीं कुचेलजालोलकुचेलाभ्यामानीतौ तदानयनप्रभावादुपरि संरुद्धनानाशाखाववलोक्य काष्ठसञ्चयौ भक्तिपारवश्यान्नमस्कृत्य पुनः पुनस्तद्गाथामधिगतमोदमपाठीत् ॥

तदनन्तरं रमणीयचर्यो देशिकोऽयं क्षिप्रं कृतक्षिप्रानद्यवगाहः पञ्चमद्वीपवत्सकौञ्चागेन्द्रां, कूलोभयभातभूरुहस्तबकमधुपानमत्तमधु-करारावैर्गायन्तीमिव स्नातृजनान् सकलांहसः संरक्ष इति, गङ्गामिव सम्प्राप्तयमुनासङ्गमां चर्मण्वतीं तामवगाह्य नदीमनुष्ठितनिजनैष्ठिको न्यवात्सीत्तत्र ॥

प्रस्थाय तस्माद् गुरुसार्वभौम
आङ्गीरसीं सिन्धुमिवास्मदार्यः ।
पृथ्वोद्भवामाप सरस्वतीं तां
तस्या ययौ कञ्चन भूधरेन्द्रम् ॥ ३० ॥

अगाधधिषणस्तस्मादगात्प्रस्थाय सत्वरम् ।
अगादस्मद्गुरुः पुण्यं नारायाणसरस्ततः ॥ ३१ ॥

अवगाह्य मुहुर्मुहुर्नारायणसरः विरचितनैयमिकः पङ्कजमिव हंसानन्दकमानञ्च स्वयमन्तपञ्चकमयमाचार्यः ॥

तत्र च देशिकोऽयं गाहमानजनमानसमलनिस्सारणपटु-तरोदकेषु नवस्वपि सरस्सु निमज्य पुनः पुनस्तदनु सुन्दरीलपनमिव सत्तमालकान्तं नारायणमिव वनमालोल्लसितमासाद्य पुष्करं क्षेत्रं पङ्कजाक्षवक्षस्तट इव पद्मोल्लासिते, पयःपारावार इव बहुक्षीरे, मानसो-त्तररसाधर इव पुष्कररराजमाने स्नात्वाथ पुष्करिणीत्रये हिरण्याक्षसं-हारलीलाविहृतवराहं वराहं संसेव्य भगवन्तमेवमस्तावीत् ॥

हिरण्यहारिणे वराहरूपधारिणे
नमो विहारिणे स्वभक्तचित्तमन्दिरे ।
स्वदंष्ट्रया धराधृते रमायुताय ते
तनूजगर्तपूरणासमर्थसिन्धवे ॥ ३२ ॥

स ततः सद्गुणराशिः
सकलजनानन्दवर्धकः प्रययौ ।
शक्रप्रस्थं पश्यन्
मध्येमार्गं कुरुक्षेत्रम् ॥ ३३ ॥

तदनन्तरं दिशादशान्तव्याप्तयशो देशिकवर्योऽयं प्रस्थाय ततः प्रस्थात् खाण्डवपदपूर्वात् रामानुजार्यचित्तमिव यामुनतीर्थोल्लसमानं, नृपतिमिव नानावनोल्लसितं, रमापतिपदारविन्दमिव श्रीतुलसीसंराजितं, चन्द्रमसमिव सारङ्गसंयुतमागत्य वृन्दावनं क्षेत्रं लक्ष्मीलक्षितवक्षस्तटं, दिविषत्तटिनीपूरमिव पवित्रीकृतलोकत्रितयं, नटमिव गोगोपालरूपधरं, शार्दूलमिव विरचितवत्सवृषहयधेनुकसंहारं, वेदान्ताचार्यमिव उत्प्रेक्षित-पादपं, अनन्तमिव नागकन्यासंस्तुतं, वर्षद्वारिदवृन्दमिव दावानल-सञ्जनितभीतिनिवर्तकं, पाण्डुमिव कृतद्विजजायाभयं, शचीपतिमिव विरचितवृद्धश्रवःपृथुमखनिषेधं, जनकजाजानिमिव जलेशवर्णितनाना-विधगाथं, व्रजवल्लवीजनानुष्ठिततपःसाधं, भञ्जितार्जुनमपि रञ्जितार्जुनं, वैनतेयपरितोषायेव कृतकालीयभञ्जनं, नखशशि[illegible]लसच्चरणा-नीरजाभ्यां जितरम्भाकरभाभ्यामूरुभ्यां शिञ्जन्मेखलाष्टापदपटेन कटि-

तटेन श्रीवत्सोल्लसितवक्षःस्थलेन कौस्तुभभूषाभूषणकम्बुकण्ठेन साधु-
जनाभिलषितार्थविश्राणनदक्षेण मन्दस्मितेन च सद्भावसमानं भगवन्तं
नन्दनन्दनमासेव्य रामानुजाचार्यवचांसीव यामुनतीर्थसंवर्धितानि
तुळसीवनबृन्दान्यवलोक्य तेभ्यः स्म सविस्मयं नमस्करोत्येवम् ॥

यस्याः श्रीतुळसीमहीरुह इमे मूले मुनीशाः सदा
वर्तन्ते विटपेषु नाकपतयः पत्रेषु तीर्थानि च ।
मञ्जर्यां कमलोल्लसत्सुकुसुमेष्वप्यम्बुजाद्येषु यां
धत्ते श्रीहरिरादरेण सततं तस्यै तुळस्यै नमः ॥ ३४ ॥

काळीयसरसि स्नात्वा कृष्णक्रीडास्थलान्यथ ।
स संसेव्य गुरुर्भक्त्या मधुरां नगरीमगात् ॥ ३५ ॥

अथ खलु —

अस्मद्गुरुः सद्गुणवारिराशिः
कंसारिसेवोल्लसमानचेताः ।
मध्येपथं वीक्ष्य धराधरेशं
गोवर्धनं गोकुलमाससाद ॥ ३६ ॥

तत्राथ संसेव्य स नन्दनन्दन-
मानन्दमानन्दितमानसो गुरुः ।
पृष्टस्तदीयं चरितं महाजनै-
स्तुष्टः समूचे करुणार्णसां निधिः ॥ ३७ ॥

प्राप्तौ वैश्रवणात्मजौ सुरमुनेः शापाच्चिरं सालतां
तथ्यं तस्य वचः पुरा विरचयन् देवो चकारेश्वरः ।
सर्वेषां फलदायकोऽहमिति यो लोकस्य सन्दर्शय-
ञ्शिष्टेभ्यो बदरीफलानि समदात्तस्मै नमः स्तान्मम ॥ ३८ ॥

निर्जगाम स जवाद् व्रजादयं
मज्जनाय खलु सज्जनाग्रणीः ।
अञ्जराजतनयाजनिस्थले
तत्पयस्यखिलरञ्जनोत्सुकः ॥ ३९ ॥

सलिलमवजगाहे सैष पौषौरसेय-
मसि ।कमलकेळीकालसङ्क्रान्तनीलम् ।
सुरवरललनाश्रीगीत्युपाध्यायशिक्षा
इव समनुपठन्तः सन्ततं यत्र केकाः ॥ ४० ॥

ततो हरिद्वारमवाप सोऽयं
द्वारं हरेस्तत्रवसद्द्विजाग्र्यान् ।
उत्तारयन्नासदुदादरेण
गङ्गोत्तरीं तीर्थपदान्तरङ्गः ॥ ४१ ॥

अथ चायं चतुराननश्चतुराननवत् सरस्वतीसङ्गतां, दुर्गामिव पञ्चास्यसन्धृतां, दितिमिवादित्यसुताश्लिष्टां, ज्योत्स्नामिव सागरानन्दिनीं, योगसिद्धमुनिवृन्दिवत् सकाशीभवदात्मस्वरूपां, नक्षत्रमालामिवाब्जोल्लसन्तीं, दिवसश्रियमिव हंसाभिरामां, जम्बूसरितमिव गाङ्गेयप्रसुवं, भारतवर्षवत् प्रचकासत्कोकनदां, गीर्वाणपुरपण्याङ्गनामिव सदा सुरतरूपशोभितां, आवर्तव्रातकैतवान्निह्नुतस्वपौरुषजह्नुमुनिकर्णशष्कुलीप्रवेशं परिसूचयन्तीमद्यतनानां निजतीरायतनानां शुद्धितरभगीरथकीर्त्यर्थसम्पूर्णतया मुद्रितामिव स्फाटिकपेटिकामभिवीक्ष्य तरङ्गिणीं गीर्वाणानामेवमवर्णयत् ॥

यदीयपानीयतरङ्गमाला-
संसक्तपीयूषगभस्तिबिम्बम् ।
ध्रुवं बतामंसत वाण्यभीक-
त्रिविक्रमाङ्घ्र्यर्पितसारसानि ॥ ४२ ॥

यन्नीरनीरन्ध्रनितान्तरिङ्खत्-
स्वच्छीभवद्भङ्गपरम्परासु ।
लसन्ति ताराप्रतिबिम्बकानि
मुक्ताभ्रमादैक्षत कोऽपि नूनम् ॥ ४३ ॥

यदापगागारचकोरशावाः
शैवालिभङ्गेषु सुधांशुबिम्बम्।

खिद्यन्ति मुग्धाः प्रसमीक्ष्य नूनं
तमोनिगीर्णोऽयमिति स्म युद्धे ॥ ४४ ॥

यदूर्मिमालासु विलक्ष्यमाणो
नभोमणिर्म्लानकुशेशयानि ।
काले समाश्वासयितुं प्रियाणि
व्यराजत प्राप्त इव ध्रुवं हि ॥ ४५ ॥

सेयं हि गङ्गा विलसत्तरङ्गा
गाङ्गेयपङ्केरुहराजदङ्गा ।
विद्रावितस्नातृजनाघपूगा
सम्प्राप्तगोविन्दपदाब्जसङ्गा ॥ ४६ ॥

ततोऽयमनुज्ञाप्य द्विजपुङ्गवान् निमज्य तस्यां समक्त्यु-न्मेषं तत्तीरराजमानपङ्कजतुलसीकुसुमादिभिरभ्यर्च्य भगवन्तं रामभद्रं सन्निधाने तस्य समगायत सुरतटिनीमहिमाविवरणकारणं ध्रौवादिकं चित्रं चरित्रम् ॥

बदरीवनमाययौ ततोऽस्या
नरनारायणसेवनोत्सुकः ।
अवगाहितुमेष तत्र भान्तीं
विबुधानां तटिनीमटीकत ॥ ४७ ॥

विपश्चिकातापससेव्यमानं
नारायणं चाथ नरं स्वनाथम् ।
नत्वा तपस्यन्तमयं महान्तं
नितान्तमानन्दितमानसोऽभूत् ॥ ४८ ॥

उवोख केदारमुदारचेता
मुदा स नारायणमादिदेवम् ।
नरं च संस्तूय विचित्रगीर्भि-
स्तं तत्प्रसादं समवाप्य मूर्ध्ना ॥ ४९ ॥

(नूनंसाग्, तरतिम्, तरतिम्, ननुर्, जयनरवरण्, जय-नरवरण्, नूनंसाग्)

यथा—

भ्राजन्ते भ्रमदलिकुलमुदितविहगमधुर-
विरुतरुचिरा वाप्यः
हंसैः संक्षुभितकमलकुवलयविलुळित-
विमलसुसलिलाः पूर्णाः ।
वात्येष प्रमदवनपवनहृत[1]त[2]रु-
कुसुमसुरभिरनिलो मन्दः
प्राप्तोऽयं समदति! समदमदन[3]जित-
मनुजहृदयदयितः कालः ॥

दण्डकाः ॥ ११४ ॥

अधिकारोऽयम् । इत ऊर्ध्वं यद्वक्ष्यामः तद्दण्डक-संज्ञं भवति।

स्गूण्र्ण्श्री जलदः ॥ ११५ ॥

जलदाख्यो दण्डको भवति प्रतिपादं स्गूण्र्ण्श्री (गङ्गास्, नूनंसाग्, नूनं साग् ननुर्, जयनरवरण्, धीवराश्, ननुर्, धीवराश्) इत्यक्षरविन्यासो भवति चेत्

मध्ये द्वृद्ध्या मेघ-पिपीलिका-पणव-करभ ललितानि ॥ ११६ ॥

१. Mss. जवरत for हृत.

२. Mss. तरुगगकुसुम.

३. Mss. omit जित.

जलदाख्यस्य दण्डकस्य मध्ये दकारवृद्ध्या यथाक्रमं मेघः पिपीलिका पणवः करभः ललितमिति एते पञ्च दण्डकानि भवन्ति। एतदुक्तं भवति—जलदस्यैकः पादः त्रिंशदक्षरः, मेघस्य चतुस्त्रिंशदक्षरः, पिपीलिकाया अष्टत्रिंशदक्षरः, पणवस्य द्विचत्वारिंशदक्षरः, करभस्य षड्चत्वारिंशदक्षरः, ललितस्य पञ्चाशदक्षरः। एवं षट् दण्डका भवन्ति। तेषामन्त्यस्योदाहरणम्—

येन प्रांशुं क्रौञ्चस्याग्रं मणिकनकविमलनवरजत-
पटलहरवृषभसकलशशिकिरणकुमुदसदृशं
सिताम्बुजसन्निभम्

भिन्नं शक्त्या लीलावत्यास्तटविटपकुटचसितपन-
सतिमिशधवखदिरतिलकतरुगहनललित-
शिखरं लतागृहसङ्कटम्।

क्रीडाभूमिर्गन्धर्वाणां गजगवयमहिषरुरुपृषतशरभ-
मृगमिथुनपरभबहुविविधशकुनिचारितं
विपद्द्रुतकिन्नरम्[1]

सोऽरीन् वोऽद्रिर्देवो रोषात्तृषित इव पिबतु दहन इव
दहतु पवन इव वहतु तरुणरविसदृश-
वदनो मयूरवरध्वजः॥

तदधिको निचितः ॥ ११७ ॥

तेभ्योऽधिकस्तज्जातीयो निचिताख्यो दण्डको भवति।

चण्डवृष्टिप्रयातो णीश्शीश्शी ॥ ११८ ॥

चण्डवृष्टिप्रयातो नाम दण्डको भवति प्रतिपादं णीश्शीश्शी (जयनरवरणू, धीवराशू, धीवराशू, धीवराशू, धीवराशू ,धीवराशू , धीवराशू, धीवराशू) इत्यक्षरविन्यासो भवति चेत् । यथा—

मुदितजनपदाकुला स्फीतसस्याकुला
भूतधात्री भवन्तं समभ्यर्चति
द्विरदकरविलुप्तहिन्तालतालीवनास्त्वां
नमस्यन्ति विन्ध्यादयः पर्वताः ।
स्फुटितविमलशुक्तिनिर्गीर्णमुक्ताफलै-
रूर्मिहस्तैर्नमस्यन्ति वः सागराः
मुदितजनपदैस्समाकीर्णकूलाश्च ते कीर्त-
यिष्यन्ति वर्णं महानिम्नगाः ॥

श्वृद्ध्यार्णवा-र्ण-प्लव-व्याल-जीमूत-लीलकरोद्दामासिंह-समुद्र-भुजङ्गाः ॥ ११९ ॥

चण्डवृष्टिप्रयाताख्यस्य दण्डकस्य पादे पादे क्रमशः शकार(धीवराशू) वृद्ध्या अर्णवः, अर्णः, प्लवः, व्यालः, जीमूतः, लीलाकरः , उद्दामा , सिंहः , समुद्रः , भुजङ्गः , इत्येते दश दण्डका भवन्ति । तत्रार्णवस्य पादे णकारात् परतः अष्टौ शकारा भवन्ति , अर्णस्य नव, प्लवस्य दश , व्यालस्य एकादश , जीमूतस्य द्वादश , लीलाकरस्य त्रयो-

1. Mss. 'पदा समाकीर्ण'

दश, उद्दाम्नश्चतुर्दश, सिंहस्य पञ्चदश, समुद्रस्य षोडश भुजङ्गस्य सप्तदश। एवमेते च दश दण्डका भवन्ति।

शेषाः प्रचिताः ॥ १२० ॥

उक्तेभ्यो दण्डकेभ्यः शकारवृद्ध्या येऽधिका दण्डकाः प्रचिता नाम ते भवन्ति। येषां पादे पादे अष्टादश एकोन विंशतिः ततोऽधिका वा शकारवृद्ध्या भवेयुश्चेत्त एव शेषाः प्रचिताख्या दण्डका भवन्तीति। तत्रार्णवो यथा—

पर इह न करिष्यति त्वन्निमित्तं शुभं नापि चान्यैः
कृतं लभ्यते स्वश्रमो भुज्यते।
न च भवति कृतस्य नाशो न चैवाकृतस्यागमो
विद्यते बीजमुप्त्वा फलं प्राप्यते।
कृतमिति हृदयेन तुष्टेन मृत्युः सुखं दृश्यते न
ह्यकृत्वा भवेत्स्वस्ति तस्मिन् भवे
कुरु कुशलमलं प्रमादेन गृह्णीष्व दीपं प्रवेष्टव्यमेके-
न दीर्घं ह्यनन्तं तमः॥

अर्णो यथा —

शरणमनलसूर्यवायुप्रतीघातनष्टार्जवं तर्षभाच्छेत्तुमन्नं
क्षुधं शौचमार्गं मलं
वसनमपि शरीरकौपीनदोषप्रतिच्छादनार्थं गतिक्ले-
शनाशाय यानादयो विस्तराः।
शिशिरशमनमुष्णमुष्णप्रणाशाय शीतो विधिर्गात्र-
विश्रान्तिहेतोश्च शय्यासनापाश्रयाः

पुरुषगुणमिमं परित्रातुमाचैश्चिकित्सेयमारभ्यते यत्र
भोगार्थसंज्ञा नृणां जायते ॥

प्लवो यथा —

जलनिधिवसनापि भूर्यस्य तस्यैक एवाधिवासः पुरं
तत्र चैकं गृहं तद्गृहे चैक एवालयो
निवसनयुगमेकमेवात्मकौपीनशाठ्यर्धमेकैव[1] शाला-
निवृत्तिप्रवृत्त्योस्तु[2] तत्सर्वथा मुक्तभावः सुखम्[3] ॥

शेषाणामुदाहरणानि ग्रन्थविस्तरभयान्नोदाहृतानि । तान्यपि काव्येषु सूत्रालङ्कारादिषु द्रष्टव्यानि ॥

इति जानाश्रय्यां छन्दोविचित्यां
समवृत्ताध्यायश्चतुर्थः ॥

---

१. Mss. 'शाशार्थमेकैव'
२. Mss. 'निवृत्तिवृत्तितत्सर्वथा'
३. The latter half of the verse is not seen in the Mss.

अथ पञ्चमोऽध्यायः ॥

वृत्तान्युक्तानि । इदानीं जातयो वक्ष्यन्ते । वक्ष्यति भवान् जतिरिति । इदं तावदुच्यतां जातिवृत्तयोः किं नानात्वमिति । अत्रोच्यते —

जातिरेकाप्यनेकस्मिञ्छन्दसि भवति वृत्तमेकमेकस्मिन्नेव ॥ १ ॥

इदमनयोर्नानात्वम् । सात्वनेकस्मिन् छन्दसि वर्तमानापि मात्रालक्षणतस्तुल्यजातीयैव । तत एवोच्यते जातिरिति ।

अथ वैतालीयप्रकरणम् ।

तत्र तावत् —

वैतालीयं चतुर्दशायुजि ह्राः ॥ २ ॥

वैतालीयं नाम जातिरुच्यते । तस्य वैतालीयस्यायुजि प्रथमतृतीययोः पादयोश्चतुर्दश हकारा भवन्ति ।

युजि षोडश ॥ ३ ॥

तस्यैव युजि द्वितीयचतुर्थयोः पादयोः षोडश हकारा भवन्ति ।

भ द्वयोरन्ते ॥ ४ ॥

द्वयोरयुग्युजोः पादयोरन्ते भकारो भवति । तद्यथा—

अभिनादितमम्बराद् घनै-
र्घननादैः प्रतिगर्जितो गजः ।

१. This sutra and its vṛtti are missing in ख.
२. 'पादयोरन्ते हकारो भवति— तद्यथा' क.

गजरावितकन्दरो गिरि-
गिरितुल्यैरभिषिच्यतेऽम्बुदैः ॥

भा चौपच्छन्दसिकम् ॥ ५ ॥

तस्यैव द्वयोरयुग्युजोः पादयोरन्ते गुरुश्चापरो भवति (चेदौपच्छन्दासिकं नाम भवति)। तद्यथा—

सलिलं विमलं तमालनीलं
स्वनिलोद्धूततरङ्गतुङ्गशृङ्गम्।
विलसत्कलहंसलोलमालं
विलसत्कोकनदं मनो दुनोति ॥

आपातलिका ॥ ६ ॥

तस्यैव वैतालीयस्यान्ते द्वयोरयुग्युजोः पादयोः भकारो (रौतिमयूरोऽ)भवति चेदापातलिका नाम भवति। यथा—

अम्भोदानामसितानां
श्रुत्वा शब्दं सन्ततबर्हैः।
अम्भोभिरमन्दगतीना-
मुद्ग्रीवोऽयं रौति मयूरः ॥

द्वे[3] उपजाती ॥ ७ ॥

जातौ औपच्छन्दसिकापातलिके उपजाती इत्यु-

१. 'च.' ग.
२. Mss. 'भारान्म'
३. Mss. omit this sūtra.

च्येते। वैतालीयजातिमाश्रित्य जातत्वात् वैतालीयस्यान्तलक्षणमुक्तम्। इदानीमादिलक्षणमुच्यते।

नादौ परेण युग्लघवः सार्धम्॥ ८॥

सोपजातेर्वैतालीयस्यादौ अयुक्पादे षड् लघवः। युक्पादे अष्टौ लघवः। तत्र परेण लघुना सार्धं युग्लघुर्न भवति। उभावपि मिश्रयित्वा एको गुरुर्न प्रयोक्तव्य इत्यर्थः।

युक्पादे न णः॥ ९॥

सोपजातेर्वैतालीयस्यादौ युक्पादे नैव णकारो भवति। अयुक्पादे न विधिर्न प्रतिषेधः। तस्मात्तत्र भवति वा न वा। यथा —

जलधरपटलान्तनिस्सृत-
स्समये दीप्तमयूखमण्डलः।
प्रविततातिमिरप्रभेदको[1]
नभसः क्रुद्ध इवोत्थितो रविः॥

अयुजि यस्मिन् पक्षे णकारो न भवति तस्योदाहरणं यथा —

मृदुतामुपयान्ति मारुताः
प्रलयं यान्ति शनैर्वलाहकाः।
पुनरागतहंससारसा
शरदाक्रामति वार्षिकीं श्रियम्॥

१. 'रप्रभेदकक्षम' ग.

अथ षष्ठोऽध्यायः ।

ग्रहणद्वयमुक्त्वेदानीं पौर्णमास्यामुपदिदिक्षुराह —

विक्षेपज्यां क्षपाभर्तुरक्षज्याक्षुण्णविग्रहाम् ।
लम्बकेन हरेल्लब्धं विशोद्ध्यं तत्स्फुटेन्दुतः ॥ १ ॥

अनेन दर्शनस्फुटमेकमुच्यते । कथम् । पूर्वपक्षप्रतिपदि चन्द्रस्फुटमपराह्णकरणमुक्तेन प्रकारेण चतुःस्फुटं कृत्वा तदनन्तरं इदं दर्शनस्फुटमारभ्यते । तद्यथा तदानीमेव पातस्फुटं कृत्वा स्फुटचन्द्रात्पातं विशोध्य दिशमुपलक्ष्य भुजाज्यामानीतां खत्रिघनेन हत्वा व्यासार्धेन विभज्य यत्फलमवाप्यते तद्विक्षेपज्या नाम सर्वदा भवति । तां विक्षेपज्यां क्षपाभर्तुः निशानाथस्याक्षज्यया हत्वावलम्बकेन विभज्य यत्फलमिह गृह्यते तत्स्फुटेन्दोः शोध्यते क्षिप्यते च ॥ १ ॥

कदा शोधनं कदा क्षेपणमित्यत आह —

उदये सौम्यविक्षेपे देयमस्तमये सदा ।
व्यस्तं तद्याम्यविक्षेपे कार्यं स्यादुदयास्तयोः ॥ २ ॥

उदयकरणे सौम्यविक्षेपे सति शोध्यम्, अथापराह्णकरणे सौम्यविक्षेपे सति देयं विक्षेप्यमित्यर्थः । अथ याम्यविक्षेपे सति व्यस्तं भवति विपरीतं भवतीति यावत् । एतदुक्तं भवति — उदयशोधनक्षेपणद्वयं क्षेपणशोधनं[1] स्यादिति ॥ २ ॥

एवमेकं लिप्तादिसंस्कारदर्शनस्फुटमुक्त्वेदानीं द्वितीयं दर्शनस्फुटमुपदिदिक्षुराह--

त्रिराश्यूनोत्क्रमक्षुण्णां तत्कालक्षिप्तिमाहताम् ।
क्रान्त्या परमया भूयो हरेद्व्यासदलस्य ताम् ॥ ३ ॥

कृत्वा लब्धकलाः शोध्या विक्षेपायनयोर्दिशोः ।
तुल्ययोर्व्यत्यये क्षेप्यं शीतांशौ[1] तत्फलं सदा ॥ ४ ॥

एवं स्फुटेन्दुं प्रतिराश्यं तस्मात् स्फुटेन्दोरयनस्य दिशमुपलक्ष्य पुना राशित्रय-

---

१. S_1 शोधनक्षेपणम् .

१. B शीतांशोः.

मपनीय तस्मात् भुजोत्क्रमज्यामादाय तया पूर्वानीतां विक्षेपज्यां प्रतिराशितां हत्वा तया विक्षेपज्यां गुणितां पुनरपि परमापक्रमज्यया हत्वा व्यासार्धकृत्या विभज्य यत्फल-मवाप्यते तल्लिप्तादिफलं स्फुटेन्दोः शोध्यं क्षेप्यं च भवति । कदा क्षेप्यं कदा शोध्य-मिति चेत् विक्षेपायनदिशौ यदि तुल्ये स्यातां तत्र शोध्यं, अथ भिन्ने स्यातां तदा क्षेप्यम् । कस्मिन् शोधनक्षेपणं क्रियत इति चेत् शीतांशावेव । एतदुक्तं भवति दर्शनस्फुटद्वयमकृत्वा द्रष्टुमशक्यमिति । किमिदं दर्शनस्फुटमिन्दोः स्फुटगतिज्ञानार्थमुत (दर्शनार्थम्) । दर्शनार्थमेव । अत एव ग्रहणविषये स्फुटद्वयमिदं न विधीयते । अन्येषामङ्गारकादीनामपि दर्शनस्फुटद्वयसंस्कारः कर्तव्य एव । तदर्थमुत्तरत्र तेषां पाता विक्षेपाश्च पठ्यन्ते ॥ १—४ ॥

अथेदानीं दर्शनकालावगमनायाह —

एवं कर्मक्रमात्सिद्धो दृश्यतेऽन्तरितः शशी ।
भागैर्द्वादशभिस्सूर्याद्व्यभ्रे नभसि निर्मले ॥ ५ ॥

एवं षड्भिः स्फुटैः संस्कृतश्चन्द्रमाः सूर्याद् द्वादशभिः कालभागैः अन्तरितो विगतघनपटले गगनतले निर्मले दृश्यते । के पुनरिह कालभागा इति कथ्यन्ते । ये नाडिकायामेकायां षड्भागाः प्राच्यामुद्गच्छन्ति ते कालभागा इत्युच्यन्ते । तेषां कथमवगतिरिति चेत् अस्तमयकरणानीतस्फुटसूर्यस्याभुक्तप्राणान् पूर्वोक्तमार्गेणानीय चन्द्रस्य पुनर्भुक्तगतभागप्राणानपि तद्वदानीय रव्यभुक्तप्राणसंयोगे कृते सति तान् सर्वान् प्राणान् षड्भिः षष्ट्या च विभज्य या घटिकाः षष्ट्या विनाडिकासङ्ख्यया गृह्यन्ते तादृग्विधाभ्यां घटिकाभ्यां द्वाभ्यां सूर्यादन्तरितक्षेत्रगतः चन्द्रमा दृश्यत इत्यर्थः । एतदुक्तं भवति — दशभिर्विनाडिकाभिः कालभाग एको भवतीति ॥ ५ ॥

अथेदानीं शृङ्गोन्नतिमुपदिदिक्षुः पूर्वं तदर्थं चन्द्रसितासितमानमवगन्तुमाह —

अन्तरांशोत्क्रमां जीवां स्फुटेन्दुव्यासताडिताम् ।
षण्णगाष्टरसैर्हृत्वा सितमानं पदाधिके ॥ ६ ॥

क्रमज्यामधिकोत्क्रमां त्रिज्यया योज्य तत्सितम् ।
आनयेदसितेऽप्येवं क्रमक्रमतोऽसितम् ॥ ७ ॥

---

१. S1 omits this word.

२. A B D जीवास्फुटेन्दु.

अस्तमयकालानीतसूर्यं चन्द्रं च स्फुटौ कृत्वा स्फुटेन्दोः स्फुटसूर्यमपोह्य शेषं राशित्रयादर्वागन्तरांशात् लिप्तीकृत्य मत्व्या विभज्य उत्क्रमज्यामादाय तया स्फुटेन्दुलिप्ताव्यासं पूर्ववदानीतं हत्वा गोलव्यासेन षण्णगाष्टरस इत्यनेन विभज्य यत्फलमवाप्यते तल्लिप्तादिसितमानं भवति । एवं सितानयनं पदादूनेऽर्कचन्द्रान्तरे पुनः पदाधिके सति राशित्रयं पूर्वं त्यक्त्वा द्वितीयपदात्क्रमज्यां पूर्ववत्पूर्वं गृहीत्वा त्रिज्यया तां संयुज्य तयेन्दुलिप्ताव्यासं हत्वा तेनैव षण्णगाष्टरसेन विभज्य सितमानेतव्यम् । किमिह सितासितमित्युच्यते । चन्द्रस्य पूर्वपक्षेऽहरहः शुक्लवृद्धिरित्यर्थः । तस्मात्पदाधिकेऽन्तरे क्रमज्यया व्यासार्धयुक्तया सितानयनमुच्यते । अर्कात् षड्राश्यन्तरगतस्येन्दोः सितपूर्णबिम्बत्वात् । एतदुक्तं भवति—अष्टम्याः परतः क्रमज्यायुतत्रिज्यया सितमानीयत इति । एवमपरपक्षेऽप्यसितानयनमिष्यते । कथम् । अपरपक्षे तावत् पूर्वपक्षातीतराशिषट्कं चन्द्रादर्कस्फुटहीनादपोह्य तृतीयपदादुत्क्रमज्यां गृहीत्वा तया चन्द्रबिम्बं हत्वा षण्णगाष्टरसेनैव भक्त्वा यदवाप्यते तदसितं नाम भवति । पुनस्तत्रैव पदाधिके सति तत्रोत्पन्नक्रमज्यायुतत्रिज्यया च तदानीयते । तदर्थमुक्तम् —

'आनयेदसितेऽप्येवमुत्क्रमक्रमतोऽसितम् ।'

इति ॥ ६-७ ॥

एवं पूर्वापरपक्षयोः सितासितानयनमुक्त्वेदानीं चन्द्रशङ्कग्रमप्यानेतुमाह —

अन्तरालासुभिः कार्यश्चन्द्रभुज्याचरासुभिः ।
शङ्कुः शङ्कग्रमप्यस्मात् साध्यते नित्यदक्षिणम् ॥ ८ ॥

चन्द्रादित्यान्तरासून् पूर्ववदानीय तैश्चन्द्रभूज्याचरासुभिश्च त्रिप्रश्नाध्यायविहितन्यायेनैव शङ्कुशङ्कग्र आनेतव्य इत्यर्थः । कथं शङ्कग्रानयनं अष्टम्याः परतः पदाधिकत्वात्तदन्तरासूनाम् । तत्रैवं कर्तव्यम् — अस्तमयकालानीतप्राग्विलग्नचन्द्रान्तरासुभिः शङ्कुरानीयते । कुतः । शङ्कानयनमुभयकपालविषये गतगन्तव्यासुभिर्विहितत्वात् ॥ ८ ॥

चन्द्रभूज्याचरासूनामानयनं कथमित्यत आह —

विक्षेपक्रान्तिधनुषोः भिन्नतुल्यस्वदिग्वशात् ।
विश्लेषयोगजा जीवा सेन्दोः क्रान्तिस्ततः स्फुटा ॥ ९ ॥

---

१. ६८७६.
२. S1 पूर्वपक्षानीत.
३. S2.3 पदाभ्यधिकत्वात्तदन्तरासूनाम् .
४. S1. चन्द्रभुजज्या.

स्वाहोरात्रादयस्साद्व्या व्यासार्धाभिहतां हरेत् ।
लम्बकेन शशिक्रान्तिमिन्द्वग्रा तत्र लभ्यते ॥ १० ॥

यस्मिन् काले चन्द्रस्फुटं क्रियते तस्मिन्नेव काले पातस्फुटमपि कृत्वा तस्मादेव चन्द्रात्पातं विशोध्य दिशमुपलक्ष्य प्राग्वद्विक्षेपज्यामानीय काष्ठीकृत्य पुनस्तस्मादेव चन्द्रादादित्योक्तन्यायेन सौम्यदक्षिणामिष्टापक्रमजीवां चानीय काष्ठीकृत्य तयोः काष्ठयोर्योगं वियोगं वा कृत्वा तुल्यभिन्नस्वदिग्वशात् पुनस्तस्माज्जीवा या गृह्यते सेह चन्द्रस्यापक्रान्तिरित्युच्यते । अथ तस्मात् स्वाहोरात्रादयस्साद्व्याः । कथमिति चेत् तां चन्द्रेष्टापक्रान्तिं प्रतिराश्य वर्गीकृत्य व्यासार्धवर्गादपोह्य यन्मूलं गृह्यते तत्स्वाहोरात्रार्धं भवति । पुनस्तामपक्रान्तिमक्षज्यया हत्वा लम्बकेनैव विभज्य क्षितिज्या नाम गृह्यते । पुनस्तामेव क्षितिज्यां प्रतिराशीकृत्य व्यासार्धेन हत्वा स्वाहोरात्रदलेन स्वेनैव विभज्य यत्फलं तच्चरजीवार्धं स्यात् । तत्काष्ठीकृत्य बिन्दोश्चरासवो भवन्ति । तैरेवं विधैः चन्द्रशङ्कुरानीयत इत्यर्थः । पुनरिन्द्वग्रापि चन्द्राक्रान्ति व्यासार्धेन हत्वा लम्बकेन विभज्य यदवाप्यते सेह स्यात् । तस्यास्तावद्दिगपि चन्द्रस्य क्रान्तिवशात् सौम्यदक्षिणा भवति ॥ ९-१० ॥

एवं चन्द्रशङ्कुशङ्क्वग्रचन्द्राग्राश्च समानीयानष्टं विन्यस्य बाह्वानयनार्थमाह —

शङ्क्वग्रतुल्यदिक्त्वे स्याद्युक्तं विश्लिष्टमन्यथा ।
अर्काग्रा तद्विशेषः स्यात् तुल्यदिक्त्वेऽन्यथा युतिः ॥ ११ ॥

एवं सिद्धो भवेद्बाहुरर्कात्सम्यक् प्रसार्यते ।
कोटिसूत्रं तदग्रोत्थमत्स्यपुच्छास्यनिस्सृतम् ॥ १२ ॥

इन्द्वग्रायां शंकग्रतुल्यदिक्त्वे सति युक्त्वा अन्यथा विश्लेषं वा कृत्वा पुनः स्फुटादित्यात् भुजाज्यामादाय परमापक्रमज्यया हत्वा लम्बकेन विभज्यार्काग्रामानीय दिशं चोपलक्ष्यार्काग्रया तुल्यदिक्त्वे विश्लेषं भिन्नदिक्त्वे सति योगं वा कृत्वा य एवं सिद्धो भवेत् बाहुरिति स उच्यते । अर्कात्सम्यक् प्रासार्यत इत्यादि यदुच्यते तत्कृ [illegible] लेखनमार्गं इत्यवगन्तव्यम् । तत्कथम् । बाहुः कोटिश्च सितमानं चन्द्रबिम्बं च चत्वारि साधनान्यधीकृत्याङ्गुलान्यापाद्य समायामवनौ पूर्वपश्चिमदिग्भागे

1. Mss. इन्द्वग्रम् .
2. Ši. 2 तत्काष्ठीकृतबिन्दोः.

बिन्दुमेकमर्क इति संकल्प्य ते[1] कृत्वा तस्मादर्कात् दक्षिणेनोत्तरेण वा स्वदिग्वशाद्बाहुप्रमाणपरिकल्पितसूत्रं नीयते । पुनस्तदग्रे बिन्दुं कृत्वा तस्माद्बिन्दोर्दक्षिणोत्तरबिन्दू तुल्यान्तरौ कृत्वा ताभ्यां बिन्दुभ्यां पूर्वापरायतं मत्स्यमालिख्य पुच्छानुसारि सूत्रं दूरतो नीत्वा तस्मिन्सूत्रे कोटिप्रमाणप्रमितं सूत्रं बाह्वग्रबिन्दोरादिपूर्वतो नीत्वा तदग्रे बिन्दुरेको ग्राह्यः । अत इदमुक्तम् —

'कोटिसूत्रं तदग्रोत्थमत्स्यपुच्छास्यनिःसृतम्' इति ॥ ११–१२ ॥

का पुनरिह कोटिरिति गृह्यत इत्यत आह —

चन्द्रशङ्कुमिता कोटिः पूर्वतो नीयते स्फुटा[2] ।
तद्भुजामस्तकासक्तं कर्णसूत्रं विनिर्गतम् ॥ १३ ॥

चन्द्रस्य यः शङ्कुरानीयते स पुनरिह कोटिरित्युच्यते । सेह बाह्वग्रसम्पादितमत्स्यमध्यस्थबिन्दुतः[3] पूर्वतो नीत्वा तदग्रे पूर्वापरसूत्रे प्रथमपरिकल्पिते बिन्दुं कृत्वा पुनरर्कबिन्दोः कोट्यग्रबिन्दुप्रापि तिर्यक्कर्णसूत्रं प्रसार्य कर्णकोट्यग्रसंयोगबिन्दुं कृत्वा तस्माद्बिन्दोस्समन्ततः चन्द्रबिम्बमालिख्यते ॥ १३ ॥

तदर्थमाह —

कर्णकोट्यग्रसम्पाते केन्द्रेणालिख्यते शशी ।
कर्णानुसारतस्तस्य सितमन्तः प्रवेश्यते ॥ १४ ॥

एवं कर्णकोट्यग्रयोगबिन्दुं पूर्वं कृत्वा चन्द्रबिम्बव्यासलिप्तार्धाङ्गुलप्रमाणविदारितकर्कटकैकशृङ्गं तस्मिन् बिन्दौ विन्यस्य वृत्तमालिखितं चन्द्रबिम्बं भवति । तस्मिन् चन्द्रबिम्बं कर्णानुसारि[4] सितमानं बाह्यवृत्तादन्तः कर्णसूत्रं प्रवेश्य तदग्रे बिन्दुं कृत्वा पुनः शृङ्गद्वयबिन्दुग्रहणार्थमाह —

कर्णः[5] पूर्वापरे काष्ठे तन्मत्स्याद्दक्षिणोत्तरे[6] ।
दक्षिणोत्तरयोर्बिन्दू[7] तृतीयस्सितमानजः ॥ १५ ॥

---

१. S1.3 omit this word.
२. A B F H स्फुटम् .
३. S1 मत्स्यस्थ.
४. S1 वृत्तमालिख्य तच्चन्द्रबिम्बं भवति । तच्चन्द्रबिम्बकर्णानुसारि.
५. A D कर्णात् पूर्वापरे.
६. C H तन्मत्स्यात्सौम्यदक्षिणे.
७. C D बिन्दुस्तृतीयः.

सितमानबिन्दुयुतं कर्णसूत्रे यथा चन्द्रबिम्बं दृश्यते तत्तस्मिन् पूर्वापरकाष्ठे स्याताम् । काष्ठाशब्दोऽत्र दिक्पर्याय', पूर्वापरदिशाविति यावत् । कथं पुनश्चन्द्रबिम्बे तिर्यगवस्थितस्य कर्णस्य पूर्वापरदिग्विधानम् । उपचारादुच्यते । तन्मत्स्याद्दक्षिणोत्तरे इति यदुच्यते तदेवं गृह्यते । कुतः । कर्णसूत्रस्य वृत्तस्य च यत्र योगद्वयं दृश्यते तत्र बिन्दुद्वयं कृत्वा ताभ्यां बिन्दुभ्यां चन्द्रबिम्बमध्ये दक्षिणोत्तरायते मत्स्यमालिख्य तन्मत्स्यमुखपुच्छानुसारि सूत्रं बाह्यवृत्तान्तं प्रसार्य बाह्यवृत्तयोगद्वयबिन्दू कृत्वा यौ बिन्दू एवं गृहीतौ तावुभौ शृङ्गाग्रबिन्दू स्याताम् । तयोस्तृतीयो बिन्दुः सितमानजो भवति । तैस्त्रिभिर्बिन्दुभिः शृङ्गोन्नतिरालिख्यते ॥ १५ ॥

तदर्थमाह —

त्रिशर्कराविधानोत्थमत्स्यद्वयविनिस्सृतम् ।
बिन्दुत्रयशिरोग्राहि पश्चाद्वृत्तं समालिखेत् ॥ १६ ॥
वृत्तान्तर[1]सितोद्भासि शृङ्गोन्नत्या प्रदृश्यते[2] ।
ज्योत्स्नाप्रकरनिर्धूतध्वान्तराशिर्निशाकरः ॥ १७ ॥

त्रिशर्कराविधानमिति यदिहोच्यते तत्पूर्वमेवोपदिष्टं चन्द्रग्रहणे । कथम् ।

'ग्रग्रासमध्यमोक्षाणां बिन्दूनां मस्तकानुगम् ।
मत्स्यद्वयोत्थवृत्तं यद्वर्त्म स्यात् ग्राहकस्य तद् ॥'

इति यथा ग्राहकवर्त्मपथ उपदिष्टः तद्वदिहापि मत्स्यद्वयमालिख्य मत्स्यद्वयसूत्रयोगात् बिन्दुत्रयशिरोग्राहि यदालिख्यते तस्य बिम्बपरिधेरपि यदन्तरं यस्मिन् भागे यावत्योन्नत्या यथा दृश्यते तस्मिन्दिने तथा पश्चिमः स्यात् । पूर्वपक्षेऽपरकपाले निर्मलेऽम्बरे ज्योत्स्नाप्रकरनिर्धूतध्वान्तराशिर्निशाकरश्चन्द्रो दृश्यत इत्यर्थः ॥ १६–१७ ॥

एवं पूर्वपक्षेऽपरकपाले शृङ्गोन्नतिस्वरूपं प्रदर्श्य प्राक्कपाले शृङ्गोन्नतिविशेष[4]प्रदर्शनार्थमाह —

प्राक्कपाले शशाङ्कस्य लग्नेन्द्वर्कादिभिः स्फुटम्[5] ।
साध्यो बाहुरनादिष्टमपराभिमुखं स्मृतम् ॥ १८ ॥

---

१. D वृत्तान्तरे.
२. C प्रदृश्यते.
३. A B H प्रसर, C D प्रसार.
४. S_1 विशेष.
५. C H स्फुटः.

अष्टम्या ऊर्ध्वमपराह्णकाले प्राक्कपालविषयस्थे चन्द्रे अपराह्णकालानीतसूर्ये राशिषट्कं प्रक्षिप्योदयलग्नमापाद्य तस्मादुदयलग्नभुक्तभागाच्चन्द्रलग्नभुक्तभागावधिकः प्राणानुत्क्रमेण गृहीत्वा तैः शङ्कुमानीय ततः शङ्क्वग्रमपि नित्यदक्षिणमानीय राशिक्रान्त्या पुनरिन्द्वग्रामप्यानीय पूर्ववद्योगं विश्लेषं वा कृत्वा तत्कालादित्यादर्काग्रामादाय तथा पुनर्भिन्नतुल्यस्वदिग्वशात् योगं विश्लेषं वा कृत्वा बाहुः साध्यते। अनेन तदानीतसितमानशङ्कुभ्यां च पूर्ववत् प्राक्कपाले शृङ्गोन्नतिरवगन्तव्या। अनादिष्टमपराभिमुखं स्मृतमिति यदुच्यते तदसितेनापरपक्षे सितवृद्धिरिव शृङ्गवृद्धिरुच्यते। कथमिति चेत्तदपराभिमुखं स्मृतमित्युक्तम्। तद्यथा — मण्डलार्धयुतार्कोच्चन्द्रस्य चान्तरांशैः पूर्ववदसितमानीयास्तलग्नचन्द्रान्तरप्राणैः शङ्कुं शङ्क्वग्रं चादाय तत्कालार्काग्रया चन्द्राग्रया च बाहुमापाद्य पुनस्समायामवनौ गोमयानुलिप्तायां प्राच्यां पूर्वमर्कबिन्दुं कृत्वा तस्माद्दक्षिणेनोत्तरेण वा बाहुसूत्रं प्रसार्य तदग्रोत्पन्नमत्स्यात् पश्चिमाभिमुखं सूत्रं दूरं नीत्वा तस्मिन् कोटिसूत्रमुन्नीय तदग्रे बिन्दुं कृत्वा तस्य समन्ततो बिम्बमिन्दोः कृत्वा कर्णसूत्रमपि बिम्बपर्यन्तं प्रसार्य तत्पूर्वापरवशाद्दक्षिणोत्तरसूत्रं कृत्वा शृङ्गद्वयबिन्दू कृत्वा तत्रासितमानं कर्णसूत्रे पश्चिमतस्तन्मण्डले प्रवेश्य तदग्रे बिन्दुं कृत्वा त्रिशर्कराविधानेनासितशृङ्गोन्नतिरालिख्यते। एवमपरपक्षे पश्चिमकपाले निशावसाने कथितम्। अथ तस्मिन्नेव पक्षे प्राक्कपालस्थे चन्द्रे अष्टम्याः परतः शृङ्गोन्नतिरुच्यते। कथम्। प्राग्विलग्नचन्द्रान्तरप्राणैः शङ्कुं शङ्क्वग्रं चादाय तत्कालचन्द्राग्राया शङ्क्वग्रस्य च दिग्वशाद्योगं विश्लेषं वा कृत्वा तत्कालार्काग्रया च पूर्ववद्विश्लेषं योगं वा कृत्वा बाहुमानीयान्यत्सर्वं पूर्ववदालिख्यासितशृङ्गोन्नतिरालिखितव्येति प्राक्कपालेप्येऽवमुक्तं भवति॥ १८॥

अथेदानीं पूर्वपक्षे दिवा कियता कालेन चन्द्र उद्गच्छतीत्येतत्प्रदर्शनार्थमाह —

मण्डलार्धयुतार्केन्दुविवरोत्पन्ननाडिकाः।
कृताविशेषकर्माणो दृश्यकालास्सिते स्फुटः॥ १९॥

मण्डलार्धशब्देन राशिषट्कमुच्यते। अपराह्णादित्यस्फुटे मण्डलार्धं प्रक्षिप्य प्राग्विलग्नमापाद्य चन्द्रमपि तत्काले कृत्वा चन्द्रप्राग्विलग्नान्तरालासूनादायाविशेषणं कृत्वा तावत्कालेनास्तमयकालात् पूर्वं अहन्युदेतीत्यवगन्तव्यम्। कथमन्तरालासुग्रहणं कथं वा विशेषकरणमिति चेद्वक्ष्यामः। अस्तमयकालानीतप्राग्विलग्नभुक्तप्राणान् पूर्व-

बदानीय तत्कालचन्द्रस्याभुक्तप्राणानपि तद्वदानीय तदन्तरालराशिप्राणानपि सर्वानेकी-कृत्य प्राणपिण्डमापाद्य प्रतिराश्य चन्द्रादित्यस्फुटभुक्तिभ्यां हत्वा तत्तद्धोरात्रासुराशिना विभज्य चन्द्रप्राग्विलग्नयोः लिप्तादिफलं विशोध्य पुनरपि तयोरन्तरप्राणपिण्ड-मादाय तेन प्राणपिण्डेन प्राग्वदिन्दुलग्नौ कृत्वा पुनःपुनरेवं यावदविशेषस्तावत् कृत्वा विशिष्टयोरिन्दुलग्नयोरन्तरप्राणपिण्डविशेषं कृत्वा तेनाविशिष्टेन दिनमानमूलं कृत्वा विशेषप्राणसङ्घान् षड्भिः षष्ट्या च विभज्य घटिकादिकालश्चन्द्रोदयकाल इत्युक्तं भवति । अथवात्राविशिष्टप्राणपिण्डमप्येव षड्भिः षष्ट्या च विभज्यारोप्यास्तमयकालात् प्राक् चन्द्रदर्शनकालस्तावदादेष्टव्यः । स एव स्फुटःकाल इत्युच्यते । अथवा चन्द्रोदय-कालमुदयकरणानीतार्केन्द्वोः अन्तरप्राणपिण्डमानीय तयोः स्फुटभुक्तिभ्यां हत्वा तद्-होरात्रासुराशिना विभज्य फलद्वयमुभयोः स्फुटयोः लिप्तादि प्रक्षिप्याविशिष्टयोरन्तर-प्राणपिण्डेन षड्भिः षष्ट्यारोपितेन विज्ञायादेष्टव्यः ॥ १९ ॥

अथेदानीं पौर्णमास्यां चन्द्रोदयकालमुपदिदिक्षुराह —

अर्केन्दुसमलिप्तात्वे पौर्णमास्यासमोदयः ।
प्रागेवाभ्युदितो हीनः पश्चादभ्यधिको रवेः ॥ २० ॥

पौर्णमास्यां मण्डलार्धयुतार्कस्येन्दोरपि केवलस्यास्तमयकरणानीतस्यान्तरं यदा न भवति तदा तयोस्समलिप्तात्वम् । तस्मिन् समलिप्तात्वे सति समोदयमिन्दोर्भवति । पौर्णमास्यां मण्डलार्धयुतात् अस्तमयकरणानीतचन्द्रस्फुटं हीनं चेदस्तमयात् प्रागेवा-भ्युदित इत्यवगन्तव्यम् । अथ तस्मादभ्यधिकस्फुटश्चन्द्रश्चेदस्तमयकालमतीत्य रात्रौ निशाकरोदयः सम्भवति । एतदुक्तं भवति — अर्कान्मण्डलार्धान्तरितस्य चन्द्रस्य पौर्णमासित्वात् मण्डलार्धयुतरविस्फुटादूनाधिकाभावे सति समोदयः सम्भवतीति । समोदय इति किमुक्तं भवति । अर्धास्तमितेऽर्के तदानीमेव चन्द्रस्याप्यर्धोदय इति यावत् ॥ २० ॥

अथेदानीं पौर्णमास्यामस्तमयकालात् पूर्वं पश्चाद्वा कियता कालेन चन्द्रोदय-स्तथाविधः सम्भवतीत्येतत्प्रतिपादनार्थमाह —

ऊनाधिककलाक्षुण्णास्तद्ग्रहेष्टासवो हृताः ।
राशिलिप्तासमूहेन लब्धः कालोऽविशेषितः ॥ २१ ॥

---

1. A B पश्चादस्तमयो.

त्वद्दारमारणदृढीकृतनिश्चयोऽसौ
भृत्योदितैरवततार विचारमार्गे ।
उद्दामपुत्रविपदुत्थित एष शोको
विद्वेषरोषपरिपोषमियेष वेषम् ॥ २ ॥

सत्सादि सद्रथिकसंहति सन्निषादि
सर्वास्त्रशस्त्रशतवर्षि बलं च मौलम् ।
मोघेतराशुगकिरः सुरहर्षदायी
नीहारमर्क इव भो निरशेषयस्त्वम् ॥ ३ ॥

अन्येद्युरर्णवगभीरमभीरुयोधं
सैन्यं पुरस्कृतवता दशकन्धरेण ।
जन्यार्थिना बहिरगामि विहाय लङ्कां
कन्याकुमारतरुणीमयपौरसङ्घाम् ॥ ४ ॥

सुग्रीवबालिसुतमर्दितयोधनार्थं
प्रक्षीणकल्पमवलोक्य बलं स्वकीयम् ।
व्यग्रो बिभेद विशिखैः कपिवाहिनीं ता-
मिक्ष्वाकुनाथ ! पुरतो भवतो दशास्यः ५ ॥

स्वभ्रातृभग्नरथवाजितया स कुप्यन्
बभ्राम लक्ष्मणशरार्दितशातशक्तिः ।
वध्योऽयमित्यथ धिया युधि पङ्क्तिकण्ठः
शक्त्यान्यया त्वदनुजं हृदि निर्बिभेद ॥ ६ ॥

---

१. वेषं वेषान्तरम् ।
२. किरः 'इगुपधज्ञाप्रीकिरः कः' ।
४. कन्येति, युवानः पौराः सर्वे निहता इति भावः ।
६. स्वभ्रात्रा विभीषणेन, अयं लक्ष्मणः ।

आलोक्य सोदरमचेतनवच्छयान-
मार्शंसितेऽप्यसुहृदा समरे प्रसक्ते ।
तद्रक्षणाय भिषजि स्वदृशं सुषेणे
हृत्तक्षणं दशमुखेऽप्यमुचः शरौघम् ॥ ७ ॥

त्वत्पत्रिभिर्वपुषि रोषविषोपदिग्धै-
रुद्बद्धवेपथुरथो रजनीचरेन्द्रः ।
तस्माद्रणादपससार तदा भवांश्च
विस्मापको दिविषदां सहजं *जगाम ॥ ८ ॥

किं सीतया मम फलं, किमु बन्धुवर्गै-
रर्धे गतेऽद्य भवतीति विलापिनस्ते ।
प्रागवज्जवेन हनुमानथ दृष्टकर्मा
प्राप्तः प्रगृह्य परमौषधिपर्वतं तम् ॥ ९ ॥

तस्माद्विशल्यकरणीं मृतजीविनीं च
सन्धायिकामथ सुवर्णकरीं च गृह्णन् ।
स्वस्थं त्वदीयमनुजं विदधे सुषेणः
प्रोत्तस्थिवान् भुजबलेन स निस्तु(षेण?लेन)॥ १० ॥

मन्त्रौषधीमणिबलं च विदन्नवन्ध्यं
सन्तोषमेत्य सहजं परिरभ्य दोर्भ्याम् ।
मण्डोदरीं चकमिषे विधवां विधातुं
तं त्वां भजेम भगवन्! जय सङ्गमेश! ॥ ११ ॥

इति द्विचत्वारिंशदशकम् ।

---

९. अर्धे अनुजरूपे ।
१०. सुषेणोऽश्विपुत्रः ।

---

* 'जुगोप' इति पाठान्तरम् ।

अदान्तसेनान्वितमागतं पुना
रथान्तरारूढमवेक्ष्य रावणम् ।
शतक्रतोर्मातलिना समाहृतं कृत-
प्रणामोऽप्यधिरूढवान् रथम् ॥ १ ॥

उभौ धनुर्वेदरहस्यवित्तमा-
वभीरुकौ (ता !) साहसशौर्यशालिनौ ।
गभीरवैराणर्वपारलम्भकं
प्रभो ! रणं व्यातनुतं नुतं सुरैः ॥ २ ॥

सतोरणे बाणगणैर्नभोङ्गणे
सतो रणे वामवलोककारणात् ।
सहोमयागादुडुराजशेखरः
सहोमयागादपि देवतागणः ॥ ३ ॥

मिथस्तनूतक्षणरक्षणोद्यमै-
रुदस्तशस्त्रास्त्रपृषत्ककर्तनैः ।
अभूतपूर्वं युवयोर्जयैषिणो-
रभूदहःसप्तकमद्भुतं रणम् ॥ ४ ॥

गतानुयातागतयोधनक्रमैः
सधैर्यसारो विजहत् त्वरेत्वरीम् ।
विभङ्गमङ्गे बकदेहयोररे
द्विपङ्क्तिवाहोर्द्विभुजो भवान् व्यधात् ॥ ५ ॥

अवीरमेयाः प्रवपन्नमानुषीः
प्रवीरलक्ष्म्या प्रणयाध्दतः स्ववम् ।
नवीनमासीदमृतं रणे भवान्
दवीयसीनामपि देवगादृशाम् ॥ ६ ॥

---

१. शतक्रतोः सकाशात् ।
२. उभौ रामरावणौ ।
३. रणे सतोः वां सहोमयागात् होमं यागं च परित्यज्यागादिति भावः ।
५. [illegible] चतुर्विधे । देहाङ्गे प्रसिद्धे त्वरैवेत्वरी तां विजहत् ।

समित्यगस्त्योक्तरविस्तवग्रहात्
प्रमथ्य मोहं प्रसरद्गभीरिमा ।
स्वमर्त्यतां कर्तुमनाः फलेग्रहिं
समुद्यतोऽभूर्निधनाय रक्षसः ॥ ७ ॥

अनेकशो लूनविरोहदाननं
स्वने घनालीसदृशं दशाननम् ।
नवाननं नाथ ! विधाय रावणं
भवानमुं नेतुमियेष पञ्चताम् ॥ ८ ॥

ततो हरे ! मातलिना प्रबोधितः
पितामहास्त्रेण विदारितोरसम् ।
निपातयामासिथ रावणं रथाद्
द्विपाधिपं शैलतटाद्यथा हरिः ॥ ९ ॥

अथैन्द्रतः स्यन्दनतोऽवतीर्णवा-
नतन्द्रधीर्नर्मसुहृद्गणावृतः ।
स्थितो मुहूर्तं सुमनोभिवर्षिभिः
स्तुतोऽसि च त्वं सुमनोमहर्षिभिः ॥ १० ॥

गते समापृच्छ्य रथेन मातलौ
स्वतेजसारोप्य विभीषणे श्रियम् ।
स्वभक्तबन्धुं कृतकृत्यमानिनं
प्रभो ! भजे त्वां जय सङ्गमेश्वर ! ॥ ११ ॥

इति त्रिचत्वारिंशदशकम् ।

'देवी सीता मनसि दधती त्रैजटीं चाटुधाटी-
मावीरागाङ्कुरमसुसमे मानसं ध्यानसङ्गि ।
आस्ते न्यस्ये'त्यनिलतनयेनैव दूतेन जान-
नेनामानाययितुमहिनोराशराधीशमेव ॥ १ ॥

---

११. आरोप्य कृतकृत्यमानिनमिति सम्बन्धः ।

१. आवीरागाङ्कुरं प्रत्यक्षभूतानुरागम् । आशराधीशं विभीषणमेव ।

गत्वा तेन स्वकसहचरीवश्यदासीसहस्रैः
पत्यादेशश्रवणसुधया स्नापिता सापि साध्वी ।
उपचर्चाविमलवसना त्वामगाद् व्रीलनम्राः
त्य(क्त्वाऽक्ता) वाग्भिर्दहनमविशद्देवतास्त्वामवापुः ॥ १ ॥

शम्भुं सम्भूय च दिगधिपैर्लम्भयन्तं त्वभीष्टं
त्वं भो नत्वा सपदि रमणीं पावकात् प्राप्य शुद्धाम् ।
जम्भारातेर्धृतमृधमृतोज्जीवनं वानरौघं
सम्पूर्यार्यं पितरमनमः सानुजन्मा सभार्यः ॥ ३ ॥

तेनाश्लिष्य प्रणयविहितामाशिषं प्राप्य मूर्ध्नि
प्राणातुष्टः कथितभरतोत्कर्षमाप्ताभ्यनुज्ञः ।
पौलस्त्येन प्लवगपतिना चाथ सानुप्लवाभ्यां
भ्रात्रा पत्न्यापि च निजपुरं प्रास्थिथाः पुष्पकस्थः ॥ ४ ॥

रक्षोवृन्दं क्वचन कुहचिद्वानरा लक्षलक्षं
लक्ष्मीवान् लक्ष्मण इतरतः क्वापि कान्तासखस्त्वम् ।
यद्यप्याध्वं तदपि विजनाः पुष्पकान्तःप्रदेशा
विश्वस्यायं प्रतिनिधिरिवाकारि धात्रा विमानः ॥ ५ ॥

विस्मेरत्वाद्विकसितदृशं व्योमयाने निषण्णां
वैदेहीं तामभिमुखमवस्थाप्य हस्ते गृहीत्वा ।

---

१. दहनमविशत् परित्यागदुःखादात्मानं शोधयितुम्, अवापुः प्रत्यक्ष्यमूवन्निति भावः ॥

३. धृतं लब्धमिति यावत् । मृधे मृतानामुज्जीवनं येन तम् । पितरं दशरथम् । देवमध्ये प्रत्यक्षीभूतम् सम्पूर्य पूरयित्वा अभीष्टप्रदापनेनेति भावः ।

४. कथितभरतोत्कर्षमित्यभ्यनुज्ञाप्राप्तिक्रियाविशेषणम् ।

५. तदपि विजनाः पुष्पकस्यायं प्रसिद्धो महिमविशेषः ।

तांस्तान् *भागान् दिवि भु(वे ? वि) दिगन्ते च ये ये मनोज्ञा
वाचा मोचामधुमधुरया व्याहरन्प्रादर्शः ॥ ६ ॥

जातं मन्ये मम जनकजे ! जन्मसाफल्यकल्यं
प्रीतिर्मुन्यादिषु सुघटिता कापि नः कामधेनुः ।
नेदं पुण्यं निवसति नृणां नेत्रयोर्नीलनेत्रे !
स्फीतं पुण्यं कलय वलयं त्वज्जनन्या धरण्याः ॥ ७ ॥

लङ्काद्वीपो लवणजलधेर्दाक्षिणात्यस्य कुक्षौ
भृङ्गोद्देशे सुरपदजयी यः सुवेलाचलस्य ।
जम्बूद्वीपात्मकवरतरीपृष्ठचार्यर्धनावं
सम्बद्धं हि द्वयमिदमहो सेतुना भाति सिन्धौ ॥ ८ ॥

अत्र ध्वस्तो युधि दशमुखः शक्रजित् तत्र कृत्तः
त्रस्तप्राणस्त्विह कपिचमूस्तम्भकः कुम्भकर्णः ।
तस्थुर्देवा इह समरसम्प्रेक्षका, राक्षसाना-
मसत्सैन्येष्वहतशतसाहस्रक्षा न कश्चित् ॥ ९ ॥

द्रष्टव्योऽयं निशिचरवधूवृन्दवैधव्यहेतुः
सेतुः सीते ! तव हृदयजीवातुरेवातुरायाः ।
अत्रावाप्तः शरणमबले ! कुम्भकर्णानुजो मा-
मित्थंवादी स्वयमसुसमां, पाहि मां सङ्गमेश ! ॥ १० ॥

इति चतुश्चत्वारिंशदशकम् ॥

---

६. भागान् प्रदेशान् भावानिति पाठे पदार्थान् ।
७. साफल्येन कल्यं निर्धूतपापमिति भावः । कामधेनुः अभीष्ट[illegible] नृणां नेत्रयोर्न निवसति । एतावन्नरान्तरैरदृष्टमिति यावत् ।
८. संम्बद्धं भारतवर्षलङ्काद्वीपामिथःसङ्घटकोऽयं सेतुरिति भावः
९. न कश्चित् सर्वेऽपि शतसाहस्ररक्षोहन्तार इति भावः ।

* 'भावान्' इति पाठान्तरम् ।

अभिगतवति किष्किन्धान्तिकं पुष्पकेऽस्मि-
न्नभिलषितमवादीदादृता मैथिली त्वाम् ।
अहमसुसम ! साकं स्त्रीभिरेषां हरीणा-
मरहितपरिवारैवाविवेक्ष्याम्ययोध्याम् ॥ १ ॥

इति सपदि तसर्वाभीष्टसौहार्दहृद्यां
तदनु भणितिमाकर्ण्याभिनन्द्यावनेय्याः ।
इनतनयमुखानामङ्गनाश्चाधिरोप्य
क्षणविहितविलम्बस्त्वन्ततस्त्वं ततोऽगाः ॥ २ ॥

अलघुफलदमालोक्यात्र सुग्रीवसख्य-
स्थलमिषुदितसालान् वालिघातस्थलीं च ।
बलदनिलसकम्पां वर्णयन् वीक्ष्य पम्पां
निलयमपि शबर्याः प्राददर्शः प्रियायै ॥ ३ ॥

तदनु दनुकबन्धध्वंसभूमिं परस्ता-
द्वनगहनमयोमुख्यागमं यातनं च ।
समरमपि जटायोर्वर्णयामासिथास्यै
कपिवरयुवतीनां कौतुकाच्छृण्वतीनाम् ॥ ४ ॥

परिचितमुपगोदं पर्णशालावकाशं
कलशभवमुनेरप्याश्रमं तत्र वृत्ताम् ।
मुनिपरिषदि रक्षोवृन्दघातप्रतिज्ञां
निधनमपि विराधस्यास्मरो स्मारयस्ताम् ॥ ५ ॥

---

१. आविवेक्ष्यामि । आवेष्टुं प्रवेष्टुमिच्छामि । वानरस्त्रियोऽपि सह नेतव्या अयोध्यामिति यावत् ।

२. ततः किष्किन्धायाः ।

३. इषुदितसालान् एकास्त्रखण्डितसालसप्तकम् ।

५. उपगोदं गोदावरीसमीपे ।

मुनिविहितसपर्यामोदितस्वानुगौघो
रजनिमथ भरद्वाजाश्रमे यापयित्वा ।
गुहभरतसमीपं यापयन् वायुसूनुं
प्रतिपुरमितरेद्युः प्रास्थिथा मन्दमन्दम् ॥ ६ ॥

सततगतिसुतस्ते सर्वमाख्याय वृत्तं
प्रसृमरकुतुकाय प्राङ्निषादाधिपाय ।
अथ भरतमवाप्तो हर्षयामास वाग्भिः
प्रथममनुजमस्यैवौषधीभिः शुभाभिः ॥ ७ ॥

'भुवनकुमुदबन्धुर्भुक्तिदो निर्जराणां
निशिचरतिमिरौघं निर्धुनन् लक्ष्मणाढ्यः ।
जनिततनयमोदो जायया ज्योत्स्नयेव
त्वरितगतिरुपैति त्वामयं रामचन्द्रः' ॥ ८ ॥

हनुमत इति वाचा हर्षितोऽसौ वसिष्ठं
मुनिमनुगतदारं मोदयन् वीक्ष्य मातॄः ।
पुरनगरजनेभ्यः पूर्वजायानवार्ता-
ममृतपृषतहृद्यामभ्यवर्षत् समन्तात् ॥ ९ ॥

अरुजमुदितपौरालङ्कृतागारपूजां
पुरमविशदयोध्यां पुण्यवैकुण्ठलक्ष्मीम् ।
सहजसचिवयुक्तः सोऽवदद्वातसूनुं
कथय ! कपितया त्वं काम्यसे वा नवेति ॥ १० ॥

---

६. मुनिना भरद्वाजेन । यापयन् निजागमननिवेदनाय प्रेषयन् । मन्दमन्दं हनूमत्प्रत्यायानप्रतीक्षयेति भावः ।

८. भरतं प्रति हनूमद्वाक्यमेतत् ।

९. हर्षपूर्ण इति साधीयान् पाठः ।

१०. स भरतः सहजेन शत्रुघ्नेन सचिवैः सुमन्त्रादिभिश्च कपितया कपित्वेन त्वं काम्यसे अभिलष्यसे वा नवेति । पुष्पकविमानादर्शनात् सम्भ्रान्तो हनुमन्तं भरतो वानरत्वसहजचापलाद् भवता कथितमयथार्थं किमिति परिपृष्टवानिति भावः ।

क्रमगतिपृथुनन्दिग्रामभाजो जनौघाः
स्तिमितममितहर्षास्तेऽथ यानं विमानम् ।
हिमगुमिव चकोरा ह्यमीक्षांबभूवुः
स मम सुखय चेतः सद्मागारनाथ! ॥ ११ ॥

इति पञ्चचत्वारिंशदशकम् ।

त्वत्पदार्पणपवित्रमुज्ज्वल-
त्पुष्पकं दिवि विमानमद्भुतम् ।
अस्पृशद् भुवमवाप सन्निधिं
विस्मयेन विकसद्दृशां नृणाम् ॥ १ ॥

तत्र विस्तृतगवाक्षमाश्रितं
त्वामवेक्ष्य भरतोऽभ्यवन्दत ।
उत्स्मिताननममैव सीतया
विद्युता घनमिवाशु चातकः ॥ २ ॥

ऊढपादुकशिराः प्रसृगत-
प्रौढपापवनपावकव्रतः ।
स्नेहदीप्रकुतुकः पपात ते
कैकयीप्रियसुतः पदाम्बुजे ॥ ३ ॥

ऊढकण्टकतनोः प्रियानुजं
गाढगाढमुरसोपगूहतः ।
पाटवं प्रमदसिन्धुलङ्घने
पाठविक्लबतया तवागलत् ॥ ४ ॥

---

१. भुवमस्पृशत् सन्निधिमवाप भूमेरत्यन्तसन्निकृष्टं भूमिमस्पृष्ट्वैवा-वस्थितमिति पुष्पकस्य स्वभावः ।

२. अमा सह ।

४. अगलत् सन्तोषसमुद्रादुत्तरीतुं असमर्थोऽभूदिति भावः । पाठः समुद्रलङ्घनकौशलस्य । तत्र विक्लबतया तदकरणादिवेति गम्योत्प्रेक्षा ।

त्वत्पदे घटितपादुकः स्वयं
न्यस्तभारं इव लोकपावनीम् ।
वन्दते स्म भरतोऽथ जानकीं
जाह्नवीमिव समेत्य पुण्यवान् ॥ ५ ॥

लक्ष्मणानुजनतः स्वयं नमन्
प्रश्रयेण जननीजनं गुरुम् ।
वत्सलः सचिववन्दितो भवा-
नुत्सवोऽजनि परः पुरौकसाम् ॥ ६ ॥

तेऽद्य जन्मफलदाः किलागता
येऽत्यजन्नदयमत्र नो निशि ।
माद्यतामिति वचः पुरौकसां
स्वाद्यतां श्रुतियुगस्य तेऽगमत् ॥ ७ ॥

स्वैः सहावतरतस्तवाज्ञया
वीक्षितुं बनदमीयुषालकाम् ।
विस्मृता न किल पुष्पकेण यत्
तत्पुरा तव जितं ह्ययोध्यया ॥ ८ ॥

वानरेन्द्रहनुमद्विभीषणा
मानुषाकृतिधराः सभूषणाः ।
सन्निधावबरजाश्च तेऽभवन्
षण्णया इव जयस्य धीमतः ॥ ९ ॥

शङ्खमद्दलरवैः स्तवैरपि
त्वङ्गदुद्धततरङ्गघोषवत् ।
स्वां पुरीमभिविशन्नदीपयः
शाम्भवीमिव जटां नदीपयः ॥ १० ॥

---

६. लक्ष्मणानुजः शत्रुघ्नः ।

७. माद्यतां सन्तोषमत्तैर्भूयताम् ।

८. ईयुषा प्राप्नुवता, न विस्मृता अलकां गच्छताप्ययोध्या स्मृता । अत एवायोध्यया जितम् अयमयोध्याया उत्कर्ष इति भावः ।

१०. नदीपयः गङ्गाजलम् ।

अभ्यर्थेचि मुनिभिस्तदा भवा-
न्नध्ययोध्यमजनन्दनादिभिः ।
उद्यमेन महता स्तुतिक्रमै-
रद्य मे मनसि सङ्गमेश्वर ! ॥ ११ ॥

इति षट्चत्वारिंशदशकम् ।

अवन्तिनिषधान्ध्रकोसलमुखान्यनीवृन्नृपा
भवन्तमवतामतिप्रकटितानुभावं प्रभुम् ।
उपासितुमुपागमन्नुपहृतोचितोपायना
भवत्परिजनादृता भरतदर्शिताश्वासनम् ॥ १ ॥

अपास्तगजपाकलं द्विषदनीकदावानलं
दयार्द्रनयनाञ्चलं द्युतिविधूतदूर्वादलम् ।
विभासितसभातलं विधुतपापसेवाफलं
भवद्वपुरनाकुलं पपुरमी दृशा केवलम् ॥ २ ॥

भवद्दयितया पुनः प्लवगसुन्दरीभिः समं
प्रपद्य नगरोदरं प्रियसखीपरिस्तीर्णया ।
पृथक् प्रणतिमानितप्रसितमातृसंश्लिष्टया
प्रवासजरुजां कृतं प्रतिविधानमन्तःपुरे ॥ ३ ॥

सखा हरिपतिः स ते स च विभीषणस्तावुभौ
सकाशसहवासिनौ कृतसहाससम्भाषणौ ।
भवद्वचनकांक्षिणः परिजनास्त्रयो भ्रातरः
परे च तदुपासकाः पवनजाङ्गदाद्याः स्थिताः ॥ ४ ॥

११. अजनन्दनो वसिष्ठः । मनसि सन्निधेहीति शेषः ।
१. अवतां रक्षितॄणां मध्ये ।
२. पाकलो गजमारको ज्वरः ।
३. सिताभिरुत्सुकाभिः ।

पितुः प्रति तीक्ष्णा प्रणतमातृदत्ताशिषा
कृताप्लवनकर्मणा विमलपीतवासोवसा ।
सुरार्चनपितृक्रियासुजनतर्पणानन्तरं
सजग्धिसुखमन्वहं सहसुहृज्जनैरादधे ॥ ५ ॥

किरीटघनकैशिकं तिलकराजिफालं जग-
द्धुरीणनटनभ्रु ते त्रुटितरौक्ष्यवीक्षं मुहुः ।
विलोलमणिकुण्डलोज्ज्वलकपोलमुद्यत्स्मितं
सुनासिकमवाक्षि यैस्तव मुखं सुवार्ता हि ते ॥ ६ ॥

भुजौ तव निजौजसा भुवनकण्टकोद्धारकौ
विभीषणहरीशयोः शमयथाशयं चाश्रितौ ।
कनत्कनककङ्कणव्यवहितोद्घणव्याकिणा-
वनुक्षणमनन्यगामवहतामयत्नेन गाम् ॥ ७ ॥

निशासु जनकात्मजानिहितभोगलक्ष्मोज्ज्वले
गलेऽप्युरसि चावृते तरलहारभासा दिवा ।
जना यदनुबिम्बिता जघननद्धकाञ्चीगुणेऽ-
प्यभून्न स ततोऽधिकस्तव तु लोकभारश्रमः ॥ ८ ॥

व्यवस्य यदवस्यत व्रतकृतं खरं वल्कलं
विदस्यु जगदाहितं मृदु दुकूलमालम्बितम् ।
ततस्तव चराचरव्यसनकर्तृका कृत्तिका
तदा ससुतमेदिनी सुशयनीयतामीयतुः ॥ ९ ॥

---

५. सजग्धिः सहभोजनम् । ·

६. सुवार्ता [illegible] इति यावत् ।

७. गां घृणिं शोभामिति यावत् । शयं हस्तं ।

८. अनुबिम्बधारणे क्लेशाभावः प्रसिद्धः । तस्य नैसर्गिकत्वात् । अनायासो लोकभरणक्रम इति तत्त्वम् ।

सर्वास्तवसुखाद्वयप्रसरदाः पुराणेरिताः
सर्वास्तत्र भवाब्जभूवदननिर्गता यद्गताः ।
अतस्तव पदद्वयादपरमस्ति नालम्बनं
मदुक्तिपदसम्पदां मम च सङ्गमाधीश्वर! ॥ १० ॥

इति सप्तचत्वारिंशदशकम् ।

अलभत भवान् जायां प्रायेण पुण्यजनक्षया-
द्वति भवति क्षोणीमेणीदृशा(म)भवन् दृशः ।
श्रुतिपथविलङ्घिन्यो वंशायशोदगिरां परं
जगति न परेष्वेवं भावो जनेषु निरैक्ष्यत ॥ १ ॥

अमुचदवनिस्तर्षं वर्षाप्रमोदितकर्षका
नमुचिरिपुणा काले काले घनैरभिषेचिता ।
व्यरचि भवता सस्यैरस्यैव तुष्टिरपीष्टिभि-
र्भवति महतामीहा सौहार्दसारमयीदृशी ॥ २ ॥

अघृतमशनं, दानं पानीयहीन,मसत्यवा-
ग्विहृतिषु मतो न्यायो दुर्नीयशीलनलालसैः ।
इति न भवता सेहे लोकेषु निष्फलकुर्दनं
भुवि भवदभिप्रेतो भावः प्रजाभिरनुष्ठितः ॥ ३ ॥

---

१०. मदुक्तयो भवत्पदद्वयस्तोत्ररूपा एव । तत्पदद्वयमेव ममा-लम्बनमिति भावः । सर्वा यागाः भगवद्यजनात् परमानन्दलाभ इति पुराण-प्रसिद्धिः ।

१. एवंभावः पुण्यजनक्षयः । श्रुतिपथविलङ्घनम् ।

२. अस्येन्द्रस्य ।

३. न्यायः अघृताशन-पानीयरहितदान-नर्मादिविषयकासत्यकथनेति त्रितयरूपः । न सेहे । अयं न्यायः कर्म । निष्फलकुर्दनं विफलक्रीडा । तद्रूपोऽयमिति यावत् ।

अकृतसुकृताः पुंसां संसारपारदृशां धुरा
सुहृदसुहृदो ह्येतद्रोघोद्यता अपि देहिनाम् ।
इति नियमयन् कृत्याकृत्ये प्रजास्त्वमशा दृशा
प्रमुमरयशा स्वे स्वे देशे निवेश्य यथासुखम् ॥ ४ ॥

यदनृतवचस्त्राणात् प्राणप्रयाणविधौ पितु-
र्दशरथनृपादायुःषड्भागभोगमवापिथ ।
तदखिलमपि प्राज्ये राज्ये प्रजाः परिपालय-
ननुबुभुजिषे सम्यग् धर्मार्थकामधुरन्धरः ॥ ५ ॥

सुचिरसहसंवासादासादयन् प्रियदासतां
स्वपुरमगमत्सुग्रीवोऽग्रे स चाथ विभीषणः ।
सह तदनुगास्ताभ्यां चाभ्यागता कपिराक्षसा-
स्तव चरणयोर्न्यस्तं चित्तं न ते पुनराददुः ॥ ६ ॥

अनुकलमवक्रक्ष्णा पश्यन्नतीव च लालयन्
जनकजनितां मूर्तिं भूमिं प्रियामपि रेमिषे ।
सममवरजैर्योगक्षेमक्षमैः सचिवैः समं
सममपि सवित्रीभिः श्रीभीरुभिश्च महर्षिभिः ॥ ७ ॥

---

४. सुष्ठु कृतं सुकृतं यया तादृशी संसारपारदृशां पुंसां धुरा भारः प्रवृत्तिरिति यावत् । देहिनां सुहृत् । एतद्रोघोद्यताः सुकृतकारिणां प्रतिघाते प्रवृत्ताः । असुहृदः शत्रवः । इति कृत्याकृत्ये नियमयन् । अशाः शासितवान् । दृशेति दर्शनमात्रेण जनानामेतद्रोघो जायत इति भावः । देशे कुल इति यावत् ।

५. अनृतवचसः असत्यकथनात् यत् त्राणं रक्षणं तस्माद्धेतोः । पितुः सकाशात् ।

७. जनकः पिता जनकराजश्च ।

सततमनुजैः साकं लोकोत्तरैर्भरतादिभि-
र्मनुजवपुरेवास्थायास्था सशोभयशोभरः ।
अयुतशरदामन्तेऽथैकादशाब्दसहस्रतः
परमसि गतः स्वर्गं शिष्टा कथा भुवि नाम च ॥ ८ ॥

जनकतनया धृत्वा गर्भं सुतौ सुषुवे यमौ
भुवि कुशलवाभिख्यौ विख्याततातगुणोत्तरौ ।
कविरथ मुनिर्वाल्मीकिस्तौ स्वकाव्यमपीपठत्
पिबत विबुधा नित्यं प्रत्यग्रताममृतं गतम् ॥ ९ ॥

दिशि दिशि तथा देशे देशे सभासु सभास्विदं
भवति हि बहु श्रीमद्रामायणं भवभीतिभित् ।
शतविधमिदं नानाभाषाचणैः कविभिः कृतं
सकृदविनयं क्षन्त्वा श्रीसङ्गमेश्वर ! पाहि माम् ॥ १० ॥

इत्यष्टचत्वारिंशदशकम् ।

कलावन्यायानामपनयनधुर्यैर्द्विजवरैः
कुलीविन्यास्तीरे निजकुलविभूत्यै प्रणिहितः ।
कुले मन्वादीनामसि तिलकभूतः किल पुमान्
स्वलावण्यं पुण्यं प्रकटयसि माणिक्यकपटात् ॥ १ ॥

---

८. कथा नाम च भुवि शिष्टे । न गते । ते उभे विशिष्टे चेति भावः ।

९. नित्यं प्रत्यग्रतां गतममृतम् । रामायणामृतं क्षणे क्षणे नवं नवमिव प्रतिभातीति न कदापि विरसीभवेदिति तात्पर्यम् ।

१. द्विजवरैः सङ्गमेश्वरप्रतिष्ठापकैर्गुरुभिः । 'कुलीविनीति' तत्रत्यवापीसंज्ञा तिलकवन्माणिक्यं बिम्बे प्रतिभातीति प्रसिद्धिः ।

रवेर्वंशे रामो दशरथसुतोऽभून्मधुरिपू
रमा जाता सीता तदथ मिलितं चादिमिथुनम् ।
पितुः सत्योक्तत्वं सुरमुनिहितं चाहितवति
स्वतः स्थाने भक्तिर्मम हि सकले देवयुगले ॥ २ ॥

अनेकानर्थोत्थेऽप्यविकृतजनस्थानविहृति·
र्वने वानप्रस्थाचरणनिपुणो मारितखरः ।
वनौको व्यत्यासादतरदवनौको जलनिधिं
जनौघास्तद्रामस्मरणशरणाः स्याम मरणे ॥ ३ ॥

परीक्षितकाले खल्विह परशुरामेण मुनिना
परीक्ष्यानीता ये परसुखचिदानन्दरसिकाः ।
द्विचत्वारिंशत्ते द्विजवरगृहस्थास्त्रिकरणी-
विशुद्धाः सेवन्ते नतिनुतिषु सक्तास्तव पदम् ॥ ४ ॥

विमुक्तेरध्वानो बहुभिरुदिताः सन्ति विविधाः
प्रमत्तस्याधस्ताद् गतिरवसिते ह्यायुषि भवेत् ।
समस्तेश स्वामिन् ! जय रघुपते सङ्गमपते !
नमस्ते रामेति प्रसृमरगिरां सिद्धमभयम् ॥ ५ ॥

---

२. देवयुगले लक्ष्मीनारायणरूपे ।

३. बहुविधानर्थसम्भवेऽप्यविकृत एव यो जनस्थानमध्यावत्सीत् । वानप्रस्थव्रतमाचरन् यः खरमवधीत् । यो वनं गृहं स्ववियोगदुःखितं गृहं वनं च यः कृतवान् । यो नौकां विनैव जलनिधिं तीर्णवान् तादृशरामस्मरणं मरणकाले न केवलं स्वस्य किन्तु सर्वेषामपि प्रार्थ्यते । य इत्यध्याहार्यम् ।

४. सङ्गमग्रामे द्विचत्वारिंशत्(४२)विप्राणां विशिष्टानां गृहा वर्तन्ते । ते च परशुरामेणोत्तरदेशात् कुलशीलादि परीक्ष्यानीता इति प्रसिद्धिः ।

न वः स्थेयश्चित्तं यदि वदत धीरा, विमृशत
व्यवस्थैवं नैवायुषि न च सुखे नाप्यवसरे ।
शिवो देवो जीवः शिव इति हरिश्चिद्रसझरी-
परीवाहं भक्त्या भजत सततं सङ्गमपतिम् ॥ ६ ॥

भजन्तो वर्तेमह्यनुदिनममुं सङ्गमपतिं
न जन्तोः स्वातन्त्र्यं स हरति, स सन्तुष्यति नु ते ।
अनन्तानन्दानाकुलकुलयशोमुक्तिपदवी-
मनन्तारो मन्दा जहति, यमवन्द्या नियमिनः ॥ ७ ॥

समस्तेश ! स्वामिन् ! दशवदनमत्तेभमथने
वमत्तेजस्तेऽज ! व्यलसदलसन्नाभि यदिषुः ।
प्रमत्तद्वीपश्री त्वयि-सलिलपित्ते स शलभो
नमस्ते रामाय त्रिभुवनपते ! सङ्गमपते ! ॥ ८ ॥

बुधो वा मूढो वाऽस्त्विह कवयिता, स्यात्किमियता
श्रुता वाल्मीकीयाद्रघुपतिकथा येन हि यथा ।
तथेयं तस्या यद्यनुकलनकाले परिणमेत्
प्रसत्त्यै श्रोतॄणां फलमिदमृते किं कविकृतेः ॥ ९ ॥

---

६. स्थेयः स्थिरतरं । देवः शिवः जीवः शिव इत्यभेदानुसन्धानेन भजतेति ।

७. स सङ्गमपतिः । स ते सन्तुष्यति नु सन्तुष्यत्येव । मन्दा एव अनन्तारः सङ्गमपतिनमनमकुर्वाणाः । मुक्त्यन्तानां पदवीं जहति परित्यजन्ति । नियमिनः नियमेन सङ्गमपतिनमनकर्तारः यमेनापि वन्द्याः । यमोऽप्येतान् प्रसादयितुम् । न तु स्वपुरं नेतुमभिलष्यतीति भावः । अत्र प्रणामकरणं विशिष्य क्रियत इति स्मर्यते ।

८. सलिलपित्ते अग्नौ । स दशवदनमत्तेभः ।

९. कवयिता यः कोऽप्यस्तु । इयं कृतिः । तस्य श्रोतुः । प्रसत्त्यै प्रसादाय ।

भवन्मालाकारो भजनविमलाकारकरणोऽ-
स्म्यहं रामो रामायणमभणमेवं तव पुरः ।
सुखा मालैवेषा सरसपदपुष्पौघरचिता
जगन्मातुर्मोदं दिशतु सहवासात्तव हृदि ॥ १० ॥

न बाल्ये तारुण्ये किमुत जरसि त्वत्स्मृतिविधौ
न कुक्षौ पूर्णे न क्षुधि तृषि च सत्यामवदधे ।
सुषुप्तौ स्वप्ने वा त्वदनुभजनं सिध्यतु कथं
क्व सुस्मूर्षे तुर्यं वपुरवसरे ते नरहरे ! ॥ ११ ॥

त्वमेवाहं चेत्तत्त्वमसिगुरुवाक्यादवधृतो
भ्रमोत्थो व्यामोहो विरमति न मे दिग्भ्रम इव ।
अमुष्मिन्नुद्धूते कथमपि परप्रत्ययवशात्
स्वयं सूर्याभः सन्नुदिहि मम सौषुम्नसरणेः ॥ १२ ॥

मया मायामोहात् स्वतनुभुवनाद्यध्यवसितं
स्वयंज्योतिस्त्वं सन्निह न दहनः पावक इव ।
अबोधं हृत्वायाः स्वयमपि च बोधोऽस्तमयतां
ततोऽहं त्वं त्वं वास्म्यहमिति भिदा नाम कियती ॥ १३ ॥

इत्येकोनपञ्चाशदशकम् ।

---

१०. जगतां माता निर्माता तस्य ।

११. तुर्यं दशावतारवपुष्षु तुरीयं क्व अवसरे सुस्मूर्षे ।

१२. न विरमति बोधोऽनुभवपर्यवसायी न भवतीति यावत् । उदिहि उदितो भव ।

१३. स्वशरीरदावहमित्यहन्ता ममेति ममता च यदध्यवसीयते त्वमेव तत् ज्योतिः सन् न दहनः अदाहकः । अभस्मीकारकः । पावकोऽग्निरिव अबोधमज्ञानं भेदज्ञानरूपम् । अयाः बोधं प्रापय ।

प्रत्यासीदति निस्तुषे प्रतिदिनं प्रत्यूषकाले हरे !
प्रत्यग्रुद्धदशेन्द्रियस्य हृदि मे प्रोत्फुल्लपद्मोपमे ।
प्रत्यग्रोद्गतकल्पपल्लवमृदुस्पर्शं विमर्शक्षणे
प्रत्यक्षीभवताद् भवत्पदयुगं प्रौढेन्दुदीप्यन्नखम् ॥ १ ॥

सङ्क्रीतौ बहुभिस्तपोमयधनैः सङ्गीतरैर्योगिभिः
सङ्क्रीडन्मणिनूपुरौ हृदि करोम्यङ्घ्री तवोभौ शुभौ ।
अङ्गीकृत्य ययोर्यशः स्वशिरसा गङ्गीकृतं वेधसा
सङ्गीतेन भृशं रिरंसति मुदा भृङ्गीश्वरः शङ्करः ॥ २ ॥

सिंहेनेव महावनावटबिले पाण्ड्येभराजं सरः-
पङ्के नक्रवरेण पातितमहो संक्षेपतः शृण्वतः ।
जङ्घे ते प्रणमामि यद्बलमभूत् त्वत्पार्षदैरीक्षितं
किं के कानि पदं पदे अथ पदानीति द्रुतं धावतः ॥ ३ ॥

स्वारस्यादविलम्ब्य दातुममृतं भक्तेभ्य इच्छावशाद्
दूरस्थान्महतोऽल्पमात्तमभितो हस्ताग्रशक्यग्रहौ ।
गोप्तुं रत्नसमुद्गकौ विनिहितौ जानामि ते जानुनी
गोप्तव्यद्वितयस्य पात्रयुगलं यद्भक्तियुक्तात्मनाम् ॥ ४ ॥

ऊरू केदि पटे तवाटति बहिः काञ्चीगुणे सञ्चर-
त्यारूढोपरियानलोभमवशं नाभिह्रदे मज्जति ।
दाराणां तव तारहारसजुषो लक्ष्म्याः कटाक्षद्वयं
दूरं यात्यथ लज्जते मयसभाचारीव दुर्योधनः ॥ ५ ॥

केयूरद्युतिकङ्कणावलिमहोरत्नाङ्गुलीयत्विषा-
मायू रक्तनखात्मना किल धृतं सद्राविमस्वेमया ।
तानावासितलालिताद्दतगदाचक्राक्षमालादरा-
नाराध्याहमवाप्नुवानि चतुरो बाहून् पुमर्थानपि ॥ ६ ॥

---

२. सङ्गीतरैः निस्सङ्गैः गङ्गीकृतं भगवत्पादोदके पावयशङ्कमा रोप्यते । सङ्गीतेनेति भगवत्पादयशोगाननिष्णातत्वं प्रतिपाद्यते ।

कण्ठे कौस्तुभशालि कम्बुरुचिरे, कर्णोल्लसत्कुण्डलं
खण्डेन्दुद्युतिगण्डमुत्स्मितसुधं चन्द्राभमुक्तानासिकम् ।
पुण्याहाम्बुकटाक्षवीक्षममिताभ्रूविभ्रमं ते मुखं
वन्दे सुन्दरफालदीप्रतिलकं हैमं किरीटं कचम् ॥ ७ ॥

एवं तावकरूपध्येयमवमृश्यावन्ध्यभावं दध-
ल्लावण्यामृतवीचिभिः स्नापितधीरावन्द्य ते पार्षदान् ।
नावातीत्य भवाब्धिमेनमनयैवापात्र पापात्ययं
देवासाद्य तवाद्य दास्यमचिरात् सायुज्यमेवाप्नुयाम् ॥ ८ ॥

प्रत्यक्षे प्रतिबिम्बवत्तव बहिर्मात्रेऽस्य गात्रस्य मे
हृद्यक्षेमपदत्वविभ्रमभृतोऽन्तर्दृक्षयावेक्षिणः ।
अध्यक्षो हि भवानवैति विभवं नाहं, मया तादृशा
यद्यत् क्षुद्रमुदीरितं नुतिधिया तत्तत्क्षमेथाः स्वयम् ॥ ९ ॥

शीतं नातिसहे न चोष्णमति च श्रीसंगमाधीश्वर !
स्वातन्त्र्ये चकितस्तदस्मि क्षुभितस्त्वत्पारतन्त्र्ये स्मृते ।
देहे धातुषु चेन्द्रियेषु शिरसि स्वान्ते तथान्तर्बहिः
सर्वाङ्गेष्वपि मे तवैव करुणा पीयूषधारायताम् ॥ १० ॥

इति पञ्चाशत्तमदशकम्

श्रीरामपञ्चशती समाप्ता ।

MADANAKETUCARITA

OF

RĀMAPĀṆIVĀDA



PUBLISHED BY

THE CURATOR,

THE UNIVERSITY MANUSCRIPTS LIBRARY,

TRIVANDRUM.

TRIVANDRUM:

PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,

1948.

INTRODUCTION

The Manuscripts Material. This edition of the Madanaketucarita, a *Prahasana* in two scenes by Rāmapāṇivāda, which is published for the first time, is based on two palm-leaf Mss Nos. 163 and 1679 of the Curator's collection in the University Manuscripts Library. Description:

Ms. No. 163. Size. 13″ X 1″. Leaves—52; 4 lines per page and 40 letters per line. Script – Malayalam.

Ms. No. 1679. Size 10″ X 1″. Leaves—41; 7 lines per page and 30 letters per line. Script—Malayalam.

The first is collected from Puthiyil House, Haripad, and the second from Ayankudi House, Vaikom, Travancore. The former manuscript is damaged to a certain extent. The latter is in good condition and its date of transcription is 944 M. E. (1768 A. D.)[1]. Of these manuscripts No. 1679 is represented by the letter क and No. 163 by the letter ख in the foot-notes showing variants.

Author. In the prologue to this farce the Sūtradhāra tells Pāripārśvika as follows :—

मारिष ! अपि शृणोषि मङ्गलग्रामवास्तव्येन रामपाणिवादेन विरचितं मदनकेतुचरितं नाम प्रहसनमस्मद्वंशे वर्तत इति ।[2].

From this it is evident that Ramapāṇivāda of Mangalagrāma is the author of the work. This may further be

1. A chronogram at the end of the MS. runs:
[illegible]

2. See page 2.

confirmed by a reference to a metrical list of Rāmapāṇivāda's works in which a *Prahasana* is also mentioned[3].

Rāmapāṇivāda was a great poet of Kerala who enriched various channels of Sanskrit Literature with his works of high literary value in the first half of the Eighteenth Century after Christ[4]. There is a controversy among research scholars regarding his identity with Kuñcan Nampiyār, the author of many *Tullal-Kathās* and other Malayalam works, but this has not yet been finally settled.

Plot· Madanaketu is a prosperous monarch of Ceylon, who has conquered Kaliṅga and posted his brother Madanavarman to rule over that country. In Ceylon a Bhikṣu by name Viṣṇumitra leads an ignominious life violating all principles of the religious life which he has chosen for himself. He is over head and ears in love with a courtesan named Anaṅgalekhā and so spends his days yearning to achieve his heart's desire· He himself says :

वसानः काषायं वसनमपिधानं रतिपते-
दधानस्तां चित्ते चकितहरिणीशावनयनाम् ।
वहन् पाणौ दण्डं विषयशफरीजालबलिशं
परीरम्भाशंसी कथमपि नयाम्येष दिवसान् ॥

(Page 3, Sloka 7)

He is so much absorbed in the sweet thoughts connected with his love that he does not feel inclined to move from one place to another as he himself admits.

ध्यायं ध्यायं प्रियां तां पदमपि चलितुं नोत्सहे किं करोमि ।

(Page 5, Śloka 9)

Having come to know about this unrighteous conduct of the Bhikṣu, Madanavarman who sets much store by the maintenance of *dharma* enjoins Śivadāsa, a Kāpālika of extraordinary yogic powers to Ceylon for the purpose of

3. *Vide* Introduction to *Mukundaśataka* in Volume II. No. 2 of this Journal, p. xiv.

4. For a brief account of Rāmapāṇivāda's life and works *vide ibid*, pp. i–xxiii.

generating disgust in the Bhikṣu towards worldly pleasures, thus saving the kingdom from ruin. Madanavarman tells the yogin :

सखे शिवदास !

राज्ये सिंहलभूभुजां नयनिधेरार्यस्य बाहुष्मभि-
स्संगुप्तेऽपि पदं चिकीर्षति किल स्थेयानधर्माङ्कुरः ।
यस्मिन् कामपि बन्धकीमभिलषन्नन्त्याश्रमस्थोऽपि सन्
कश्चिन्माद्यति भूसुरः प्रबकयत्यार्यश्च तत्साहसम् ॥

तदेवं सिकताकूपवद्विशीर्येत नो जनपदः । तद् भवानद्भुतप्रकाशन-व्यपदेशेन तस्य योगिनः स्वयमैहिकेषु किमित्युदास्ते नः संत्रातुमर्हति ।

(Page 9)

Complying with the request of his friend, Śivadāsa visits the court of Madanaketu and meets the king in person. In the course of their conversation the king discloses to the yogin the deep love that he has felt towards Candralekhā, a harlot of the Dravida country, and the yogin undertakes to see that the king's desire is realised.

Then with the royal permission the chamberlain brings the Bhikṣu, who is held by force by Anaṅgalekhā's, mother to the presence of the king. The woman complains that the Bhikṣu sought union with her daughter against her will, and she leaves the court on getting assurance from the king that her grievance will be redressed. The Bhikṣu who was very violently belaboured does not feel the injury very much owing to his satisfaction at having had an opportunity to be with his love. He says :

कुट्टिन्या दृढमुष्टिकुट्टिकशतैर्निष्पिष्टसन्धीन्यपि
प्रायो नातिरुजं भजन्ति विकसच्चित्तस्य गात्राणि मे ।
गाढं पीडितवान् हठादपि यतो वक्षोरुहौ वक्षसा
सोऽहं मुग्धदृशो विवृत्तमपि तद्वक्त्राब्जमाघ्रातवान् ॥

(Page 13, Śloka 22)

Furth r he tells the king that he had gone to Anaṅgalekhā at the behest of Śṛṅgāramañjarī, the queen. The queen

had asked him to fetch Arańgalekhā to the king whose love for the courtesan was evident from his addressing the queen in the previous night by the name Anańgalekhā. On hearing this the king understands the mischief played by his wife and appreciates her comic mood.

Śivadāsa sets his mind on bringing Candralekhā to the court by his yogic powers. Wishing her to appear on the scene he says allegorically:

अवतरतु धरित्रीमेव राकाशशाङ्कः
पिबतु बकचकोरश्चन्द्रिकामेतदीयाम् ।
अपि च विकचपुष्पा मल्लिका जङ्गमत्वं
व्रजतु भजतु चैनामुत्सुको भृङ्गराजः ॥

(Page 15, Śloka 25)

Then he sits in a contemplating mood. Meanwhile Candralekhā arrives at the court all of a sudden and meets the king and reciprocates his love. The king gets so much infatuated with the courtesan that he feels pity for Śivadāsa, whose eyes remain closed when Candralekhā is present. Then he describes her as follows:

सैवेयं भुवनैकसुन्दरितमा कन्दर्पदर्पद्रुमं
सिञ्चन्ती सुषमामृतेन वपुषश्चित्ताङ्गणे मादृशाम् ।
यामेवालिखदन्तरङ्गफलके सङ्कल्पशिल्पी यथा-
पूर्वं चन्दनचन्द्रमन्दपवना मर्माविधो निर्मिताः ॥

(Page 17, Śloka 27)

Overwhelmed with love the king asks her to embrace him, but she reminds him of the possible estrangement of the queen. Then he boldly tells her:

देवीविरोधमनुशङ्क्य तवाङ्गसङ्ग-
सौख्यं चिराभिलषितं कथमुज्जहामि ।
व्यालीभयेन मलयाचलकन्दरस्थं
को वा पटीरतरुसारमपाकरोति ॥

(Page 19, Śloka 31)

Śṛṅgāramañjarī, hiding herself behind a pillar, is witnessing this love scene. As her patience gets exhausted she approaches the king and puts him to shame by using harsh words born out of jealousy. The king who is thus placed in a very awkward situation finds no means to appease the queen. In this embarrassing predicament Śivadāsa comes to his help. He assures the queen that even though the king has taken a fancy for Candralekhā, the queen is the only recipient of his constant love. Moreover he warns her that people around will only be too happy to see any couple estranged from each other. Thus Śivadāsa conciliates Śṛṅgāramañjarī and she agrees to look upon Chandralekhā as her sister. Śṛṅgāramañjarī and Candralekhā embrace each other and the former takes leave to get ornaments ready for the latter. After some time Candralekhā is called in to the inner apartments and provided with toilet and ornaments. And there she waits for her lover Madanaketu.

The Bhikṣu who has grown impatient by this time reminds the king of his own heart's desire and the king in his turn relates the same to Śivadāsa. The Kāpālika, on understanding the Bhikṣu's love affair, wonders at the universal influence of Manmatha:

कुलं वा शीलं वा विनयमथवा शौर्यमपि वा
प्रभुत्वं वा न त्वं गणयसि कदाचित्तनुभृताम् ।
स्वतन्त्रस्त्वं यस्मै नमयसि धनुः पुष्पघटितं
स तावद्दासत्वं चतुरयुवतीनां वितनुते ॥

(Page 23, Śloka 37)

In order to save the Bhikṣu from sensual life Śivadāsa chalks out a plan with psychological insight. He proposes to make him enjoy to the maximum and thus get disgusted with sensual pleasures. He envisages his plan in the following stanza:

चापल्यस्य परां काष्ठां मयायमनुभाव्यते ।
ततस्संसारमार्गेषु विरक्तिं प्रापयिष्यते ॥

(Page 23, Śloka 38)

Then Śivadāsa offers liquor to the Bhikṣu and praises it in glowing terms. The latter shows some reluctance to take the liquor on the plea that it militates against his religious sentiment, but is cowed down by the satirical remark of Śivadāsa:

अनङ्गलेखाधरशीधुपाने
समुत्सुकस्त्वं किल कामलोकः ।
शिवार्चनेऽस्मिन् मदिरोपयोगे
साक्षात् परिव्राडिति युक्तमेतत् ॥

The Bhikṣu drinks the liquor and then the king issues a command, probably in a comic mood, that all his subjects who are pursuing a spiritual life should take liquor and resort to brothels.

ये नाम केचन तपोनिधयो वसन्ति
संसारधर्ममपहाय मदीयराज्ये ।
ते सर्व एव मदिरामनिशं पिबन्तो
मच्छासनेन गणिकासदनं भजन्तु ॥

(Page 24, Śloka 40)

A maid servant announces to the king that Candralekhā is anxiously waiting for him and he takes leave of Śivadāsa to rush to the presence of his love.

नेत्रे यस्मिंस्तत्तथा । 'उपसर्गाच्च' इति नासिकाया नसादेशोऽच्प्रत्ययश्च । अभितः उभयतः न्यञ्चन्ती अवलम्बमाने मणिकुण्डले रत्नकुण्डले यस्मिंस्तत्तथा । 'रत्नं मणिर्द्वयोः' इत्यमरः । 'कृदिकारादक्तिनः' इति ङीप् । सञ्जल्पः साधुभाषितमेवामृतं तस्य फेनपुञ्जः फेनसमूहः हसितं हासः यस्मिंस्तत्तथा । हसितमित्यत्र भावे निष्ठा । ते मुखमुत्तमाङ्गं सञ्चिन्तये सम्यक् ध्याये । 'णिचश्च' इत्यात्मनेपदम् । अत्र मुखपदस्योत्तमाङ्गे लक्षणा । अन्यथा मञ्जुस्वर्णकिरीटमित्यादिविशेषणानामनुपपत्तेः ॥ ३ ॥

कण्ठेति । कण्ठे अलङ्कृतः कौस्तुभो येन तत्तथा । यद्वा, कण्ठेनालङ्कृतः कौस्तुभो यस्मिन् तत्तथा । कौमोदकी गदाविशेषः । कम्बुराट् पाञ्चजन्यः । कुण्ठा अपहृतवीर्या अरातयः शत्रवो यस्य तत्तथा । 'कुण्ठो मन्दः क्रियासु यः' इत्यमरः । कुण्ठाराति च तत् सुदर्शनं च कुण्ठारातिसुदर्शनम् । अक्षघुटिका जपमाला । करेषु लगन्त्यः सङ्गिन्यः कौमोदकीकम्बुराट्कुण्ठारातिसुदर्शनाक्षघुटिकाः यस्य तत्तथा । श्रीवत्सलक्ष्मीभ्यां अङ्कितं सञ्जाताङ्कम् । 'तदस्य सञ्जातं तारकादिभ्य इतच्' इतीतच् । निक्षिप्तानि विन्यस्तानि त्रीणि जगन्ति यस्मिंस्तत्तथा । निक्षिप्तत्रिजगत् कृशञ्च यदुदरं तस्मिन् लसन्त्यां प्रकाशमानायां नाभौ तिष्ठतीति निक्षिप्तत्रिजगत्कृशोदरलसन्नाभिस्थम् । तस्मात् नालीकात् पद्मात् जायते इति नालीकजः ब्रह्मा तस्मै न्यक्षेण कात्स्न्र्येन उदीरिता उक्ताः वेदा येन तत्तथा । 'न्यक्षः कात्स्न्र्यनिकृष्टयोः' इत्यमरः । तवेदं वपुः शरीरं मे खेदं आनुदतु अपाकरोतु । प्रार्थनायां लोट् ॥ ४ ॥

प्रीतमिति । इमे वयं प्रीतं आत्मानुभूत्यैव सन्तुष्टं गाढं यथा तथा निर्वीते वसिते पीतवसने पीताम्बरे व्यासङ्गिना संश्लिष्टेन काञ्चीकलापेन रशनाभूषणेन आदीप्रा समन्तात् प्रकाशमाना प्रपदं पादाग्रं तत्पर्यन्तं आप्रपदम् । तत् प्राप्नोतीत्याप्रपदीना या नीविः वस्त्रबन्धः तया निभृतौ संवृतौ आपीनौ पीवरौ ऊरू सक्थिनी यस्य स तथा तम् । 'कलापो भूषणे बर्हे' इत्यमरः । प्रपदं प्राप्नोतीति खः' । 'स्यात्त्रिष्वाप्रपदीनं तत्प्राप्नोत्याप्रपदं हि यत्', 'स्त्री कटी वस्त्रबन्धोऽपि नीविः', 'सक्थिः क्लीबे पुमानूरुः' इति चामरः । आसीदद्भिः समन्तात् तिष्ठद्भिः सनकैः

सनकादिभिश्चतुर्भिरादृतं सम्भावितम् । 'षद्लृ विशरणगत्यवसादनेषु' इति धातोः 'पाघ्रा०' इत्यादिना सीदादेशाल्लटः शत्रादेशः । सनकशब्देन चत्वारो व्यवह्रियन्ते । यद्वा आसीदता सनकेनादृतम् । पदयुगस्य उप समीपे आसीनाभ्यां स्थिताभ्यां धात्रीरमादासीभ्यां भूमिश्रीदासीभ्यां चारिते आन्दोलिते चामरे यस्य स तथा तम् । त्वां आराध्नुमः पूजामः । 'राध संसिद्धौ' इति धातोराङ्पूर्वात् स्वादेः स्नुप्रत्ययाल्लट् ॥ ५ ॥

सम्प्रति कविर्दयालुतया भगवतः सृष्ट्यादिकर्तृत्वप्रतिपादनपूर्वकं रक्षाप्रार्थनाव्याजेन सकलजनसंसारनिवृत्तिं प्रार्थयते — पूर्वमिति । सर्गः सृष्टिः, स्थितिः रक्षा, ध्वंसनं संहारः, तस्मिन् 'जातिरप्राणिनाम्' इत्येकवद्भावः । पूर्वं पुष्करविष्टरो ब्रह्मा, पुनः विष्णुः, पुना रुद्र इत्येवं इति क्रमेण पृथक् धूर्वहतां भारवाहित्वं वहसि बिभर्षि । किमिति प्रश्ने । 'किं वितर्के परिप्रश्ने' इत्यमरः । अहो भवन्माहिमाज्ञानामिदमाश्चर्यमित्यर्थः । सृष्टं ब्रह्मोपाधिना त्वयैव निर्मितं विश्वमित्यर्थः रक्षसि पालयसि । न च पूर्वं पुष्करविष्टर इत्यादिना भगवतः सृष्ट्यादिकर्तृत्वमुक्तं पुनः सृष्टं रक्षसीति पौनरुक्त्यमिति वाच्यम् । एकस्यैव भगवतः उपाधिभेदेन सृष्ट्यादिकर्तृत्वं केवलमज्ञैर्न ज्ञायत इत्यभिप्रायेण पूर्वमित्यादिना कथितम् । भगवतः स्थितिकर्तृत्वं सर्वैर्ज्ञायत इत्यभिप्रायेणासन्दिग्धत्वेन सृष्टं रक्षसीति कथितमित्यवगन्तव्यम् । रक्षितं पालितमपीति शेषः । रक्ष पालय, संसाराद्रक्षेत्यर्थः । मा संहरेत्यर्थात् गम्यते । न च रक्षितमपि रक्षेति पिष्टपेषणवत्, तत्तदुचितभोगान् दत्वा यत्किञ्चिद्दुःखकारिविपद्रक्षणेऽपि महादुःखकारिसंहारतुल्यसंसाररक्षणाभावादिति भावः । स्ववाक्येऽनादरमाशङ्क्य पितृवाक्यं प्रमाणयति — अलं संहृत्येत्यादिना । संहृत्य संहारं कृत्वा अलम् । 'अलं खल्वोः' इत्यादिना क्त्वः, 'समासेऽनञ्पूर्वे०' इत्यादिना ल्यप् । दुष्टात् दोषयुक्तात् इतोऽस्मात् कृत्यात् कार्यात् संहारादित्यर्थः । विरम्य निवृत्त्येत्यर्थः । तिष्ठेति । सम्यक् साधु, उक्त्वेति शेषः । पित्रा जमदग्निना वित्रासितो विशेषेण भीषितोऽसि । किमिति प्रश्ने । 'वर्तमानसामीप्ये वर्तमानवद्वा' इति लट् । अस्मादवतारात् पूर्वावतार इत्यर्थः ॥ ६ ॥

भगवद्वृत्तमेव सर्वैरनुभूयत इति कथनपूर्वकं भगवतो भक्तवात्सल्यं प्रकाशयति — न्यस्तमिति । अधेदानीं यतितुं यत्नं कर्तुम् ।

निर्गता तन्द्रा प्रमीला यस्मात् तन्निस्तन्द्रम् । निस्तन्द्रं चित्तं येषां ते तथा । तैः उद्योगशालिभिरित्यर्थः । नृभिर्नरैः चेतसि यद्यन्न्यस्तं निहितम् चिन्तितमित्यर्थः । पूर्वं सुप्ताः संविष्टाः पुनर्बुधिता बुद्धाः सुप्तबुधिताः तैः सद्भिः श्वोऽन्येद्युः तत्तत्स्मर्यत एव न लभ्यत इत्यर्थः । यतितुं निस्तन्द्रचित्तैरित्यनेन यत्ने कृतेऽपीति सूचितम् । सुप्तबुधितैरित्यनेन सदा चिन्ता सूचिता । त्वया दत्तं वितीर्णं वित्तं धनं वस्त्यं निशान्तम् । 'निशान्तवस्त्यसदनं भवनागारमन्दिरं' इत्यमरः । अपत्यमित्रदयिताभृत्यादि पुत्रमित्रकलत्रभृत्यादि ऐहिकं तु भुक्तये वा भोगायापि । भवतीति शेषः । वाशब्देन भगवद्दत्तस्यैहिकस्य न केवलं लाभ इति सूचितम् । भक्तजनाय प्रकर्षेणात्तं सम्पादितम् । त्वयेति शेषः । तत्तद्वितुं रक्षितुं तैर्भक्तजनैः तोषितस्त्वं यत्तः कृतप्रयत्नोऽसि । 'यति प्रयत्ने' इति धातोः कर्तरि निष्ठा । 'श्वीदितो निष्ठायां' इतीण्निषेधः ॥ ७ ॥

इदानीं कविर्भूतानुकम्पातिशयेन भगवन्तं विवेकशून्यप्राणिविषयां दयां प्रार्थयते — एनःपुण्येति । मर्त्यो मनुजः । 'मर्त्या मनुजा मानवाः इत्यमरः । इह अस्यां जनौ जन्मनि । 'जनुर्जननजन्मानि जनिः' इत्यमरः । ताम् । एनोऽघम् । 'कलुषं वृजिनैनोघं' इत्यमरः । एनःपुण्ययोः परम्परां वासनां न जानाति । सा नाम केत्यत आह — स्वेनात्मना । 'स्वो ज्ञातावात्मनि' इत्यमरः । पुरातनजनौ पूर्वजन्मनि अतियत्नेन अत्यन्तं प्रयत्नेन । पौनःपुन्येन क्रियासमभिहारेण । क्रियाणामभ्यावृत्तिभिरित्यर्थः । चिता सम्पादिता । भवतीति शेषः । येन कारणेन अनिशं अविरतम् । श्रवणे च त्वक् च अक्षिणी च रसना च घ्राणश्च तानि श्रवणत्वगक्षिरसना- घ्राणानि । प्रीणाति तर्पयति । 'प्रीञ् तर्पणे' इति क्र्यादि । यद्यपि 'द्वन्द्वश्च प्राणितूर्य०' इत्यादिनैकवद्भाव आवश्यकः, तथापि तस्य प्रायिकत्वं च अष्टाङ्गहृदयसंहितायां 'शिरःश्रवणपादेषु' इत्यस्य व्याख्यानावसरे अरुण- दत्ताचार्येण प्रतिपादितम् । प्राणेष्वतिप्रणयेन अत्यन्तं स्नेहेन अवशे अस्वतन्त्रे पशौ विवेकशून्ये प्राणिनि विषये दयार्द्रे कृपापूर्णे इत्यर्थः । दृशौ दृष्टी देये दातुं शक्ये, त्वयेति शेषः । बतेति खेदे ॥ ८ ॥

अथ कविरर्थमित्रकलत्रादिभिरैहिकैरात्मनः परलोकविषयकमालिन्या- भावाय भगवन्तं तत्कृपां प्रार्थयते — आयूरत्नमिति । आयुः रत्नं मरतक- माणिक्यादि । यद्वा, आयूरत्नं आयुःश्रेष्ठम् । 'रत्नं स्वजातौ श्रेष्ठेऽपि'

इत्यमरः । अयो लोहः तद्वत् घनः । लोहवत् दृढतर इत्यर्थः । अपघनोऽङ्गम् । 'अङ्गं प्रतीकोवयवोऽपघनं' इत्यमरः । अस्ति । अम्बुधाराभिः जलधाराभिः समाः सदृशाः रायो धनानि 'अर्थरैविभवा अपि' इत्यमरः । अम्बुधारासमा इत्यनेन धनबाहुल्यमुक्तम् । जायापुत्रमुखाः पत्नीतनयप्रभृतयः बहवः जनाः अन्तिके समीपे सन्ति यद्यपि तथापि मयूरो बर्हिणः तस्यायं मायूरः छदः पत्रम्, मायूरश्चासौ छदश्च मायूरछदः तस्येव बर्हस्येवेत्यर्थः । सादृश्ये वतिप्रत्ययः । तिर्यङ्मयूरसम्बन्धितयान्यमेलने तस्य न मालिन्यमित्यर्थः । भगवता शिरसि धार्यत इति प्रसिद्धिः । मम अन्यत्र परलोके । मलिनस्य मलदूषितस्य भावः मालिन्यम् । 'मलीमसन्तु मलिनं कच्चरं मलदूषितं' इत्यमरः । वासनारूपदोषकालुष्यमित्यर्थः । मा भूत् । 'माङि लुङ्' इति लुङ् । पीयूषवदमृतवत् प्रकर्षेण हिते हितकरे नयने नेत्रे स्फीतया प्रवृद्धया अनुकम्पया दयया घने सान्द्रे सती बिभृष्व धारय ॥ ९ ॥

कविः प्राणप्रयाणे भगवद्वपुर्दर्शनं प्रार्थयते — हीनप्रायेति । हीनप्रायमलैः क्षीणप्रायरागद्वेषादिभिः । मुमुक्षुभिरित्यर्थः । इतोऽस्मात् । अस्मदनुष्ठीयमानात् भगवद्ध्यानादित्यर्थः । अन्यत् अपरमखिलं सर्वमेवाफलं निष्फलं जानद्भिर्विदद्भिः । यद्वा, इतः अस्माद्वपुष इत्यर्थः । योगिभिः यमनियमादियुक्तैः । अतस्या उमायाः सूनस्य पुष्पस्य प्रभेव प्रभा यस्य तत्तथा । 'अतसी स्यादुमा क्षुमा' इत्यमरः । यद् वपुः । प्राघुणिकः अतिथिः । अप्राघुणिकः प्राघुणिकः सम्पद्यत इति प्राघुणिकीकृतम् । ध्यानस्य प्राघुणिकीकृतं ध्यानविषयीकृतमित्यर्थः । 'आवेशिकः प्राघुणिकः आगन्तुरतिथिस्तथा' इति हलायुधः । 'कृभ्वस्तियोगे' इत्यादिना अभूततद्भावे च्विः । प्राणप्रयाणे मरणकाले पावनता पवित्रतैव सुधा लेपः तयाक्तं लिप्तं अलिप्तावनमित्यर्थः । 'सुधा लेपोऽमृतं स्नुही' इत्यमरः । शशभृतश्चन्द्रस्य भानूनां रूपाणां प्रकाश इव प्रकाशो येषां ते तथा । शशभृद्भानुप्रकाशा अंशवः सूक्ष्मांशाः, तन्तव इत्यर्थः, यस्य तत्तथा । 'अंशुः तन्त्वादिसूक्ष्मांशः' इति नानार्थरत्नमाला । संव्यानं उत्तरीयम् । 'संव्यानमुत्तरीयं स्यात्' इत्यमरः । पावनतासुधाक्तञ्च शशभृद्भानुप्रकाशांशु च तत् संव्यानञ्च पावनतासुधाक्तशशभृद्भानुप्रकाशांशुसंव्यानम् । तेन प्रावृतं संवृतं एनत् तत् वपुः शरीरं ईक्षितुं द्रष्टुं वृणे प्रार्थयामि । त्वामिति शेषः ॥ १० ॥

(२)

अथ कविः संक्षेपतो दशभिः श्लोकैः दशावतारान् वर्णयति—अनूनाभोगत्वादित्यादिना। इह शरीर एव स्थितव्रतां मुनीनां अष्टानां सत्यव्रतसहितानां सप्तर्षीणामपि भणितिभिः वाग्भिः। अनूनः अनल्पः आभोगो विस्तारो यस्य तस्य भावस्तत्त्वं तस्माद्धेतोः। 'आभोगः परिपूर्णता' इत्यमरः। सुष्ठु भणितुं वक्तुं शक्याः सुभणाः, ते न भवन्तीत्यसुभणाः। 'ईषद्दुःसुषुकृच्छ्राकृच्छ्रार्थेषु खल्' इति खल्। असुभणा गुणा यस्यतत्तथा। शतदशानां, सह(स्रे: स्रमि)त्यर्थः, शतानां समाहारः शतदशशती। 'द्विगोश्च' इति ङीप्। तत्सङ्ख्याकयोजनैर्मितं परिमितम्। योजनालक्षपरिमितमित्यर्थः। श्रुतीनां वेदानां प्रत्यापत्त्यै प्रतिलब्ध्यै। हयग्रीवनाम्ना असुरेण ब्रह्ममुखेभ्योऽपहृतानां वेदानां प्रत्यादानायेत्यर्थः। 'श्रुतिः स्त्री वेद' इत्यमरः। श्रितः आश्रितः शफरभावो मत्स्यत्वं येन तत्तथा। वपुः तवेति शेषः। मे मम स्मृतिप्रत्यासत्तिं स्मरणसन्निकर्षं नय प्रापय। मत्स्मृतिविषयं कुर्वित्यर्थः॥ १॥

स्वभक्तमिति। संसारात् अर्थपुत्रमित्रकलत्रादिरूपात् स्वभक्तमिव विषसुधाभ्यां हेतुभ्यां यो वेधो मर्दनं तेन कलुषात् आविलात् जलनिधेः समुद्रात् मग्नमेकं धरणिधरं मन्दरमित्यर्थः, समुद्धर्तुं। पविः कुलिशम्। 'कुलिशं भिदुरं पविः' इत्यमरः। तस्मात् स्थेयोऽतिशयेन स्थिरं पृष्ठं यस्य तत्तथा। स्थिरशब्दस्य 'प्रियस्थिरं' इत्यादिना स्थादेशादीयसुन्प्रत्यये स्थेय इति रूपम्। कच्छपस्य कमठस्य वपुः। 'कूर्मे कमठकच्छपौ' इत्यमरः। प्रकटितवते प्रकाशितवते। धृतवते इत्यर्थः। अवाप्यन्यं धरणिधरं शेषमित्यर्थः। वहते बिभ्रते ते तुभ्यं नमः। 'नमःस्वस्ति' इत्यादिना चतुर्थी॥ २॥

निराकुर्वन्निति। वराको बालो यः गर्वात् सर्वं त्रिदशकुलं देवसमूहं निराकुर्वन् धिक्कुर्वन् उर्वीं भूमिं अपहरन् सन् त्रिविधमपराधं आगः 'आगोऽपराधो मन्तुश्च' इत्यमरः। व्यधित कृतवान्। निराहारैः अनशनैः निखिलमुनिभिः नूनः स्तुतः। 'नूञ स्तुतौ' इति धातोः कर्मणि निष्ठा। मखमयो यज्ञमूर्तिः त्वं महावराहाकारः महासूकराकृतिः सन्। 'वराहः सूकरो घृष्टिः' इत्यमरः। तं हिरण्याक्षमित्यर्थः। युधि युद्धे वधं निग्रहं अगमयः प्रापयः 'गतिबुद्धि०' इत्यादिनाणिकर्तुः कर्मत्वम्॥ ३॥

समाचारेति । सम्यग्भूता ये आचाराः यागादिकर्माणि तेषां द्वेष्टुः विघ्नकर्तुः तनयस्य पुत्रस्य यो विनयः त्वद्भक्तिसमिद्धा त्वद्गुणकथनत्वत्स्मरण-त्वदर्चनरूपा शिक्षा तस्मिन् । असूय्यं असूयायां गुणेष्वपि दोषारोपे साधु । 'असूया तु दोषारोपो गुणेष्वपि' इत्यमरः । 'तत्र साधुः' इति यत्प्रत्ययः । मनो यस्य स तथा तस्य । त्वद्गुणकथनाद्यसहिष्णुमनस इत्यर्थः । क्षमाचोरस्य धरामुषः, हिरण्याक्षस्येत्यर्थः, भ्रातः हिरण्यकशिपोरित्यर्थः । क्षतजं रक्तमेव मधु तस्य पातुः नरहरेः नृसिंहस्य ते हिरण्यकशिपुवक्षोविदारणे रूक्षा अपि लक्ष्मीकुचस्पर्शे मृदुला इत्यर्थः । लक्ष्म्याः श्रीदेव्याः कुचे कुचयोरि-त्यर्थः । जातावेकवचनम् । काश्मीरजस्य कुङ्कुमस्य लिपिं लेपनं कुर्वन्तीति तथा । 'अथ कुङ्कुमं काश्मीरजन्माग्निशिखम्' इत्यमरः । पाणिनखराः करनखाः मे मम रुजया रोगेण यदालस्यं निरुत्साहता तस्योच्छित्तिमुच्छेदं ददतु दिशन्तु । 'स्त्री रुग्रुजा चोपतापरोगव्याधिगदामयाः' इत्यमरः ॥ ४ ॥

समृद्धिरिति । वलभिदि इन्द्रे समृद्धिः सम्पत्समृद्धिः बलौ महा-बलौ दारिद्र्यं निष्किञ्चनत्वं पुनरात्मनि च सरसं सरागं यथा तथा सुरसिन्धुप्रणिहितं भागीरथीकृतं समुद्रस्य श्वाशुर्यं पत्नीपितृत्वम् । 'पतिप-त्न्योः प्रसूः श्वश्रूः श्वशुरस्तु पिता तयोः' इत्यमरः । इदं त्रयं यस्यैकैकस्य क्रमस्य पदविक्षेपस्य । 'क्रमु पदविक्षेपे' इति धातोः पचाद्यच् । फलितं फलनम् । 'फल निष्पत्तौ' इति धातोर्भावे निष्ठा । अयं भावः — वामनस्याव-तारे एकपदेन त्रिलोकी परिमिता । तदा इन्द्रस्य बलिनापहृतं त्रैलोक्याधिपत्यं लब्धम् । तदैव बलेर्दारिद्र्यञ्चाभूत् । द्वितीयपदेन ब्रह्माण्ड उद्भिन्ने भागीरथी भगवत्पादेन वहन्ती तत्स्पर्शादतिपावना भगवत्पुत्रीत्वमागता नानापर्वतदेशान् पुनाना समुद्रमागता तत्पत्नीत्वमाप । ततः समुद्रस्य श्वशुरत्वं चाभूत् । अत एव सरससुरसिन्धुप्रणिहितमित्युक्तम् । पूर्वमेव भगवच्छ्वशुरत्वं समुद्रे जातम् । वामनावतारे भगवति समुद्रश्वशुरत्वं च जातमिति चकारार्थः । कार्यपटवे कृत्यनिपुणाय तस्मै कपटवटवे व्याजब्रह्मचारिणे तुभ्यं नमः ॥ ५ ॥

धनुर्वेद इति । धनुर्वेदः अधीतः पठितः । त्वयेति शेषः । कुत्सि-ता धरणिपतयो राजानः धरणिपतिपाशाः । 'याप्ये पाशप्' इति पाशप् । विशसिता हताः । 'शसु हिंसायाम्' इति धातोः कर्मणि निष्ठा । यज्ञा

यागाः । 'यज्ञः सवोऽध्वरो यागः' इत्यमरः । सुनिर्व्यूढाः सुष्ठु यथा तथा निर्व्यूढाः कारिता इत्यर्थः । तद्द्विषन् हत्वा बहवो यागा यथावत् कारिता इति यावत् । सुजनानां सज्जनानां भरणं पालनं कृतम् । तपश्च कीर्तिश्च तपःकीर्ती तयोः सत्योः यद्यपि तदपि तदापि तव परे लोका न भवन्तीति शेषः । अस्माल्लोकादुत्कृष्टानां लोकानामभावादित्यर्थः । परलोकहेतुषु सर्वेष्वपि सत्सु परलोकानुत्पादकथनाद्विशेषोक्त्यलङ्कारः । 'कार्याजनिर्विशेषोक्तिः सति पुष्कलकारणे' इति तल्लक्षणात् । हि यस्मात् ते तव भृगुपतितया भार्गवत्वेन स्फुरन्त्या प्रकाशमानया मूर्त्या शरीरेण किन्नु फलितमुत्पन्नम् । 'फल निष्पत्तौ' इति धातोः कर्तरि क्तः । न किमपीत्यर्थः । जन्मनः फलं तु परलोकप्राप्तिः, तदभावात् किमपि फलं नास्तीति यथाश्रुतार्थः । वस्तुतस्तु आत्मारामस्य तव जन्मना किं भवति । इतरेषामेव फलं भवतीत्यर्थः ॥ ६ ॥

श्रवःपीयूषत्वमिति । यस्य चरितं कथा भुवने लोके श्रवसः श्रवणस्य पीयूषत्वं अमृतत्वम् । 'श्रुतिः स्त्री श्रवणं श्रवः' इत्यमरः । श्रवणात्यानन्दकरत्वमित्यर्थः । श्रयति भजति । अमरधुनी स्वर्गङ्गा यस्य नाम्नः पवित्रत्वं पावनत्वं पिपठिषति पठितुमिच्छति । 'धातोः कर्मणः' इत्यादिना सन्नन्ताल्लट् । विश्वं पुनानयापि स्वर्गङ्गया यस्य नाम्नः पावनत्वं पठनीयमित्यर्थः । नाम्नः पावनत्वमुक्तम् —

"राशब्दोच्चारमात्रेण मुखान्निर्यान्ति पातकाः ।
पुनः प्रवेशभीत्या च मकारस्तु कवाटवत् ॥"

इति । यस्य अस्त्राग्नेः शराग्नेश्चरितम् । वरुणं प्रति प्रयुक्तस्य आग्नेयास्त्रस्येत्यर्थः । धवित्रेण व्यजनविशेषेण इद्धात् दीप्तात् । 'धवित्रं व्यजनं यत्तद्रचितं मृगचर्मणा' इत्यमरः । और्वात् बाडवात् । 'और्वस्तु बाडवो बडवानलः' इत्यमरः । अतिशायि उत्कर्षशालि । भवतीति शेषः । विशेषेण त्रस्यन्तो भीताः सर्वे त्रिदशा देवा यस्मात् स चासौ दशकण्ठो रावणः तस्यारिः शत्रुः स त्वं मां अव रक्ष ॥ ७ ॥

रुजेति । रुजा रोगेण वा आलस्यान्मान्द्याद्वा शमितं नष्टं इयत् एतावत् । अल्पमित्यर्थः । आयुः जीवितकालः विफलितं निष्फलं यदि तर्हि एवं दिशा एवं प्रकारेण बालस्य अज्ञस्य अवाचः अधोमुखस्य । 'स्यादवा-

गप्यधोमुखः' इत्यमरः । करुणा दया । तवेति शेषः । कथमस्तु न केनापि प्रकारेण स्यादित्यर्थः । भक्त्या सुखेन लब्धुं स्वायत्तीकर्तुं शक्य , बल बलभद्र , दशनां आशापानां दिक्पतीनां आलम्बः आश्रयः । द्रुतस्य तप्तस्य रजतस्य रूप्यस्य भा इव भा यस्य स तथा । नीलं वसनं वस्त्रं यस्य स तथा । त्वं मे दृशोः दृष्ट्योः भद्रः भद्रकरः न चिरात् अविलम्बेन स्याः भवेः । मम दृग्गोचरो भवेत्यर्थः । 'विधिनिमन्त्रण' इत्यादिना प्रार्थनायां लिङ् ॥ ८ ॥

कुल इति । यद्वपुः वृष्णीनां यादवानां कुले वंशे उद्भूय सरसि कुवलयं उत्पलमिव । 'स्यादुत्पलं कुवलयम्' इत्यमरः । व्रजस्त्रीणां गोपस्त्रीणाम् । घ्राणे च श्रवणे च नयने च घ्राणश्रवणनयनं तस्य प्रीणनं प्रीणनसाधनम् । 'प्रीञ् तर्पणे' इति धातोः 'करणाधिकरणयोश्च' इति ल्युट् । अभूत् आसीत् । कुवलयस्यापि शोभासौरभ्याभ्यां नयनश्रवणघ्राणप्रीणनत्वमस्त्येव । कथं श्रवणप्रीणनत्वमिति चेदलङ्कारतया श्रवणोपरि विन्यस्तत्वेन श्रवणप्रीणनत्वमपि । यत् क्षितेः भुवो भारं हर्तुं पाण्डुजनुषां पाण्डवानां भरं भारं अभृत बिभर्ति स्म । तत् तव वपुः शरीरं मे हृदि स्थित्वा भवतापं संसारदुःखं हरतु ॥ ९ ॥

कलाविति । कलौ कलियुगावसाने क्लिन्ने क्लेदयुक्ते पक्वे कृमिकुलमिव कीटसमूहमिव पृथिव्यां भूमौ सर्वत्र प्रसृतं व्याप्तं म्लेच्छनिवहं म्लेच्छसमूहं दलयितुं खण्डितुं । तमिस्रायां रात्रौ भवं तामिस्रम् । 'तमिस्रा तामसी रात्रिः' इत्यमरः । 'तत्र भवः' इत्यण् । तमिस्रं तिमिरं । 'तमिस्रं तिमिरं तमः' इत्यमरः । दलयितुमित्यत्रापि सम्बध्यते । तरणिः सूर्य इव । 'द्युमणिस्तरणिर्मित्रः' इत्यमरः । खड्गेन असिना उज्ज्वलः प्रकाशमानः करो यस्य स तथा । तरणिपक्षे खड्ग इवोज्ज्वला कराः अंशवो यस्य स तथा । 'बलिहस्तांशवः कराः' इत्यमरः । कल्की भविष्यन् त्वं मम मुदे मोदाय भव ॥ १० ॥

(२)

कविः पुनरपि भगवन्तं स्तौति — कलिमुषीति । कुलीविनी नाम तीर्थविशेषः । तस्याः पुण्ये पुण्यकरे । कलिं कलिदोषमित्यर्थः, मुष्णातीति तथा तस्मिन् । तटे दक्षिणतीरे इत्यर्थः । घटितः कृतः आलयो येन तम् ।

'निकाय्यनिलयालयाः' इत्यमरः । कमलानां कुशेशयानां तुलसीनाञ्च, मालाभिः गन्धानुलेपनेन चन्दनानुलेपनेन च शोभनं प्रकाशमानम् । प्रणव ओङ्कारः सदनं भवनं यस्य तम् । तथा चोक्तम् — 'समासीनमोङ्कर्णिकेऽष्टाक्षराब्जे' इति । पूर्णः स्रक्चन्दनवनिताद्युपाध्यनवच्छिन्न आनन्दो यस्य तम् । कमलादेव्याः श्रीदेव्याः । 'कमला श्रीर्हरिप्रिया' इत्यमरः । प्रवीण्यपुण्ययोः सामर्थ्यसुकृतयोः फलाकृतिं फलस्वरूपं कमप्यनिर्वचनीयं पुमांसं पुरुषम् । त्वामिति शेषः । उपास्महे सेवामहे ॥ १ ॥

अथ कविः प्रतिज्ञां करोति—अपरिहरणीयेति । जातस्य मे अस्मिन् उद्भवे मृतिः मरणं अपरिहरणीया परिहर्तुं अशक्या । हे श्रीवासुदेव ! जडाय अज्ञाय मे मह्यं को वा हितं पथ्यं, तत्त्वज्ञानमित्यर्थः, उपदिशेत् । न कोऽपीत्यर्थः । त्रिविधैः करणैः क्रियाभिः कायिकवाचिकमानसिककर्मभिरित्यर्थः । शुचिः शुद्धः सन् शिवाय मङ्गलाय । 'श्वःश्रेयसं शिवं भद्रं कल्याणं मङ्गलम्' इत्यमरः । संसारोत्तरणायेत्यर्थः । शिवादिभिः महेश्वरप्रभृतिभिः सेव्यं उपास्यम् । विधुता विनाशिता दुरितस्तोमा-अंहःसमूहा येन तत्तथा । 'अंहो दुरितदुष्कृतम्' इत्यमरः । 'समूहनिवहस्तोमसङ्घसङ्घातसञ्चयाः' इत्यमरः । भवस्य संसारस्य भेषजं औषधम् । संसारोच्छेदकरमित्यर्थः । रामायणं रामायणाख्यं त्वच्चरितमित्यर्थः । सेवे प्रतिपाद्यत्वेनोपासे ॥ २ ॥

सम्प्रति कविर्भगवतश्चरितं वर्णयितुं सरस्वतीप्रसादं प्रार्थयते—ममेति । मधुर्नामासुरः तस्य रिपुः शत्रुः तस्य सम्बुद्धिः । मम वक्त्रात् आननात् । 'वक्त्रास्ये वदनं तुण्डमाननम्' इत्यमरः । महितरसनिष्यन्दा स्फीतशृङ्गारादिरसप्रवाहा सरस्वती वाक् । 'गीर्वाग्वाणी सरस्वती' इत्यमरः । मान्द्यं निरस्य अनायासेनेत्यर्थः । पुरा पूर्वं निहतः, व्याधेनेति शेषः, रमणो भर्ता यस्याः सा तथा । निहतरमणायाः क्रौञ्च्याः चक्रवाक्याः शोकानुबन्धात् सन्तापमेलनात् हेतोः प्रसृमरशुचः प्रवृद्धशोकस्य प्राचः प्राचेतसस्य वाल्मीकेः वक्त्रात् । पूर्वमनाविर्भूतं यथापुरम्, तत्र भवतीत्ययथापुरम् । अभूतपूर्वेत्यर्थः । सरस्वती ।

"मा निषाद! प्रतिष्ठां त्वमगमः शाश्वतीः समाः ।
यत् क्रौञ्चमिथुनादेकमवधीः काममोहितम् ॥"

एवंरूपा छन्दोमयी सरस्वती यथेति भावः । तथा सतां सज्जनानां मुदे प्रीतये चित्रं यथा तथा उदेतु निस्सरतु ॥ ३ ॥

अथ कविः स्वविनयमाविष्कुर्वन् स्वस्य वाल्मीकिसाम्यस्य कथने साहसत्वं मन्वानस्तदसम्भावितमेवेत्याह—किमिति । हे नाथ! इदमुचितं युक्तम् किमिति किञ्चित् सञ्चिन्त्य विचार्य न नाथितं न याचितम् । 'नाथृ याच्ञोपतापैश्वर्याशीःषु' इति धातोर्भावे निष्ठा । तत् साहसमेवेत्यर्थः । जाल्मे असमीक्ष्यकारिणि । 'जाल्मोऽसमीक्ष्यकारी स्याद्' इत्यमरः । मयि वाल्मीकेः साम्यलवस्य सादृश्यलेशस्य उद्भवो भवेद्यदि तदा मुखरः शब्दं कुर्वन् दशन् खादन् यः मशकस्य क्षुद्रप्राणिविशेषस्य शिशुकः शिशुः, स्वार्थे कन्-प्रत्ययः । सुमनसां पुष्पाणां मधु मकरन्दं हर्तुं शक्तो न भवतीति शेषः । स च मशकशिशुकोऽपीत्यर्थः । तार्क्ष्यस्य गरुडस्य तत् प्रसिद्धं दाक्ष्यं सामर्थ्यं अमृतानयनसामर्थ्यमित्यर्थः । लिप्सतां लब्धुमिच्छतु ॥ ४ ॥

एवमपि वाल्मीकिवर्णितभगवच्चरितसंक्षेपकथनेन सर्वान् प्रीणयामीति कविराह—बहुभिरिति । इह अस्मिन् विषये बहुभिर्जल्पैः वाग्भिः किम् । किमपि फलं नास्तीत्यर्थः । हे वरद ! अभीष्टद, अहं तव पादयोः भक्तिगुणैः भक्तिपाशैः दृढं यथा तथा नियमितां बद्धां शुद्धां मलरहितां इमां मनःकनकालुकां मानसभृङ्गारम् । 'भृङ्गारः कनकालुका' इत्यमरः । क्षिप्त्वा वाल्मीकीयात् वाल्मीकिना प्रोक्तात् । रामायणादित्यर्थः । 'तेन प्रोक्तम्' इति छः । एव उदपानतः कूपात् । 'कूप उदपानं तु पुंसि वा' इत्यमरः । वाल्मीकीयादुदपानत इति व्यस्तरूपकम् । पञ्चम्यास्तसिल् । हृतैः आहृतैः भवच्चरितैरेवामृतैः जलैः । 'पयःकीलालममृतम्' इत्यमरः । भवाः संसारा एव मरवो निर्जलप्रदेशास्तैः परिश्रान्तान् परिक्षीणान् । तेषु सञ्चारादत्यन्तक्षुधितानित्यर्थः । पान्थान् पथिकान् धिनुयां प्रीणयेयम् । 'धिवि प्रीणनार्थे' इति धातोर्लिङ् ॥ ५ ॥

अथ कथामारभते—भुवनेति ॥ भुवनविदिते लोकप्रसिद्धे साकेताख्ये साकेतनाम्नि । साकेतमित्ययोध्यायाः संज्ञा । पुरे दिवाकरवंशजः सूर्यवंशजः दशरथ इति ख्यातः प्रसिद्धः राजा बभूव । विशसिता निहता रिपुव्राताः शत्रुसमूहा येन स तथा । स्फीतं प्रवृद्धं रुषं कोपं

विजहत् त्यजन् । अतिकोपस्यानर्थहेतुत्वादित्यर्थः । स राजा सर्वां उर्वीं भूमिं दिवं स्वर्गं च अहर्दिवं सदा अरक्षत् रक्षितवान् । द्योरक्षकत्वं चास्यैवं बोध्यम् । इन्द्रजयार्थमसुरेषु स्वर्गं गतेष्विन्द्रेण प्रार्थितो राजा तान् विजित्य दिवमरक्षत् । यागादिसत्कर्मभिरिति वा ॥ ६ ॥

तस्य रक्षासामर्थ्यमाह—अवतीति । अस्मिन् राजनि दशरथे अस्मेरचेतसि अगर्वचित्ते जगतीं भूमिं अवति रक्षति सति शरीरिषु प्राणिषु त्रिविधानां आध्यात्मिकाधिभौतिकाधिदैविकानां विपदां आपदां आविर्भावः नाजनि नाभूत् । त्रीणि चरणानि यस्य सः त्रिचरणः तस्य भावः त्रिचरणता तया त्रेतौचित्यं त्रेताख्ययुगस्य योग्यतां फलेन सिद्ध्या कृतौचितीं कृताख्ययुगस्य योग्यतां च दधत् बिभ्रत् । त्रेताख्ययुगे भूमौ चरणत्रयमवष्टभ्य धर्मस्य स्थितिरिति प्रसिद्धिः । वृषस्वरूपस्य धर्मस्य कृतादिक्रमेण एकैकस्य चरणस्य भुवि स्पर्शाभावः एकैकतुर्यांशस्य नाशश्चेति प्रसिद्धिः । एकचरणस्य भुवि स्पर्शाभावेऽपि एकतुर्यांशस्य नाशो नाभूदित्यर्थः । धर्मः अतिमुदा अत्यन्तं मोदेन रम्यां रमणीयां नटार्भटीं नटव्यापारं ननाट नृत्तं चकारेत्यर्थः । प्रवृद्धोऽभूदिति यावत् ॥ ७ ॥

दशरथचरितान्येवाह—अकृतेति । वृषवत् वासवतुल्यः । 'वासवो वृत्रहा वृषा' इत्यमरः । 'तेन तुल्यं क्रिया चेद्वतिः' इति वतिप्रत्ययः । स्थितो नृपो राजा अन्तं कृतापेक्षया नष्टम् । तुर्यांशतो हीनमित्यर्थः । सुकृतौत्सुक्यं पुण्यासक्तिम् । जनानामिति शेषः । अकृत कृतवान् । कुहचन क्वचित् सुधर्मायां देवसभायाम् । 'स्यात् सुधर्मा देवसभा' इत्यमरः । क्वचिन्निजे स्वकीये जायाव्रजे पत्नीसमूहे प्रकर्षेण निहितं न्यस्तं मनो येन स तथा । क्वचन समये उपाध्यायेन सह वर्तत इति सोपाध्यायः । क्वचित् सचिवैः मन्त्रिभिः अन्वितो युक्तः सन् । व्यभिचारः सहचाराभावोऽस्यास्तीति व्यभिचारी, स न भवतीत्यव्यभिचारी । फलस्याव्यभिचारिणं फलसहचारिणम् । अवश्यफलजनकमित्यर्थः । मन्त्रं वेदांशं गूढोक्तिं च । 'मन्त्रो गूढोक्तिवेदांशौ' इति नानार्थरत्नमाला । भेजे अशिश्रियत् । देवान् पत्नीश्च सञ्चिन्त्य तद्धितार्थं सत्कर्माणि मन्त्रविचारञ्च कृतवानिति भावः ॥ ८ ॥

प्रथमेति । अस्य दशरथस्य प्रशस्यैः श्लाघ्यैः गुणैः दाक्षिण्यादिभिः उत्तमा श्रेष्ठा कौसल्या कौसल्याख्या । प्रथमा चासौ महिषी च प्रथममहिषी प्रधानपत्नीत्यर्थः । दिने दिने प्रतिदिनं नवा नूतना । अनुरागादित्यर्थः । कैकेयी मध्यमा प्रिया । निरुपमाः गुणाः यस्याः सा तथा । निस्सापत्न्या निर्मत्सरा निरुपधि निर्व्याजं यथा तथा । 'व्याजदम्भोपधयः छद्मकैतवे' इत्यमरः । तयोः कौसल्याकैकेय्योः निदेशकरी आज्ञाकर्त्री सुमित्राख्या प्रिया चासीत् । एताः 'कौसल्याद्याः अपरा अन्याश्च नृपस्य दशरथस्य मुदे बभूवुरिति शेषः ॥ ९ ॥'

दशरथेति । दशानां शतं दशशतं सहस्रमित्यर्थः । दशशतं मुखानि यस्य स तथा । शेष इत्यर्थः । जन्मन आरभ्य आजन्म । आजन्मपूता शुद्धा मतिर्यस्य तस्य । दशरथश्चासौ महाराजश्चेति दशरथमहाराजः तस्य । 'राजाहःसखिभ्यष्टच्' इति टच् । गुणान् शौर्यादीन् वक्तुं शक्तः । सहस्रमुखत्वादित्यर्थः । परः अन्यस्तु वस्तुतो न शक्तः । किन्तु सामान्यतो वक्तुं शक्त एवेत्यर्थः । तदेवाह — स चेति । स च परस्तु तव स्वापाभावे निद्राभावे । 'स्यान्निद्रा स्वपनं स्वापः' इत्यमरः । स्तुतः स राजा तव पिता जनकोऽस्तु । तव सृष्ट्यादिपरम्परायां सत्यां त्वं तस्य पुत्रो भवेत्यर्थः । तादृशगुणो राजेति यावत् । इति वदेत् ब्रूयात् । हे श्रीसङ्गमेश ! दयानिधे ! त्वं दासं प्रणतं मां अव रक्ष ॥ १० ॥

(४)

ससागरेति । प्रसारितो व्यापितो यशश्चयः कीर्तिसमूहो येन स तथा । प्रियाः तिस्रो यस्य सः तथा । सागराः समुद्राः गिरयः पर्वताः तेषां व्रजः समूहः तेन सह वर्ततइति तथा । तां भुवं भूमिं प्रशासत् प्रकर्षेण रक्षन् । एतेन सप्तद्वीपानां सप्तसमुद्राणाञ्चाधिपत्यमुक्तम् । सुतरां महतः त्रिवर्गाम्बुधेः त्रयाणां धर्मार्थकामानां वर्गः समूहः स एवाम्बुधिः समुद्रः तस्य पारमधिजग्मिवान् अधिगतवान् । विधिवत् धर्मार्थकामान् सम्पादितवानित्यर्थः । सः प्रजानायको राजा स्वस्य भारस्य हरणे क्षमं योग्यं सुतं पुत्रं अनासवान् अप्राप्तः सन् विव्यथे दुःखितवान् ॥ १ ॥

अथ मत्स्यावतारं (प्राप्त ? प्रस्ता)वयन्नाह—

तदा कदाचिद् द्रमिलक्ष्मापतिः
कृती स सत्यव्रत इत्यभिश्रुतः ।
ऋषित्वमाप्तो दृढया तपस्यया
वनादयासीत् सवनाय निम्नगाम् ॥ ३९ ॥

तदेति । तदा तस्मिन् काले कदाचित् सत्यव्रत इति अभिश्रुतः प्रसिद्धः द्रमिलक्ष्मायाः द्रमिलराज्यस्य पतिः प्रभुः कृती विद्वान् दृढया निश्चलया तपस्यया तपसा ऋषित्वमाप्तस्तपोधनत्वं प्राप्तः स राजर्षिः सवनाय स्नानार्थं वनात् निम्नगां नदीमयासीत् प्राप्तवान् ॥ ३९ ॥

निमज्य तस्यां नियतात्मनो मुने-
र्निजान् पितॄंस्तर्पयतो धृताम्भसि ।
कराञ्जलौ कश्चन मत्स्यपोतकः
समुल्ललासाब्ज इवारुणातपः ॥ ४० ॥

निमज्येति । तस्यां निम्नगायां निमज्य स्नात्वा नियतात्मनो निरुद्धबहिर्व्यापारमनसः, निश्चलहृदयस्येति यावत् । निजानात्मीयान् पितॄंस्तर्पयतः पितृतर्पणं कुर्वतो मुनेः सत्यव्रतमहर्षेः धृताम्भसि धृतजले कराञ्जलौ संहतकरतलद्वयसंपुटे कश्चन मत्स्यपोतको मत्स्यशिशुः समुल्ललास शुशुभे । अब्जे पङ्कजोदरे अरुणातपो बालातप इव । अनयोप(मै ? मयै)वारुणवर्णतास्य [illegible] ॥ ४० ॥

ससंभ्रमं तेन स[illegible]ज्झितो जले
यदा स नापाद्यपदन्यतो झषः ।
तदा तमादाय दयालुनामुना
शनैरुपानीयत कुण्डिकोदरम् ॥ ४१ ॥

ससंभ्रमेति । तेन मुनिना ससंभ्रमं सवेगं जले समुज्झितस्त्यक्तः स झषो मत्स्यशिशुर्यदा यस्मिन् कालेऽन्यतोऽन्यत्र प्रदेशे नापाद्यपत् न गतवान्, क्षिप्तस्थान एव स्थितवानित्यर्थः, तदा तस्मिन् काले दयालुना कृपाशालिनामुना मुनिना शनैर्मन्दमन्दं कुण्डिकोदरं जलपात्रस्यान्तर्भागं (उपानीयत) प्रवेशित इत्यर्थः ॥ ४१ ॥

अमान्तमस्मिन् पुनरेनमक्षिपद्
घटस्य कुक्षौ बृहतो महीपतिः।
अहो मुनेरप्यसमीक्ष्यकारिता
पिधित्सितो येन पटेन पावकः ॥ ४२ ॥

अमान्तमिति । महीपतिः सत्यव्रतमुनिरस्मिन् कुण्डिकोदरे अमान्तमपरिच्छिन्नं पुनरेनं झषं बृहतः पृथोर्घटस्य कुक्षावुदरेऽक्षिपत् निहितवान् । क्रमप्रवृद्धशरीरत्वात् कुण्डिकोदरमस्य न पर्याप्तं स्थातुमिति तत उद्धृत्य महाघटगर्भे प्रावेशयदेनमित्यर्थः । ब्रह्माण्डकुक्षावप्यपरिच्छिन्नस्यास्य घटकुक्षिव्यवच्छेद्यतामिच्छतो मुनेर्मोहमुत्प्रेक्ष्य कविश्चमत्करोति अहो इति । मुनेरपि दिव्यचक्षुषोऽप्यसमीक्ष्यकारिता साहसिक्यम् अहो आश्चर्यम् । अविवेकितोपज्ञमिदमित्यर्थः । येन मुनिना पावकोऽग्निः पटेन वस्त्रेण (पिधित्सितः पिधातुं इष्टः । अग्निं वस्त्रेण) यः छादयति स वैनं क्वापि व्यवच्छिनत्तीति सदृशयोर्वाक्यार्थयोरैक्यारोपान्निदर्शनालङ्कारः ॥ ४२ ॥

स दिव्यमत्स्यस्तरसावृधत्तथा
यथान्धुकासारतरङ्गिणीष्वमान् ।
क्षयाय संक्षुभ्यति तेन योगिना
कथञ्चिदक्षिप्यत वारि वारिधेः ॥ ४३ ॥

... ...

.... नदीष्वप्यमान् अपरिच्छिन्नः सन् "पुंस्येवान्धुः प्रहिः कूपः" इत्यमरः । "तटाकोऽस्त्री कासारः" "तरङ्गिणी शैवलिनी" इत्यमरः । योगिना योगाभ्यासलब्धाणिमाद्यैश्वर्यशालिना तेन सत्यव्रतमुनिना वारिधेः समुद्रस्य क्षयाय प्रलयं प्रवर्तयितुं संक्षुभ्यति संक्षोभं प्राप्नुवति वारि (धिः?) जले कथञ्चिद्यत्नेनाक्षिप्यत क्षिप्तः । अन्ध्वादिष्वमान्तमेनं कथं मुनिरुद्धृतवानित्याशङ्कापरिहाराय योगिनेति विशेषणमुक्तम् । योगिभिः किं दुर्वहं नामेति भावः । तादृशेनापि यत्नेनैवासावुद्धृत इत्यहो अस्य महत्त्वमिति द्योतितम् ॥

विषाणदण्डाग्रविदीर्णयादसा
विवर्तनोत्कूलितसागराम्भसा ।
अधःकृताद्रिप्रवरेण वर्ष्मणा
क्षणादिवाशाः स्थगयांबभूव सः ॥ ४४ ॥

विषाणेति । स दिव्यमत्स्यो विषाण(दण्डस्य) दण्डवत् स्थूलदीर्घस्य शृङ्गस्याग्रेण प्रान्तेन विदीर्णानि शकलितानि यादांसि जलजन्तवो येन । विवर्तनेन भ्रमणेन हेतुना उत्कूलितम् । कूलमतिक्रान्तमुत्कूलितम् । तथाकृतं सागराम्भः समुद्रजलं येन । अधःकृतो न्यक्कृतोऽद्रिप्रवरो महामेरुर्येन । तादृशेन वर्ष्मणा वपुषा, प्रमाणेन वा । 'वपुःप्रमाणयोर्वर्ष्म' इति वचनात् । क्षणादिव क्षणेनैवाशा दिशः स्थगयांबभूव आच्छादितवान् । समुद्रे दश दिशोऽपि समावृणोदित्यर्थः ॥ ४४ ॥

अथैनमत्यद्भुतमत्स्यविग्रहं
विवेद विष्णुं द्रमिलावनीपतिः ।
अलौकिकं वस्त्वबुधोऽपि तत्त्वतो
विवेक्तुमीष्टे किमुतात्मवेदिनः ॥ ४५ ॥

अथेति । (द्रमिलावनीपतिः) सत्यव्रतमुनिः अत्यद्भुतमत्स्यविग्रहमतिशयेनाश्चर्यभूतमत्स्यशरीरमेनं विष्णुं विवेद ज्ञातवान् । विष्णुरेवैष मत्स्यशरीरेणागत इति परमार्थतया विदितवानित्यर्थः । कथं विदितवानित्याशङ्कामर्थान्तरन्यासेन परिहरति । अबुधोऽप्यज्ञोऽपि अलौकिकं लोकातिशायि वस्तु लोके सामान्येन दृश्यमाना(द्) विशिष्टतया दृष्टं वस्तु तत्त्वतः परमार्थतो विवेक्तुं विचारयितुमीष्टे समर्थो भवति ; किमुत किं पुनरात्मवेदिन आत्मज्ञाः । आत्मतत्त्ववेदिनो जना इदं परमार्थेन जानन्तीति किमाश्चर्यमित्यर्थः ॥ ४५ ॥

नमन्नसावस्तुत वस्तुतो भवा-
नवेदि वेदोद्धरणोद्यतो मया ।
अनन्तरूपाय चराचरात्मक-
प्रपञ्चकर्त्रे भगवन् ! नमोऽस्तु ते ॥ ४६ ॥

नमन्निति । असौ सत्यव्रतमुनिर्नमन् कृतनमस्कारः सन् अस्तुत स्तुतवान् । स्तुतिप्रकारमाह — हे भगवन् ऐश्वर्यादिगुणशालिन् ! वेदानामुद्धरणे प्रत्याहरणे उद्यत उद्युक्तो भवान् मया वस्तुतः परमार्थतोऽवेदि विदितः । वेदोद्धरणाय प्रवृत्त इति ज्ञात इत्यर्थः । अनन्तरूपायानेकरूपग्राहिणे चराचरात्मकस्य जङ्गमस्थावररूपस्य प्रपञ्चस्य लोकस्य कर्त्रे निर्मात्रे ते नमोऽस्तु ॥

अविक्रियोऽपि प्रकृतिप्रपाश्रित-
प्रपञ्चसञ्चेतनहेतुतां व्रजन् ।

गुणानवष्टभ्य जगन्निधे ! भवान्
विभर्ति मूर्तीर्विविधप्रकारिकाः ॥ ४७ ॥

अविक्रिय इति । जगन्निधे! जगन्ति निधीयन्ते यस्मिन्निति अधिकरण-साधनो जगन्निधिशब्दः । यदाह :—

"(पर ? विर)मति महाकल्पे नाभीपथैकनिकेतन-
स्त्रिभुवनपुरः शिल्पी यस्य प्रतिक्षणमात्मभूः ।
किमधिकरणा कीदृक् कस्य व्यवस्थितिरित्यसा-
वुदरमविशद् द्रष्टुं तस्मै जगन्निधये नमः ॥"

इति । भवानविक्रियो विकाररहितोऽपि प्रकृत्या मायया प्रपञ्चितस्य विस्तारितस्य प्रपञ्चस्य जगतः सञ्चेतने चैतन्यापादने हेतुतां व्रजन् कारणत्वमधिगच्छन् । तदुक्तं प्रबोधचन्द्रोदये —

"तनोति विश्वेक्षितुरीक्षणेरिता
जगन्ति मायेश्वरतेयमीशितुः ॥"

इति । अथवा "प्रधानं प्रकृतिः स्त्रियाम्" इत्यमरवचनात् प्रकृतिरिति प्रधानमुच्यते । प्रधानाद्विश्वोत्पत्तिरिति केचिदाहुः । गुणान् सत्त्वरजस्तमांसि अवष्टभ्य आश्रित्य विविधप्रकारिकाः विरिञ्चिगिरिशाद्या नानाप्रकारा मूर्तीः शरीराणि बिभर्ति धारयति । अविक्रिय इत्यनेन स्वयं निर्गुणः सन्नपि गुणावष्टम्भेन बहुविधशरीराण्याविष्करोति भवानित्यर्थः ॥ ४७ ॥

विगाह्य विश्वं प्रतिबिम्बकोटिभि-
र्भवान् विवस्वानिव वारिमण्डलम् ।
तनोति हि स्थूलदृशां शरीरिणां
पृथक्पृथक्त्वभ्रममात्मनो हरे ! ॥ ४८ ॥

विगाह्येति । हे हरे ! भवान् प्रतिबिम्बानां प्रतिकृतीनां कोटिभिः समूहैः । विश्वमशेषभुवनं विगाह्य प्रविश्य स्थूलदृशां विवेकबाह्यानां शरीरिणां देहभृताम् आत्मनः स्वस्य पृथक्पृथक्त्वभ्रमं प्रतिशरीरं भिन्नभिन्नः परमात्मेति भ्रान्तिं तनोति विस्तारयति । द्वैतबुद्धिमुत्पादयतीत्यर्थः । अत्रोप-

मामाह । विवस्वान् सूर्यो वारिमण्डलं कूपतटाकघटशरावादिनिष्ठामम्बुसन्ततिमिव । एकोऽपि विवस्वान् प्रतिजलाशयं प्रविष्टैः प्रतिबिम्बशतैर्बहुरूपतया यथा सम्भाव्यते तथैव भवानेकः परमात्मा सन्नपि प्रतिशरीरं जीवात्मतया भिन्न इव लक्ष्यत इत्यर्थः । स्थूलदृशामिति परमार्थतो विवेक्तुमसमर्थानाम् । परमार्थविचारे तु भवानेक एवेत्यवधातव्यं भवतीति तात्पर्यम् ॥ ४८ ॥

जना हयग्रीवमुदाहरन्ति यं
तमेव ते सोमकनामकं विदुः ।
अमुष्य ते द्वे अपि नामनी परं
भवानितः श्लेषयितुं प्रवर्तते ॥ ४९ ॥

जना इति । जना यमसुरं हयग्रीवमुदाहरन्ति वदन्ति तमेव तं हयग्रीवमेव ते जनाः सोमकनामकं सोमकासुरसंज्ञं विदुर्जानन्ति । अमुष्यासुरस्य परं केवलं ते द्वे नामनी अपि हयग्रीव इति सोमक इति च इतः परस्ताच्छ्लेषयितुं शिष्टे कर्तुं भवान् प्रवर्तते प्रारभते । अमुं नामद्वयशेषीकर्तुं निग्रहीतुमित्यर्थः, भवानिदानीमुद्युक्त इति मया ज्ञात इति भावः ॥ ४९ ॥

उपस्थितोऽयं प्रलयो यदब्धयो
विलङ्घ्य मुद्रां मुहुरुच्चलन्त्यमी ।
तदेतदेकार्णवमीक्षितुं जगद्
जगत्पते ! वाञ्छति दास एष ते ॥ ५० ॥

उपेति । अयं प्रलयः कल्पावसानमुपस्थितः प्राप्तः । यद्यस्मात् कारणादमी अब्धयः समुद्रा मुद्रां सीमां विलङ्घ्यातिक्रम्य मुहुः पुनः पुनरुच्चलन्ति उद्गच्छन्ति । हे जगत्पते ! तस्मात् कारणादेष ते दासः तव किङ्करोऽहम् एतज्जगल्लोकम् एकार्णवमेकसमुद्रीभूतम् ईक्षितुं द्रष्टुं वाञ्छतीच्छति । तां मदिच्छां पूरयतु भवानित्यभिप्रायः ॥ ५० ॥

अथावदन्मत्स्यवपुर्धरो हरि-
स्तथास्तु सत्यव्रत सत्त्ववानसि ।
इह प्रतीक्षस्व च सप्त वासरान्
धरा तदा वारिणि मङ्क्षु मङ्क्ष्यति ॥ ५१ ॥

अथेति । तद्वचनानन्तरं मत्स्यवपुर्द्धरो मत्स्यरूपी हरिर्विष्णुरवद-दुक्तवान् । हे सत्यव्रत! तथास्तु । यथा भवानिच्छति तथा भवतु । त्वं सप्त दिवसान् प्रतीक्षस्व प्रतिपालय । तदा तस्मिन् काले इतोऽष्टमे वासर इत्यर्थः । धरा भूमिर्वारिणि जले मङ्क्षु क्षिप्रं मङ्क्ष्यति मग्ना भविष्यति ॥ ५१ ॥

इति ब्रुवाणश्चलबाललोलिते
ममज्ज वारां निलये महाझषः ।
समुच्चलन्ति स्म च सप्त सागरा
नभस्पृशस्तुङ्गतरङ्गराशिभिः ॥ ५२ ॥

इतीति । महाझषो दिव्यमत्स्यः । इति ब्रुवाणो वदन् वारां निलये समुद्रे ममज्ज मग्नवान् । कीदृशे । चलेन कम्पितेन बालेन लाङ्गूलेन लोलिते क्षोभिते । सप्त सागराश्च तुङ्गैरुच्छ्रितैस्तरङ्गराशिभिर्वीचिनिचयैः नभस्पृशः नभोऽम्बरं स्पृशन्तीति, "स्पृशोऽनुदके क्विन्"(३-२-५८) इति क्विन्प्रत्ययः, तथा सन्तः समुच्चलन्ति स्म समन्तात् प्रवर्धन्ते स्म ॥ ५२ ॥

समन्ततस्ते बृहदूर्मिमण्डली-
कराञ्चलैस्ताडनचूर्णिताचलैः ।
मिथः स्पृशन्ति स्म सुहृत्समागम-
प्रमोदहासायितफेनपङ्क्तयः ॥ ५३ ॥

समन्तत इति । ते समुद्राः समन्ततः परितः, बृहत्यो महत्य ऊर्मि-मण्डल्यस्तरङ्गपङ्क्तय एव कराञ्चलानि हस्ताग्राणि तैः । कीदृशैः । ताडनेन प्रहारेण चूर्णिताचलैः शकलितसर्वपर्वतैः । मिथोऽन्योन्यं स्पृशन्ति स्म स्पृष्ट-वन्तः । कीदृशाः समुद्राः । सुहृदां बन्धूनां समागमे सम्मेलने यः प्रमोदो हर्ष-स्तत्र हासायिता हास इवाचरन्त्यः फेनपङ्क्तयो येषां तादृशाः । दूरप्रोषितानां सुहृदां यदृच्छया समागमे प्रहर्षेण हासः संभवत्येव ॥ ५३ ॥

निमग्नशैलालि निगीर्णभूतलं
निरन्तरग्राहतिमिङ्गलावृतम् ।
समाचमौ सप्तभिरेव वासरैः
समस्तमेतद् सलिलात्मकं जगत् ॥ ५४ ॥

निमग्नेति । समस्तं निश्शेषमेतद् जगद् भुवनं सप्तभिरेव वासरैः सलिलात्मकं जलस्वरूपम् , सलिलमयमित्यर्थः, समाबभौ शुशुभे । कीदृशम् । निमग्नाः शैलाल्यः पर्वतसमूहा यस्मिन् । निगीर्णं निमग्नं भूतलं यस्मिन् । निरन्तरैर्निबिडैर्ग्राहैर्नक्रैस्तिमिङ्गिलैर्मत्स्यविशेषैश्चावृतमाच्छादितम् । इदमुपलक्षणमन्येषां च जलजन्तूनाम् ॥ ५४ ॥

सहैव सप्तर्षिभिरम्बुसन्ततौ
निमज्जनोन्मज्जनविह्वलीकृतम् ।
दधार भूमिर्द्रमिलेशमाज्ञया
हरेः स्वमूर्त्या किल नाव्यमानया ॥ ५५ ॥

सहेति । भूमिर्भूमिदेवी हरेर्मत्स्यरूपस्य विष्णोराज्ञया नियोगेन हेतुना नाव्यमानया नौरिवाचरतीति नाव्यमाना 'कर्तुः क्यङ्' (३-१-११) इति क्यङन्ताच्छानच् । 'वान्तो यि प्रत्यये' (६-१-७९) इति वान्तादेशः । तया नौस्वरूपमाश्रयन्त्या स्वमूर्त्या स्वशरीरेण द्रमिलेशं सत्यव्रतं दधार धृतवती । किलेति प्रसिद्धौ । कीदृशम् । सप्तर्षिभिः सहैवाम्बुसन्ततौ जलसञ्चये निमज्जनोन्मज्जनाभ्यां कर्तृभ्यां विह्वलीकृतं परवशीकृतम् । तथाभूतमेनं नौरूपा भूमिरात्मन्यारोप्य ररक्षेत्यर्थः ॥ ५५ ॥

अथोच्चकैरुच्चलदूर्मिसञ्चया-
दुदग्रशृङ्गाञ्चलचुम्बिताम्बरः ।
जलैकदेशादुदमज्जदण्डजः
प्रचण्डकण्ठारवभैरवाकृतिः ॥ ५६ ॥

अथेति । तद्धारणानन्तरम् उच्चकैरत्यर्थमुच्चलन्त ऊर्ध्वं प्लवन्त ऊर्मिसञ्चयास्तरङ्गपङ्क्तयो यस्य तादृशाद् जलैकदेशाज्जलस्यैकभागाद् अण्डजो हरिर्मत्स्यः उदमज्जद् उन्मग्नः उपरि प्रकाशित इत्यर्थः । कीदृशः । उदग्राभ्यामुन्नताभ्यां शृङ्गाञ्चलाभ्यां विषाणकोटिभ्यां चुम्बिताम्बरः स्पृष्टनक्षत्रमार्गः । प्रचण्डोऽतिक्रूरः कण्ठारवो यस्याः सा च, अत एव भैरवा भयङ्करा चाकृतिः शरीरसंस्थानं यस्य । तथा सन्नुत्थि(तं?त) इत्यर्थः ॥ ५६ ॥

तदुद्गमोद्रिक्ततरङ्गकम्पितां
तदीयशृङ्गे तरणीं निबध्य ते ।

तदा तदाक्रान्तदिगन्तगामिन-
श्चिरं विजह्रुः सलिले मुनीश्वराः ॥ ५७ ॥

तदिति । तदा तदवसरे मुनीश्वराः सप्तर्षयः सत्यव्रतश्च ते तदीय-(स्य?शृङ्गे) मत्स्यशृंगे तरणीं निबध्य नावं बद्ध्वा । कीदृशीम् । तदुद्गमेन तस्य मत्स्यस्योद्गमेनोन्मज्जनेन हेतुनोद्रिक्तैरतिप्रवृद्धैस्तरङ्गैः कम्पितां (चि ? चलि)-ताम् । इदमेव बन्धनकारणम् । सलिले जलप्रपञ्चे तदाक्रान्तान् तेन मत्स्ये-नाक्रान्तान् प्राप्तान् दिगन्तान् गन्तुं शीलमेषामिति तथा सन्तः, चिरं बहुकालं विजह्रुः क्रीडितवन्तः ॥ ५७ ॥

महाजवक्षुण्णमहीभृतोऽपि ते
समेत्य संवर्तसमीरणाः शनैः ।
विलोलतालव्यजनानिलोपमाः
सिषेविरेऽध्वश्रमलोपिनो मुनीन् ॥ ५८ ॥

महेति । महता जवेनातिवेगेन हेतुना क्षुण्णमहीभृतोऽपि चूर्णितपर्वता अपि ते तादृशः संवर्तसमीरणाः प्रलयमारुताः मुनीन् समेत्य विलोलस्य प्रचलि-तस्य तालव्यजनस्य तालवृन्तस्य येऽनिलास्तदुपमास्तत्सदृशाः सन्तः अत एवाध्वश्रमलोपिनो मार्गखेदमपनयन्तः शनैः मन्दं मन्दं सिषेविरे ॥ ५८ ॥

क्षयावसाने सति तापसानमू-
नमूढविज्ञानविशेषपावनान् ।
विसृज्य वैसारिणविग्रहो हरि-
स्ततो हयग्रीववधाय तत्वरे ॥ ५९ ॥

क्षयेति । क्षयावसाने प्रलयावधौ सति वैसारिणविग्रहो मत्स्यशरीरो हरिर्महाविष्णुः अमूढेनाप्रमादेन विज्ञानविशेषेण शास्त्रतत्त्वज्ञानातिशयेन पाव-नान् विशुद्धान् । अथवा (पापःपावय)न्ति सर्वजनमिति पावनान् । अमूनीदृशान् तापसान् सत्यव्रतादीन् मुनीन् विसृज्य प्रस्थाप्य ततस्तदनन्तरं हयग्रीव-वधाय हयग्रीवं हन्तुं तत्वरे त्वरते स्म समुद्युक्तोऽभूदित्यर्थः ॥ ५९ ॥

जवानिलाधूतजलेन वर्त्मना
रसातलं प्राप्य ररास भैरवम् ।

गवेषयंस्तत्र स वेदतस्करं
विलोकयामास च सोमकासुरम् ॥ ६० ॥

जवेति । स दिव्यमत्स्यः जवानिलेन वेगपवनेनाधूतजलेन कम्पितसलिलेन वर्त्मना मार्गेण रसातलं प्राप्य पातालं प्रविश्य भैरवं भयङ्करं यथा तथा ररास शब्दितवान् । उच्चैर्नादं कृतवान् । तत्र पाताले गवेषयन्नितस्ततोऽन्विच्छन् वेदतस्करं त्रयीचोरं सोमकासुरं हयग्रीवं विलोकयामास दृष्टवान् ॥ ६० ॥

अपूर्वयादः कुत एतदागतं
बलादिहैनद् बलिशेन विध्यत ।
अयत्नलब्धं परिहास्त मामिषं
(जुषध्वमित्थं?कथेत्थमुक्त्वा) स जिघाय किङ्करान् ॥६१॥

अपूर्वेति । सः सोमकासुरः किङ्करान् भृत्यानसुरान् इत्थमेवंप्रकारं(उक्त्वा) रुषा कोपेन हेतुना जिघाय प्रेरितवान् । 'हेरचङि' (७-३-५६) इति कुत्वम् । किंप्रकारमुक्त्वेति चेदुक्तिप्रकारमाह । एतदपूर्वयादः अदृष्टपूर्वो जलजन्तुः कुतः कस्मात्प्रदेशादागतमिह प्राप्तः । एनद्यादो बलात् प्रसह्य बलिशेन मत्स्यवेधनसाधनेन विध्यत प्रहरत । अयत्नेनाप्रयासेन लब्धमधिगतमेनद् आमिषं भोग्यवस्तु मा परिहास्त मा परित्यजत । 'ओहाक् त्यागे' इत्यस्माल्लुङि मध्यमपुरुषबहुवचने रूपम् । 'न माङ्योगे'(६-४-७४)(इत्यडभावः)॥

*हयग्रीवस्तावत् प्रकटकटुकोपान्धतमसो
गदावानुत्तस्थौ गतभयविवेकेन मनसा ।
असामान्यं वस्तु प्रसभमभिपश्यन् कथमयं
न चिन्तामाधत्त क्व पुनरथवासावविदुषाम् ॥ ६२ ॥

हयग्रीव इति । तावत्तदानीं प्रकटः प्रस्फुटः कटुकोपः क्रूरक्रोध एवान्धतमसं गाढान्धकारो यस्य । 'ध्वान्ते गाढेऽन्धतमसम्' इत्यमरः । स

---

*६१, ६२ अनयोर्मध्ये इदं पद्यं 'क'पाठे वर्तते—
उदायुधानुत्कटगर्वदुर्वहा-
नुपेयुषो दानववीरपूरुषान् ।
उदग्रशृङ्गाग्रनिकृत्तविग्रहा-
श्चकार मायामकरो महावपुः ॥

हयग्रीवो गदावान् गदासहितः । गतौ नष्टौ भयविवेकौ भीतिविचारौ यस्मा-त्ताहशेन मनसोपलक्षित उत्तस्थौ उत्थितवान् । युद्धार्थमिति शेषः । अयं हय-ग्रीवो असामान्यं सामान्येन दृश्यमानाद्विप्रतीपं वस्तु पदार्थमभिपश्यन्नाभिमुख्येन विलोकयन् प्रसभं तत्क्षणमेव कथं न चिन्तामाधत्त । अयं कः स्यादिति विचारं कस्मान्न कृतवान् । अथवा अविदुषां मूढानामसौ चिन्ता क्व कुत्र वर्तते । अज्ञानां क्वापि विवेको न भवतीत्यर्थः ॥ ६२ ॥

सरभसमभिपत्य दैत्यराजः
कठिनविषाणविघट्टनप्रसूतैः ।
शिखिभिरपतमीकृताहिधाम्ना
हरिमकरं गदया समाजघान ॥ ६३ ॥

सरभसमिति । दैत्यराजो हयग्रीवः सरभसं सक्रोधमभिपत्याभिमुख्येन प्राप्य गदया हरिमकरं दिव्यमत्स्यं समाजघान प्रहृतवान् । कीदृश्या गदया । कठिने कर्कशे विषाणे हरिमकरस्य शृङ्गे यद् विघट्टनं समास्फालनं ततः प्रसूतैः प्रवृत्तैः, व्याप्तैरित्यर्थः । शिखिभिरग्निकणैरपतमीकृतं निरन्धकारीकृतमहिधाम पातालं यया तादृश्या ॥ ६३ ॥

मुरारिमकरो मुहुस्त्रुटनदुःस्थितास्थिच्छटा-
मृणालशकलाकुले रुधिरवारिभिः पूरिते ।
उरःसरसि वैरिणः स्फुटनिकृत्तचित्ताम्बुजे
निजं भृशममज्जयद् घनरुषा विषाणाञ्चलम् ॥६४॥

मुरारीति । मुरारिमकरो दिव्यमत्स्यो घनरुषातिक्रोधेन वैरिणो हयग्रीवस्योरःसरसि तटाके निजमात्मीयं विषाणाञ्चलं शृङ्गाग्रं भृशमत्यर्थममज्जयत् मज्जितवान् । कीदृशे । मुहुः पुनः पुनः यत्त्रुटनं खण्डनं ततो हेतोर्दुःस्थिता व्याकुलीभूता अस्थ्नां छटाः समूहा एव मृणालशकलानि बिसशकलानि तैराकुले सहिते । रुधिरैः शोणितैरेव वारिभिः पूरिते । स्फुटं स्पष्टं निकृत्तं खण्डितं चित्तमेवाम्बुजं यस्मिंस्तथाभूत उरस्तटाके । शृङ्गाग्रं प्रवेशितवानिति शृङ्गाग्रप्रवेशनेनैवं कृतवानित्यर्थः ॥ ६४ ॥

मत्स्यावतारकार्यमुपसंहरन्नाह—

दैत्यं ध्वान्तमिव प्रमथ्य मुषितां तेन त्रयीं वेधसो
वक्त्रैर्योजयति स्म यो दिनमुखे पद्मैरिवार्कः श्रियम् ।
स्वस्थानस्थितवासवादिविबुधश्रेणीसमाराधितो
मायामत्स्यवपुर्विवर्धयतु वः श्रेयांसि सोऽयं हरिः ॥ ६५ ॥

दैत्यमिति । यो हरिरर्कः सूर्यो ध्वान्तमन्धकारमिव दैत्यं हयग्रीवं प्रमथ्य निहत्य तेन मुषितां चोरितां त्रयीं वेदान् वेधसो ब्रह्मणो वक्त्रैर्मुखैर्योजयति स्म योजितवान् । दिनमुखे प्रभाते श्रियं प्रभां पद्मैः पङ्कजैरिवार्कः । अत्रापि तेनान्धकारेण मुषितां तिरस्कृतां श्रियमिति व्याख्येयम् । स्वस्थाने स्वर्गे स्थितया शत्रुविनाशाद्यथापुरमात्मस्थाने प्रतिष्ठां प्राप्तया वासवाद्या इन्द्रप्रमुखया विबुधश्रेण्या देवसमूहेन समाराधितः सम्यक् पूजितः । सोऽयं मायामत्स्यवपुः दिव्यमत्स्यरूपो हरिर्मायाविष्णुर्वो युष्माकं श्रेयांसि पुण्यानि विवर्धयतु पुष्णातु ॥ ६५ ॥

इति विष्णुविलासव्याख्यायां
विष्णुप्रियाख्यायां
प्रथमः सर्गः ।

द्वितीयः सर्गः ।

काले तस्मिन्नप्सरःसंप्रदत्ता-
माबिभ्राणो हेमकल्हारमालाम् ।
स्वर्गोद्देशे सञ्चरिष्णुर्मुनीन्द्रः
श्रीदुर्वासा वासवं प्रेक्षते स्म ॥ १ ॥

काल इति । तस्मिन् काले पूर्वसर्गप्रस्तुतहयग्रीववधादनन्तरकाले श्रीदुर्वासा मुनीन्द्रः स्वर्गोद्देशे स्वर्गप्रदेशे सञ्चरिष्णुः सञ्चारशीलः । 'अलंकृञ्-निराकृञ्' (२-३-१३६) इत्यादिना इष्णुच् । अनेनास्य सर्वत्र स्वच्छन्द-सञ्चारशीलत्वमुक्तम् । तथा सन् वासवमिन्द्रं प्रेक्षते स्म दृष्टवान् । कीदृशः । अप्सरःसंप्रदत्तां देवस्त्रिया सम्यक्प्रतिपादितां हेमकल्हारमालां कनकसौगन्धिकमालाम् । "सौगन्धिकं तु कल्हारम्" इत्यमरः । आबिभ्राण आभरणत्वेन धारयन् । मुनेः स्वस्य पुष्पमालाधरणमयुक्तमिति तदुचितपात्रे प्रतिपादनाभिलाषेण सञ्चार इति द्योतितम् ॥ १ ॥

एषा काचित् पुष्पमाला ममैनां
योषा काचिद्दत्तवत्यत्युदाराम् ।
तुभ्यं जिष्णो सम्प्रयच्छामि गच्छा-
मीत्थं दत्त्वा प्रस्थितस्तापसेन्द्रः ॥ २ ॥

एषेति । तापसेन्द्रो दुर्वासा हे जिष्णो देवेन्द्र एषा काचिदतिरमणीयत्वादीदृशीति वक्तुमशक्येति भावः, पुष्पमयी माला । दृश्यतामिति शेषः । अत्युदारामत्युत्कृष्टामेनां पुष्पमालां काचिद्योषा काचन स्वर्गस्त्रीः मम दत्तवती अर्पितवती । ममेति, न मह्यमिति । अतो ज्ञायते मदीयस्वत्वं न सञ्जातमस्या इति । तेन ममैतद्विषयं सम्प्रदानत्वं नास्तीति भावः । तुभ्यं सम्प्रयच्छामि प्रतिपादयामि । एनामित्यत्रापि योज्यम् । अत्र तु स्वत्वनिवृत्त्या परस्व(त्वा)पादनमुचितमिति कृत्वा तुभ्यमित्युक्तम् । अहं तु गच्छामि । तपस्विनामेकत्रैवाधिवासोऽनुचित इति भावः । इत्थमेवंप्रकारम् । उक्त्वेति शेषः । दत्त्वा प्रतिपाद्य । एनामित्यत्रापि । प्रस्थितः गतोऽभूत् ॥ २ ॥

इन्द्रो यावन्मस्तके हस्तिनस्तां
न्यस्तां कुर्वन् कुन्तलानाबध- ।

हस्ती तावद् भृङ्गपातासहिष्णु-
व्याकृष्य द्राङ्मर्दयामास मालाम् ॥ ३ ॥

इन्द्र इति । (इन्द्रो) यावद् यस्मिन् काले तां मालां हस्तिनः ऐरावतस्य मस्तके शिरसि न्यस्तां निक्षिप्तां कृत्वा कुन्तलान् शिरोरुहानाबबन्ध संयमितवान् तावत् तस्मिन् काले हस्ती भृङ्गपातं मालापरिमलाकृष्टानां भ्रमराणां पतनोत्पतनमसहिष्णुरसहनशीलः सन् मालामाकृष्य शुण्डाग्रेण समाहृत्य द्राक् क्षिप्रं मर्दयामास द्रुमादिषु निक्षिप्य सञ्चूर्णयामास ॥ ३ ॥

दृष्ट्वा चैनां नागराजेन पिष्टां
रुष्टः शक्रं तापसेन्द्रः शशाप ।
आपित्सन्त्या आपदो दैवयोगा-
दल्पो हेतुः पुष्कलत्वं प्रयाति ॥ ४ ॥

दृष्ट्वेति । तापसेन्द्रश्च श्रीदुर्वासा नागराजेन ऐरावतेन पिष्टां मर्दितामेनां मालां दृष्ट्वा । गच्छन्नपि व्यावृत्यावलोक्य मालयासौ किं करोतीति ज्ञातुं पश्चान्निरीक्ष्येत्यर्थः । रुष्टः क्रुद्धः शक्रं शशाप शप्तवान् । उक्तमर्थं सामान्येन समर्थयति । दैवयोगाददृष्टवशाद् आपित्सन्त्या आपतितुमाशङ्किताया: । 'आशङ्कायां सन् वक्तव्यः' इति सन् । आपदोऽनर्थस्याल्पो हेतुः स्वल्पमपि कारणं पुष्कलत्वं बृहत्त्वं प्रयातीति युज्यत एवायमर्थ इत्यर्थः ॥ ४ ॥

शापप्रकारमाह —

एवंप्राया दुर्लभा नेह माला-
स्तुच्छं यच्छत्येष ही तापसो नः ।
इत्थं मत्वा मत्तहस्तीन्द्रहस्ते
दत्त्वा वज्रिन् नूनमेनामहासीः ॥ ५ ॥

एवमिति । हे वज्रिन्, विशिष्टायुधसद्भावादतिदर्पशालिन्निति सम्बोधनार्थः । इह मत्प्रदेशे एवंप्राया एवंविधा माला न दुर्लभाः । दिव्यतरुबाहुल्यात् सुलभा एवेत्यर्थः । तापसस्तपस्वी एष नः अस्माकं तुच्छमत्यल्पं यच्छति ददाति । ही हास्यमिदम् । इत्थं एवंप्रकारं मत्वा त्वं मत्तस्य मदशालिनो हस्तीन्द्रस्यैरावतस्य हस्ते दत्त्वा एनां मालामहासीः त्यक्तवानसि । नूनं निश्चितमिदम् ॥ ५ ॥

श्लाघा स्वस्मिन्नन्यवर्गेष्ववज्ञा
तुल्येऽसूया वन्दनीयेषु निन्दा ।
द्वेषः साधौ दुर्जने पक्षपात-
श्चैते दोषा नोज्झत्यर्थवन्तम् ॥ ६ ॥

श्लाघेति । स्वस्मिन्नात्मनि श्लाघा स्तुतिः । अन्यवर्गेषु स्वव्यतिरिक्तेष्ववज्ञा निन्दा । तुल्ये आत्मसदृशे जने असूया असहिष्णुत्वं; दोषारोपः । वन्दनीयेषु पूज्येषु निन्दा तिरस्कारः । साधौ सज्जने द्वेषो वैरम् । दुर्जने खलजने पक्षपातः स्नेहश्च । एते दोषा अर्थवन्तं धनवन्तं जनं नोज्झति न त्यजन्ति । तेन सहैव सर्वदा वर्तन्त इत्यर्थः ॥ ६ ॥

धिक् तं मूढं चित्तसन्तोषवन्ध्ये
क्षिप्यत्यर्थं पुंसि यः क्लेशलब्धम् ।
क्षाराम्भोधौ वर्षतो वारिवाहा-
दन्यो मन्ये तस्य न स्यात् सगन्धः ॥ ७ ॥

धिगिति । यः पुरुषः क्लेशेन प्रयत्नेन प्राप्तमर्थं द्रव्यं चित्तसन्तोषः चित्ते सन्तोषगुणः

'अल्पलाभेऽपि या प्रीतिः सन्तोषः स उदाहृतः ।'

इति सन्तोषलक्षणम् । तेन वन्ध्ये शून्ये पुंसि,

'सर्वतस्तु समादित्सा लोभ इत्यभिधीयते ।'

इत्युक्तलक्षणलोभाक्रान्ते पुरुष इत्यर्थः । क्षिप्यति त्यजति । तं तादृशं मूढमज्ञं रुषा धिक्करोमि । न्यक्कारविषयः स पुमानित्यर्थः । तस्य पुरुषस्य क्षाराम्भोधौ लवणसमुद्रे वर्षतः वृष्टिं क्षिपतो वारिवाहान्मेघादन्यो व्यतिरिक्तः सगन्धः समानचारी । सदृश इति यावत् । न भवेदित्यहं मन्य इति सम्बन्धः । क्षारजले पतितं शुद्धजलमपि क्षारत्वमेवापद्यते । तत्र वृथा त्याग एव शुद्धजलस्येत्यभिप्रायः ॥ ७ ॥

शापप्रकारानाह —

स्वर्गभ्रष्टो नष्टसर्वार्थसार्थो
जीर्णस्वाङ्गो धिक्कृतः क्लिश्यः ।
सार्धं देवैर्मर्त्य स्यस्त्वमाधि
कोपादेवं शक्रमूचे महर्षिः ॥ ८ ॥

स्वर्गेति । हे महेन्द्र ! त्वं स्वर्गात् स्वस्थानात् भ्रष्टः च्युतः, नष्ट-स्तिरोहितः सर्वार्थानां कल्पवृक्षकामधेनूच्चैःश्रवऐरावतादिसकलपदार्थानां सार्थः समूहो यस्य तथा सन्, जीर्णानि जरायुक्तानि स्वाङ्गानि स्वावयवा यस्य तथा च सन्, शुक्रशिष्यैरसुरैर्धिक्कृतो न्यक्कृतः देवैः सार्धं मर्त्यतुल्यो मानुष-सदृश एधि भव । मृतिजननजरावैरूप्यादिमर्त्यधर्मयुक्तो भवेत्यर्थः । एवमुक्त-प्रकारं महर्षिः दुर्वासाः क्रोधाद्धेतोः शक्रमूचे इन्द्रं प्रति शापवचनमुक्तवान् ॥ ८ ॥

संभ्रान्तोऽथ प्राप्य जम्भारिरस्य
प्रीयस्वेति प्राणमत् पादमूले ।
प्रीतस्तावद्वीतकोपः स चाभू-
दह्नि क्षान्ते सूर्यकान्तः सुशीतः ॥ ९ ॥

संभ्रान्त इति । अथ शापानन्तरं जम्भारिरिन्द्रः सम्भ्रान्तो व्याकुलः सन् प्रीयस्व हे मुने ! प्रीतो भवेति वदन् प्राप्य समीपं गत्वास्य दुर्वाससः पादमूले चरणसमीपे प्राणमत् प्रणतवान् । स च श्रीदुर्वासाश्च तावत्तदानीं वीतकोपः शान्तक्रोधः प्रीतः सन्तुष्ट आसीत् । क्रोधशमनानन्तरमेव प्रीतत्वे दृष्टान्तमाह । अह्नि क्षान्ते दिवसे परिणते सति सूर्यकान्तः सुतरां शीतः सुखस्पर्शः स्वभावस्थितो भवति । सूर्यप्रतापे शान्ते स्वस्याग्न्युद्गिरणमपि प्रशाम्यति । तद्वत् क्रोधशान्तौ स्वभावसन्तोष एवास्याविरभूदित्यर्थः ॥ ९ ॥

युष्माकं भोः साधुपीयूषपाना-
न्निश्रीकत्वं सर्वमेतद् व्यपेयात् ।
इत्थं दत्त्वा शापमोक्षं सुरेभ्य-
स्तत्रैवायं तापसेन्द्रस्तिरोऽभूत् ॥ १० ॥

युष्माकम् इति । भो महेन्द्र ! साधु सम्यक् पीयूषपानादमृतपानात्-तो-र्युष्माकं भवतां निश्रीकत्वं स्वर्गश्रिया रहितत्वं सर्वं निश्शेषमेव व्यपेयाद् व्यपगतं भविष्यति । सश्रीका एव भवन्तो भविष्यन्तीत्यर्थः । इत्थमेवंप्रकारं सुरेभ्य इन्द्रादिभ्यः शापमोक्षं शापप्रतीकारं दत्त्वायं तापसेन्द्रः श्रीदुर्वासास्तत्रैव तस्मिन् प्रदेश एव तिरोऽभूदन्तर्हितः ॥ १० ॥

वीतश्रीका विप्रहीणप्रभावा
देवाः सर्वे सत्रपा वृत्रहाद्याः ।
सार्धं गत्वा शम्भुना ब्रह्मणा च
क्षीराम्भोधौ तुष्टुवुः पद्मनाभम् ॥ ११ ॥

वीतेति । वीतश्रीका विगतैश्वर्या विप्रहीणप्रभावाः विरहिता(नि ? णिम)महिमादिप्रभावाः । प्रभावं दिव्यत्वं तद्रहिता इत्यर्थः । अत एव सत्रपा लज्जासहिता वृत्रहाद्या इन्द्रप्रधानाः सर्वे देवाः शम्भुना परमेश्वरेण ब्रह्मणा विरिञ्चेन च सार्धं गत्वा क्षीराम्भोधौ दुग्धसिन्धौ, स्थिता इति शेषः । पद्मनाभं महाविष्णुं तुष्टुवुः स्तोत्राक्षरैः स्तु(त)वन्तः ॥ ११ ॥

स्तुतिप्रकारमाह —

विश्वेषां यो विष्टपानाममीषां
कर्ता भर्ता किं च हर्तासि भूमन् ।
त्रैगुण्येन त्रीणि रूपाणि भर्त्रे
तादृग्भूतस्फीतधाम्ने नमस्ते ॥ १२ ॥

विश्वेषामिति । हे भूमन् प्रथिम्ना विश्वव्याप्त ! यस्त्वं दृश्यमानानां विश्वेषां सर्वेषां विष्टपानां भुवनानां कर्तासि सृष्टिकारणमसि । किं च अपि च भर्तासि पालयितासि । हर्तासि संहारकृदसि । त्रयाणां गुणानां समाहारस्त्रैगुण्यं; रजःसत्त्वतमांसि गुणाः । तेन कारणेन त्रीणि रूपाणि ब्रह्मविष्णुपरमेश्वरव्यपदेशानि भर्त्रे भरणशीलाय । ताच्छील्यार्थे तृन् । 'न लोक' (२-३-६९) इति षष्ठीप्रतिषेधः । तादृग्भूतं तथाभूतं स्फीतं प्रभूतं धाम तेजो यस्य । तस्मै ते तुभ्यं नमः प्रह्वत्वमस्तु ॥ १२ ॥

वीक्षामात्रे यस्य विश्वप्रमाणां
कल्पापायं यावदुत्पादयित्री ।
माया भूरि व्यातनोतीन्द्रजालं
तस्मै सम्यक् संविदात्मन् नमस्ते ॥ १३ ॥

वीक्षेति । हे संविदात्मन् ! संविद् ज्ञानं तदेवात्मा स्वरूपं यस्य । ज्ञानरूप निष्कलब्रह्मेत्यर्थः । हे निष्कलब्रह्मन् ते तुभ्यं सम्यग् नमः । श्रद्धानुगतत्वात् सम्यक् समीचीनं प्रह्वत्वं करोमीत्यर्थः । कीदृशाय तस्मै । तथाभूताय । किं तथाभूतत्वम् । अत्र यस्य ब्रह्मणो वीक्षामात्रे अनभिप्रायेऽवलोकन-

तत्र च विलसच्छ्रीवृक्षावलिमध्योल्लसितं, पारावारमिव पर्वतजातासङ्गकुतूहलं, पारायणमिव कृतसाधुजनावनं विरचितमनसिजविजयं च, भद्रसेनमिवारूढवृषभं भगवन्तं महादेवं सम्प्रणम्य स नितान्तमाससाद पुनर्हरिद्वारम् ॥

अथ यत्र देवतटिनीतटास्थितं
　नगरात्रसत्रमभवत् परीक्षितः ।
अयमेव केवलमयाच्छुकाश्रमं
　न गुरुः शुकश्च समगात्तमाश्रमम् ॥ ५० ॥

धर्मात्मजस्य पुरदर्शनात्पठन्
　हर्षी तदीयचरितान्यनन्तरम् ।
रम्यं पुरं न समगाद् गुरुः परं
　रौक्माङ्गदं गुरुकरोऽप्यगात्तदा ॥ ५१ ॥

आलोक्य तत् सद्गुणसागरो गुरुः
　पाञ्चालिकाजन्मभुवं समागमत् ।
काम्पिल्यनाम्नीं नगरीं निशम्य तां
　मध्येपथं प्राप ततः स गण्डकीम् ॥ ५२ ॥

तदनन्तरं गण्डकीमण्डने सालग्रामकुण्डे निमज्ज्य मुहुर्मुहुरार्षभभरतवत् त्रिषवणस्नानार्द्रकपिञ्जजटाकलापः तत्रत्यभगवत्प्रतिमाः परिचर्याभिः अपरिमिताभिराराध्य समगायत भारतं चरितं यातश्च ततो हयग्रीवावतारस्थलम् ॥

संसेव्य देवं स तुरङ्गमास्यं
　भक्त्यान्तरङ्गे च तमाकलय्य ।
उदारसाहित्यकलाचकास-
　त्तरङ्गिणीकामुकतामयासीत् ॥ ५३ ॥

तदनु स गुरुरवगाह्य तटिनीं करतोयां तीर्त्वा बहुवनसिन्धुर्दयासिन्धुरुद्वीक्ष्य चोटजमुद्दालकस्य कतिपयदिवसैरासाद्य मैथिलं देशं

2607

तत्र च साश्चर्यं रामभद्रविनिर्भिन्नभवानीवल्लभभल्लासनखण्डावभिवीक्षमाणो निदानमपि तस्य संस्मरन् आनन्दरससान्द्रीकृतमानसः समाससाद मन्दिरं रघुनन्दनस्य ।

सीतारामगुरूत्तमस्तदनु तं संसेव्य सीतापतिं
यातो नैमिशकाननं मुनिगणैः सम्पूर्णमत्यद्भुतम् ।
तत्रत्यावनिनिर्जरानतपदः सत्रा स तत्रानुगैः
श्रीमत्सप्तदिनाध्वरं समकरोत्सीतेशभक्ताग्रणीः ॥ ५४ ॥

तदनु देशिकोऽयं राशिपङ्क्तिमिव मीनोपेतामूर्जस्वतीमिव कविकान्तां सुग्रीवसेनामिव कुमुदोद्भासमानामवगाह्य सरयूसरितं भुवनत्रयभासमानावदातयशोराशिभरताराधितसम्प्राप्तलोकत्रयाधिपत्यसीतापतिमणिपादुकाधिष्ठितमभितोऽवलोक्य नन्दिग्रामं सुरनगरीमिव रम्भाभिरामां कमलिनीमिव सराजहंसामयोध्यां नाम पुरीमासाद्य समाराधितः सज्जनैर्निशाम्य समन्ततस्तां ससन्तोषं समासेव्य भगवन्तं रामभद्रं विचित्रतरं तच्चरित्रमपाठीदेवम् ।

एनां पुरीमधिवसन्नवनीं समस्तां
राजा पुरा दशरथोऽतिरथः शशास ।
कामं स तन्त्रतटिनीपतिपारदृश्वा
कारुण्यभूः सुरवरेशनिषेविताङ्घ्रिः ॥ ५५ ॥

तस्य च पुत्राभिलाषिणः समतिक्रान्ते च शरदां षष्टिसहस्रे मृगीसम्भवः स मुनिपुङ्गवस्तुरङ्गमेधमङ्गजकामेष्टिमपि निर्वर्तयामास कृपया ॥

तदानीं तु वितानसम्भवेन तप्तकाञ्चनसप्रभेण प्राजापत्येदेवोत्तमेन दत्तं कृपया परिगृह्य पायसं दिव्यं सरभसमादरेण रमणीभ्यः समदात् सैष दशरथः सतोषम् ॥

पायसामृतरसस्य तदानीं
प्राशनाद्दशरथप्रणयिन्यः ।
कोसलाधिपराजसुताद्या-
स्ता बभूवुरथ दौहृदवत्यः ॥ ५६ ॥

काले ततः प्रसुषुवे रघुनाथमेनं
सा कोसलेन्द्रतनया द्युमणौ प्रयाते ।
मेषाख्यराशिममरेशगुरौ सचन्द्रे
लग्ने शुभे कटकना[illegible] तिथौ नवम्याम् ॥ ५७ ॥

पुष्ये जजान भरतो महतां महिष्ठो
रामानुजोऽजनि ततो भरतानुवर्ती ।
शत्रुघ्न एष च दिशादशराजमान
कीर्तिप्रभावमहिता अभवन् ततस्ते ॥ ५८ ॥

अथ कदाचित् तपःपावकच्छटाभिरिव जटाभिरभिमण्डितः, कविमिव भरताग्रजं, शशिनमिव लक्ष्मणानुगतं, विधिकलत्रमिव विबुधाभिवन्दितं, इन्द्रात्मजमिव जयन्तं, सुभद्राकान्तमिव गाङ्गेयाभरणशालिनं भगवन्तं रामभद्रं निखिलनिशाचरनिर्यापणधुरन्धरं मन्यमानोऽयं विश्वामित्रो निजमखविनाशकक्लेशकारीन् विजेतुमाहूय व्रजन् सलक्ष्मणं रामं ताटकाविजयाय चोदयामास ॥

तदनु कृतान्तपुरि गन्तॄणामाशरपतीनामग्रेमार्गपरिशोधनायेव निशाचरनिखिलप्राणपवनपारणस्य प्राणाहुतिमिव कृत्वा तत्प्राणमारुतान् तां यापयामास कृतान्तपुरीरथ्यां मुनिवरादभ्यस्तसकलास्त्रस्य भगवतो रामचन्द्रस्य शरजालसङ्घः ॥

ततो निर्वर्तितमुन्यध्वरः स्वपादपङ्कजरजसा नारीकृतशिलातलः स हि दाशरथिरधिगत्य जनकराजपुरं विरचितपश्वाननचापभङ्गः कृतभूपमदभङ्गः सीतामुवाह सत्यवानिव सावित्रीम् ॥

तदैव तदनुजा भरतलक्ष्मणशत्रुघ्ना अपि माण्डव्यूर्मिला श्रुतकीर्तीरुदूहुः ॥

ततः कनकपीठोपरि राजमानः सीतासहितः स हि दाशरथिरचञ्चलचञ्चलो मेरुसमारूढो जलद इव रेजे ॥

तदनु कतिपयदिवसेषु यातेषु—

सीतासमेतो विनतासुतध्वजो
नाथो रघूणां लसमानकौस्तुभः ।
तत्रानुजैर्मानववंशमौक्तिकं
स्वीयं पुरं गन्तुमियेष मैथिलात् ॥ ५९ ॥

प्रस्थाय ततो जनकराजपुरतस्तदनुज्ञातः —

मध्येपथं रघुपतिः स हि जामदग्न्यं
पृथ्वीशपाटनपटिष्ठपरश्वधं तम् ।
जित्वा प्रगृह्य वरकार्मुकमस्य धीरः
स्वीयं पुरं समगमत्सह बन्धुवर्गैः ॥ ६० ॥

तदनु सदारः स हि दाशरथिः सहितश्च तादृशैः रोदोल्लङ्घि-कर्मभिः मातङ्गशताङ्गतुरङ्गमपादातव्रातसमुद्भासितां वलरिपुनीलोपल-प्रमुखमणिसौधावलिसमुल्लसितां नानाविधवाद्यवादकगायकैर्मारुतक-म्पितकैतवादपहसद्भिरिव सुपर्वनगरश्रियं 'एकः स्वादु न भुञ्जीत' इति वाक्यार्थनिष्ठैरिवाभिगतवैवाहिकभावुकभासुररामभद्रसन्दर्शनार्थ-माकारयद्भिरिव च नाकाधिपान् कार्तस्वरकेतुदण्डसमुद्भासितैः पता-किकासङ्घातैरुद्वाहवेषसमुद्भासमानः सुसन्दर्शनसमुत्सुकाभिर्भामिनीभि-रप्याराधयन्तीभिरारात्रिकाभिः प्रतिभवनमुल्लसन्तीं विविधविचित्रतर-तोरणरमणीयां प्रादक्षिण्येन पुरीमयोध्यां प्रतिपदमाराध्यमानो मेदि-नीनायकैस्तोष्ट्यमानश्च पुराणवाणीपारायणनिपुणैर्धरणीगीर्वाणगणै रमणीयतमं सदनं निजमाससाद ॥

चामीकरस्फाटिकभित्तिसंयुतं
यद्विद्रुमस्तम्भसहस्रशोभितम् ।
लेखेशनीलाश्मकृताधिरोहणी-
राजत्खगेशोपलकुट्टिमोल्लसत् ॥ ६१ ॥

मुक्तामयैः पल्लवितैश्च तोरणै-
श्चित्रैर्विचित्रैर्मणिसौधपङ्क्तिभिः ।
अम्भोजराजत्सरसीसमुज्ज्वलै-
रुद्भासितं केलिवनैर्मनोहरैः ॥ ६२ ॥

माणिक्यदीपैर्वरकाञ्चनासनै-
र्दान्तैश्च मञ्चैर्वररत्नचित्रितैः ।
संराजितं यत्र सुपर्वपुङ्गवाः
संरेजिरे सौधनिवासिनो जनाः ॥ ६३ ॥

तस्मिन् (ग्र? गृ)हे भूसुतया समेतः
सिंहासनस्थो रघुवीर नृपः ।
रेजेऽनुजैः सादरमीक्ष्यमान-
स्तपोधनाराधनजागरूकः ॥ ६४ ॥

अथ कदाचित्सोऽयं सीतापतिः, सदारान् सुतान् सादरमवलोकमानमनुरञ्जितजगत्त्रितयं निखिलभुवननायकमात्मानं निजभुवनमात्राधिपत्येऽभिषिषिक्षुं बृन्दारकसुन्दरीनन्दनीयसौन्दर्यकेकयनरेन्द्रनन्दनावरद्वयदामबद्धं दशरथमवलोक्य दयया मुमोचयिषुः सादरं धृतचीरवासाः सन्मित्रमयं ससौमित्रिः सकान्तः कान्ताररराज्यं कतिपयकालमुररीकृत्य प्रस्थाय ततः साकेताद् अधिगत्य शृङ्गिवेरपुरं सदाशिव इव गुहोपचारितः तीर्त्वा च भागीरथीं, गत्वा च भरद्वाजाश्रमं, नत्वा च तं मुनिवरं कृतातिथ्यं यात्रा च विचित्रकटकं चित्रकूटं भगवता प्राचेतसमुनिना प्रतिदिनमाराधितः सादरं सदारसोदरः परिज्ञातस्वप्रयाणमवाप्तसन्तापमात्मनोऽटवीगमननिवर्तनाय समागतं सानुनयं कृतनैकावनतिं ससामाजिकजनजातं सानुजातं सम्पृष्टस्वागतं परिपूर्ण-(?)चावलोकरवलोकितं तत्रत्यमुदन्तं निवेदयन्तं दृष्ट्वा तमनुजातं भरतं समाधाय विविधैरुपायैः साधयित्वा चात्मनो वनगमनं दत्त्वा च पादुकोभयं कृत्वा च प्रतिज्ञां जवादायास्यामीति यापयित्वा च कृच्छ्रतस्तं

स्थित्वा च तत्र कतिचिद्दिनानि प्रस्थाय ततश्चित्रकूटात् समगमदत्रमम-त्र्याश्रमम् ॥

रघुपतिः प्रियया सह सोऽगम-
स्तदनु सादरसोदरसंयुतः ।
दवममन्दसुपादपवारिता-
तपमतीव भयावहमद्भुतम् ॥ ६५ ॥

सकलतापसमन्दिरसञ्चयै-
र्बहुतरं रमणीयममानुषम् ।
विलसितं सततं द्विजयुग्मकै-
र्हरिमुखैश्च मृगैरतिभीषणैः ॥ ६६ ॥

फलभरानमिताः पृथिवीरुहो
रघुपतेरिव सन्नतिसोद्यमाः ।
अभिविरेजुरिमे रणितद्विजा-
घनितपाटलकोमलकुड्मलाः ॥ ६७ ॥

तदनन्तरं वन्दारुजनमन्दारो मेदिनीनन्दनानन्दनो नरदेवनन्दनः संहृत्य सापराधं विराधं, कृतपञ्चशरशरभङ्गं शरभङ्गं सुतीक्ष्णधिषणं सुतीक्ष्णं संयमीन्द्रसभाभासमानं भगवन्तमभीकं लोपामुद्राभीकं नमस्कृत्य च तत्सम्प्रार्थनतः प्रतिज्ञातनिशाटवधः द्विपश्चाननबान्धवान् क्रौञ्चगणान् विरचयितुं सहितानहितान् पञ्चतया सुरतायाः पञ्चवटीकृतनिकेतनः लक्ष्मणेन विग्रीकारयन्नुग्रां रक्षोध्यक्षानुजां, समाह(तु ? त)मिव तदग्रजन्मानं पापजन्मानं पौलस्त्यजन्मानं त्रिशिरसमप्याशिरसं विरचय्य, कृत्वा च खरतरं खरं खरशरविनिर्भिन्नं, रचयन् दूषणादीन् कृतान्तपट्टणाध्वनीनान्, मृगयाविहरन्महीनायक इव संहृतसुवर्णहरिणः, वणिगिव सीतावियोगकर्शितमनाः, संहृतकबन्धोऽपि सम्प्राप्तवीरयशाः शनैः शनैरासससाद शबर्याश्रमम् ।

तदनु समनुगृह्य शबरीं चिरसञ्चितबदरीप्रमुखफलादनतो दत्वा च तस्यै निजपदं मेदिनीनन्दनाविरहजातज्वरोऽनुयाय्यनुजो जगतीपतिर्यातुमियेष (सतां ?) सतांपतिः पम्पाम् ।

करोति प्रातिलोम्येन स्वनाम्ना पापमेव या।
पम्पां स रामस्तां रामातापतप्तः समागमत् ॥ ६८॥

तदानीं खल्वाहवलालसरसापरिपालक इव समनुगृहीताशुगभूः, देवकीतनयशताङ्ग इव सम्प्राप्तसुग्रीवानुबन्धः, रविरिव सङ्कुचिततारेशप्रकाशः, महाबलिरिव दिग्गादशनिर्यापितहरिसैन्यः, भगीरथेनेव सञ्चीर्णसागरेण समाश्वासतया सीतामूर्मिकासमर्पणाद्रामस्य, विषमपथेनेव क्षपिताक्षरथेन प्रहस्तादीन् कृतवता विहस्तादीन् विरुतमात्रवित्रासितरात्रिञ्चरराजेन लङ्कापुरपतिनिर्बन्धेन चिरोपोषितानिजतातसखस्य निनीषुणेव पारणामधुरानुभूतां सवर्ष्म समारुरुक्षुणेव दिवं दीक्षितेन लङ्कापुरकमनीयकङ्कचयनानिजसमर्पितनानापशुवपासमास्वादनतः प्रजातजातवेदःपरितोषणप्रवीणेन समुपक्रान्तक्रत्वन्तरपरित्यक्तपिशिताशंपशुवपाश्रपणसमापतितसुकृतेतरपरिहृतय इव वारंवारं रामरामेति संमीरयता निजदासवरेण समीरसुतेन निवेदितसकलसीताकुशलोदन्तस्तदानीतावदातानिजवानितोत्तंससन्दर्शनसमुद्भूतमोदस्तदैव पत्रीकृतमातरिश्वतनयः, वासुदेव इव ससुग्रीवाङ्गदः, अभिनवप्रासाद इव प्रोल्लसद्गवाक्षः, हिमानीधरगुहान्त इव हर्यक्षरक्षितपुरःप्रदेशः, निशानाथ इव लक्ष्मणानुगतकान्तवपुः कुमुदामोदकरश्च, धर्मात्मज इव सदा ससमीरणात्मजः आश्रितजनसन्तापदावपावकप्रशमनपाथःप्रदः दशशताङ्गदायादो निजपूर्ववंश्यनिर्मिताभिज्ञानमुद्राभिवावर्तपङ्क्तिं समादधतः समुपाविशदम्भोनिधेस्तीरे सहसोत्तरे॥

तदनन्तरं तिरस्कृताशेषभगवत्प्रियनिकेतमग्रतास्तिरस्कृत्य तमग्रतोजातमनन्यशरणं शरणीकृतनिजचरणं सज्जनावलितोषणं रमणीयगुणभूषणं रिपुजनभीषणं विभीषणं विधाय च लङ्कापुराचलाधिराजं स्वकटाक्षमात्रसंशिक्षितक्षितिभृदुद्भवाभ्यक्षस्तद्रोषविषयीकृतशरणागतवरुणालयनिर्दिश्यमानद्रुमकुल्यदेशीयः विभीषणनिर्वर्ण्यमानलङ्कापुरपन्थाः क्रमेण सेतुं विधाय नलेन मार्गेण इव दक्षिणाशाभिमुखः दशमुखप्रमुखलेखारीन् पत्तनं निनीषुर्वैकर्तनस्य वैकर्तनकुलजलधिकलानिधिराससाद लङ्कामलङ्कारवतीम्॥

तदनु सानुजो जानकीजानिः कुर्वन् सुरान्तकनरान्तकावन्तकान्तिकौ, विध्वंसयन् कुम्भनिकुम्भौ, विरचयन् दुर्मुखं विमुखमतिकायमपि विकाययन्, अकम्पनं च कम्पयन्, विरूपयन्विरूपाक्षयूपाक्षौ हत्वा च कुम्भकर्णादीन् जित्वा च मेघवाहजितं मेघनादं दशकण्ठकण्ठोद्दलनाय समाहितो बभूव ॥

तदानीं खलु—

अमर्त्यराजस्तरसा स्वदूतं
समादिशद्दाशरथेः समीपम् ।
शताङ्गमेतच्छतवाजिनद्धं
नयेति युद्धे पदचारिणोऽस्य ॥ ६९ ॥

तदनु सविनयं निवेदितमेतच्छताङ्गं तुङ्गतरतुरङ्गममानीय मातलिना समधिरुह्य धराधरवरधीरो धराभूधवः स्वकलत्रापहर्त्रा रात्रिञ्चरनेत्रा समायोध्य समं द्वन्द्वेन वैनतेयेन वातन्धयं, सौरेण तामिस्रं, पाशुपतेन दैतेयं, पार्जन्येन जातवेदसं, वैष्णवेन माहेश्वरं चास्त्रमस्त्रेण भिन्दन् सप्तदिनान्यसमाप्तशस्त्राहवाग्रहः शितार्धसुधामयूखशिलीमुखमुखविखण्डिततुण्डावलोकनात् त्रपन्तं तं जगत्त्रितयमित्रेतरं पौलस्त्यमित्रं कमपि कपिमण्डलीखण्डनं दशतुण्डमेनं समाश्वासयितुमिव सौमित्रिसायकसमवाप्ततोदनं नन्दनीयनिजनन्दनं नन्दनेशजितं तदीयपदवीं निनाय तमनयं न्यायतः पितामहास्त्रतः ॥

अथ खलु स एष दशरथिरभिवृष्टः सुमनोभिः सुमनोभिर्विरचय्य बिभीषणं लङ्कापुरेशं परिगृह्य रामां विनयाभिरामां सकलकल्याणगुणार्णसां निधी रामचन्द्रः समारूढवानरर्क्षरक्षोगणं सरोवरमिव लक्ष्मणाभिरा(मां?मं) विधिमिव हंसयानमधिरुह्य विमानं पुष्पकं नाम समवलोक्य समन्तात् लङ्कापुरमधि भूमिसमुद्भवे! विभीषणभवनमिदं जितरम्भोरु! सेतुसमारम्भणस्थलमिदं जितपङ्कजपादे! पम्पासर इदं जनकनन्दिनि! जनस्थानमिदं कुम्भिकुम्भस्तनि! कुम्भसम्भवायतनमिदं विधुमुखि! विराधविध्वंसनधरित्रीयमिति च विविधाः कथाः कथयन्नाससाद नन्दिग्रामं पुरतः समागतभरताकोऽयकसहितः ॥

युजि चतुर्थेनोत्तरः साकं प्राच्यवृत्तिः ॥ १० ॥

तस्यैव सोपजातेर्वैतालीयस्यादौ युक्पादे चतुर्थेन लघुना सार्धमुत्तरो लघुर्भिश्रितो भवति चेत् प्राच्यवृत्तिर्नाम भवति । यथा —

पुलिनैः प्रतिभान्ति निम्नगाः
सारसाग्रचरणाङ्ककर्दमैः ।
कलहंसविकीर्णमेखलाः
कान्तभुक्तजघना इव स्त्रियः ॥

अयुज्यप्यपरान्तिका[1] ॥ ११ ॥

तस्यैव वैतालीयस्यादौ अयुक्पादेऽपि चतुर्थेन लघुना सार्धमुत्तरः पञ्चमो लघुर्मिश्रितो भवति चेदपरान्तिका नाम भवति । यथा —

भान्ति साम्प्रतं जलाशया
हंसचक्रवाकांसकम्पितैः ।
सम्प्रदीप्तकाननोपमाः
पङ्कजैर्विबुद्धैः समाकुलाः ॥

द्वितीयेनोदीच्यवृत्तिः ॥ १२ ॥

तस्यैव सोपजातेर्वैतालीयस्यादावयुक्पादे द्वितीयेन लघुना (उ)त्तरस्तृतीयो लघुर्मिश्रितो भवति चेद् उदीच्यवृत्तिर्नाम भवति । यथा —

1. Mss. अयुज्यपरान्तिका.

मनोज्ञमपि सिन्दुवारतः
कुन्दकुसुमममग्रयं च षट्पदः ।
न सर्पति तुषारशङ्कित-
श्चन्द्रालोकविशेषशीतलम् ॥

युज्यपि दाक्षिणान्तिका ॥ १३ ॥

तस्यैव सोपजातेर्वैतालीयस्यादौ युक्पादेऽपि द्वितीयेनोत्तरस्तृतीयो लघुर्भवति चेत् दक्षिणान्तिका नाम भवति । यथा —

कदम्बगन्धोल्बणावनिः
प्रवान्ति केसरयूथिकानिलाः ।
सतोयभरलम्बिनो घनाः
भ्रमन्ति मुदितरवा जलदागमे[1] ॥

प्रसक्तकं प्राच्योदीच्यवृत्तिभ्याम् ॥ १४ ॥

प्रसक्तकं नाम भवति प्राच्योदीच्यवृत्तिभ्यां भवति चेत् । यथा —

विघाटितपयोधरार्गलं
निर्मलोज्ज्वशशाङ्कमण्डलम् ।
दिवाकरमरीचिसंक्षये
धौतहर्म्यमिव लक्ष्यतेऽम्बरम् ॥

सोपजातेर्वैतालीयस्योक्तत्वात् प्राच्यवृत्त्यपरान्तिकोदीच्यवृत्तिदाक्षिणान्तिकाप्रसक्तकानि औपच्छन्दसिकापातलिकयोरपि भवति ।

1. This pāda contains one excess mātrā.

तत्रौपच्छन्दसिकप्राच्यवृत्तिर्यथा —

अभिवीक्ष्य[1] नितान्तताम्रपद्मं
सम्प्रदीप्तमिव केचिदम्भैः ।
न भयादुपयन्ति वारणेन्द्रा
दाववह्निचकिताः समुन्नदन्तः ॥

औपच्छन्दसिकाप्रान्तिका यथा —

द्यौर्विभाति पूर्णचन्द्रवक्त्रा
प्रोन्मिषद्विविधतारकाकुलाक्षा ।
चन्द्रिकादुकूलसंवृताङ्गी
कन्यकेव हि विवाहवेषयुक्ता ॥

औपच्छन्दसिकोदीच्यवृत्तिर्यथा —

नवाम्बुधरवृन्दचुम्बितालकाग्राः ।
जलदोन्मत्तमयूरभूषिताग्राः ।
[2]बिन्दजितनीलविद्रुमाग्राः
गिरयः सर्जकदम्बवासिताग्राः ॥

औपच्छन्दसिकदक्षिणान्तिका यथा —

गुणैरनुपमो[3] वसन्तकालो
मनो हरति नृणां मनोज्ञरूपः ।
प्रपुष्टपरपुष्टवृन्दपोषः
प्रबुद्धकमलाम्रबोधितालिः ॥

१. This pada is deficient in three matrās.
२. Mss are defective here.
३. 'पमैर्वैस' ख. ग.

औपच्छन्दसिकप्रसक्तकं[1] यथा —

दिवाकरमरीचिसम्प्रतप्ताः
दाववह्निपरिदग्धगुल्मधूम्राः[2] ।
जलैर्नवबलाहकाभिवृष्टै-
रुच्छ्वसन्त इव भान्ति पर्वतेन्द्राः ॥

आपातलिकायाश्चोदाहरणान्येवं ज्ञेयानि ।

इति वैतालीयप्रकरणम् ।

अथ[3] मात्रासमकप्रकरणम् ।

वैतालीयजातिः सोपजातिरुक्ता । इदानीं मात्रासमकजातिर्वक्ष्यते ।

गणाश्चत्वारो मात्रासमकम् ॥ १५ ॥

अयुक्पादे युक्पादे च गणाश्चत्वारो भवन्ति चेन्मात्रासमकं नाम भवति ।

सु वान्त्यम् ॥ १६ ॥

तस्यैव मात्रासमकस्यान्त्यो गणः सकारः (गङ्गास्) उकारो (कुरुतेल्) वा भवति ।

१. 'प्रवर्तकं' ख॰
२. 'रितप्तगु' क॰
३. This section is found to be highly defective in the Mss. and the verses cited seldom illustrate the rules and often contain less or more syllables than required.

तृतीयो ल् ॥ १७ ॥

तस्यैव मात्रासमकस्यायुक्पादे युक्पादे च गणस्तृतीयो लकारो (कुरुतेल्) भवति ।

अश्मश्रुमुखैर्विषमैर्दन्तैः
गम्भीराक्षैर्वल्लिनासाग्रैः ।
निर्मांसहनुस्फुटितैः केशै-
र्मात्रासमकं लभते दुःखम् ॥

द्वा वानवासिका ॥ १८ ॥

तस्यैव मात्रासमकस्यायुक्पादे युक्पादे च तृतीयो गणो दकारो (नचरतिद्) वा भवति चेद् वानवासिका नाम भवति । यथा —

वद किं कमलासि भीरु लक्ष्मि
मा चन्द्रप्रभा रतिर्वामतनुरथापरासि साक्षात् ।
प्रमदान्या वानवासिका त्वम् ॥ (?)

विश्लोको दिद्वितीयः ॥ १९ ॥

तस्यैव मात्रासमकस्यायुक्पादे युक्पादे च (द्वितीयः) दकार इकारो वा भवति चेद्विश्लोको नाम भवति ।

१. Mss. 'साग्रम्'.

२. Mss. द्विर्विर ः.

यथा —

नष्टेन्द्रचापविद्युत्पतना-
न्धकारं निकीर्णतारं समये।
निस्तोयतोयधरनष्टरवं
राजति वृत्तविमलं गगनम् ॥ (?)

तृतीयश्च द्‌लिश्च ॥ २० ॥

तस्यैव मात्रासमकस्य तृतीयो द्वितीयश्च दकारो वा लकारो वा इकारो वा भवति चेत् चित्रा नाम भवति। यथा —

पद्मप्रियाङ्गुनिभामलाङ्गी
पीनस्तनी कृशचारुमध्या।
विभ्राजतेऽवनितलेन्द्रयूना
चित्रा यथोडुपतिना चित्रा ॥

साचोपचित्रा ॥ २१ ॥

तस्यैव मात्रासमकस्यायुक्पादे युक्पादे च तृतीयो गणो द्वितीयश्च सकारो वा अकारो वा भवति चेदुपचित्रा नाम भवति। यथा—

पल्लवशाटकसंवृताङ्गी
भीमामरकुलकुसुमाढ्या।
शाखावाहलतानिलवेगा
नृत्यति वै सहकारलतेयम् ॥

एभिः पादा[illegible]लकम् ॥ २२ ॥

एभिर्वानवासिका-विश्लोक-चित्रो-पचित्रालक्षणैरेकस्मिन् रूपे सह सम्भूतैः पादाकुलकं नाम भवति यथा—

अम्भोभारप्रलम्बबिम्बा
वृन्दं प्रयान्ति गगने जलदाः ।
नृत्यच्छिखण्डिकञ्चिताः शैलाः
सङ्कीर्णा भूर्गोपकसङ्घैः ॥

अभा गीत्यार्या ॥ २३ ॥

मात्रासमकस्यैव पादा गुरुविरहिता भवन्ति चेद् गीत्यार्या नाम भवति । यथा—

वकुलकुमुदकुवलयनवपटुमधु-
करविरचितकमलमतिसुरभि ।
सलिलमिदमसितपटनिभमतितनु-
शिखरसंहितदति शरदिति कथयति ॥

शिखार्धे भाः ॥ २४ ॥

गीत्यार्याया एवार्धे गुरवो भवन्ति चेच्छिखा नाम भवति । यथा—

कादम्बानां पक्षोद्धूतैः
पद्मैः कीर्णैराक्रोशद्भिः ।
सलिलमिदमसितपटनिभमतितनु-
शिखरसहितदति[1] शरदिति कथयति ॥

1. Mss. omit 'सहित'

चूळिका णणणय् ॥ २५ ॥

चूळिका नाम भवति अर्धे एते गणा भवन्ति चेत् ।
यथा —

वरयुवतिहृतहृदय किमसित-
सुरतसुरभि भवसि मम गृहम् ।
खल विरमपुरथवरयुवतिजघन-
गतमसि भवति नय च शुभम् ॥

ह्राधिका तारा ॥ २६ ॥

इयमेव चूळिका अर्धे एकेन लघुनाधिका भवति चेत् तारा नाम भवति । यथा —

चलशिथिलधृतिषु वहुविकृतगातिषु
दुर + + + क्षिगमतिषु शठकृतिषु ।
बहुविधमशुभमु + ञहृदय
किमिति विगणयसि करितयुवतिषु ॥

इति मात्रासमकप्रकरणम् ।

———

मण्डलार्धयुतार्कोनश्चेत् चन्द्रः तस्माद्विशोध्य तं चन्द्रं तत्राविशेषं लिप्तीकृत्य तद्राशिप्राणपिण्डेन स्वदेशजेन हत्वा राशिलिप्तासमूहेन विभज्यान्तरासूनादाय पूर्ववद्रविचन्द्रस्फुटभुक्तिभ्यां हत्वाऽत्राप्यहोरात्रसुराशिनैव फलद्वयं गृहीत्वा लग्नचन्द्रौ पूर्वानीतावेवाविशेषितौ कृत्वा पूर्ववदविशिष्टयोः विवरसम्भवप्राणैः अस्तमयात्पूर्वमेव चन्द्रोदयकाल आदेष्टव्यः। अथ मण्डलार्धयुतार्कात् अधिके चन्द्रस्फुटे सति चन्द्रात्तद्विशोध्य तत्राधिककलाभिरेवमेवान्तरप्राणानानीय रविचन्द्रस्फुटभुक्तिभ्यां फलमपि लिप्ताभिः पूर्ववद्गृहीत्वा तयोरसकृत्प्रक्षिप्याविशेषणं कृत्वा तत्रान्तरप्राणैः अस्तमयकालमतिक्रम्य रात्रौ तावता कालेनोदेतीत्यादेष्टव्यः ॥ २१ ॥

अथेदानीं रात्रौ चन्द्रस्य महच्छायामुपदिदिक्षुराह —

उदयेन्द्वन्तरप्राणैरस्तचन्द्रान्तरैरपि।
स्वाहोरात्रादिभिश्चान्द्रैः शङ्कुदृश्ये ततः प्रभाः॥ २२ ॥[1]

रात्रौ तावद्यस्मिन् काले छायामवगन्तुं बुद्धिरुत्पद्यते तस्मिन् काले रविचन्द्रस्फुटद्वयं कृत्वा तस्मिन्नहोरात्रे रव्युदयात्प्रभृति या अतीता घटिकास्ताः सर्वाः प्राणीकृत्य तस्मादादित्याच्च तदानीं प्राग्विलग्नमागण्य प्राक्कपालस्थे शशाङ्के सति प्राग्विलग्नचन्द्रान्तरप्राणराशिं पूर्ववदानीय पुनरपरकपालस्थे सति प्राग्विलग्ने राशिषट्कं प्रक्षिप्यास्तलग्नमवगम्य तस्मादिन्दोश्चान्तरप्राणराशिमपि पूर्ववदादाय क्वचिद्विन्यस्य तदानीं पातस्फुटमपि कृत्वा तस्माद्विक्षेपापक्रमावानीय काष्ठीकृत्य तयोर्दिग्वशात् योगं वियोगं वा कृत्वा तस्माज्जीवामादाय तामिष्टापक्रमसंज्ञां प्रतिराश्य वर्गीकृत्य व्यासदलवर्गाद्विशोध्य मूलं स्वाहोरात्रार्धसंज्ञामादाय क्वचिद्विन्यस्य पुनरक्षज्यया विन्यस्तेष्टापक्रान्तिं हत्वाऽवलम्बकेन विभज्य क्षितिज्यामानीय प्रतिराशीकृत्य व्यासार्धेन हत्वा स्वाहोरात्रेण विभज्य काष्ठीकृत्य तैश्चन्द्रभूज्याचरासुभिः उभयोः कपालयोरुक्तान्तरप्राणैश्च स्वगोळवशाच्चन्द्रस्य शङ्कुच्छायां चानीय द्वादशाङ्गुलशङ्कुप्रभा पुरुषप्रभा वादेष्टव्येत्यर्थः ॥ २२ ॥

अथेदानीमपरपक्षे रात्रौ कियता कालेन चन्द्रोदयस्सम्भवतीत्येतत् प्रदर्शनार्थमाह—

दिनान्तोदयलग्नस्य गन्तव्या लिप्तिकाहताः।[2]
स्वभोदयासुभिर्लब्धाः प्राणराशिकलाहताः॥ २३ ॥

1. H gives the variant स्वाहोरात्रासुभिः.

2. D षड्भोर्वा लिप्तिकाहताः.

संपिण्ड्याः शशिनो यावद्भुक्तिलिप्ताववेरिति ।
स्फुटभोगानुपातात्तमिन्दोः क्षिप्त्वाविशेषयेत्[1] ॥ २४ ॥

अविशिष्टेन कालेन शर्वर्यां दृश्यते सिते ।
विध्वस्तध्वान्तसङ्घातधामराशिर्निशाकरः ॥ २५ ॥

दिनान्तोदयलग्नमिति यदुच्यते तदिहास्तमयवेलायां मण्डलार्धयुतार्कस्तस्माच्चन्द्रस्य च यदन्तरं प्राणात्मकं स्वदेशराश्युदयवशादानीय रवीन्दुभुक्तिभ्यां अभिहत्य पृथगहोरात्रासुलब्धफलमुभयोर्दिनान्तोदयलग्नचन्द्रयोः क्षिप्त्वा पुनः पुनरविशिष्टयोरन्तरासुभिः अस्तमयकालादूर्ध्वं रजन्यां चन्द्रोदयस्सम्भवतीति वक्तव्यम् । अपि चात्राविशेषकरणविषये सर्वत्रायं प्रयोगः स्मर्तव्यः । एवमविशिष्टकालेन शर्वर्यां विध्वस्तध्वान्तसङ्घातधामराशिर्निशाकरः दृश्यत इत्यर्थः । यद्यपरपक्षे दिवा कियता कालेन गगनतले स्थित्वा चन्द्रोऽस्तं गच्छतीत्यवगन्तुं बुद्धिरुत्पद्यते तदानीमुभयकरणानीत रवेर्मण्डलार्धं क्षिप्त्वाऽस्तलग्नमापाद्य तत्कालचन्द्रभुक्तभागात् उत्क्रमतः प्राणपिण्डमस्तलग्नात् भुक्तावधिकमादाय पृथग् स्फुटभुक्तिभ्यां हत्वाहोरात्रासुराशिना विभज्य लब्धं फलद्वयमस्तलग्नचन्द्रयोः क्षिप्त्वाविशिष्टयोरन्तरासुभिरवगन्तव्यम् । एवमन्तरासुग्रहणमपरकपालेन भवतीति मन्यामहे । कुतः —

'उदयस्य वशादस्तमयन्ते[2] राशयो यतः ।'

इत्युक्तत्वात् । सत्यम् । अत एव राशेः तस्यैव पूर्वं स्यात् । सप्तमस्यापरोदय इत्यत्र विहितमत्र व्याख्यातम् । शृङ्गोन्नतिमवगन्तुं कदाचित् केरलेश्वरः कुलशेखर इदमाह —

आदित्येऽस्ताद्रिशृङ्गं गतवति नृपतिर्गोत्रमल्लेश्वरस्य-
प्रासादाग्रप्रविष्टो रविरवनिरविर्द्विष्टुमेवं ह्यवोचत् ।
मासे स्यान्नैव चैत्रे जननमिह कथं शृङ्गयोरुन्नतित्वं
कस्मिन् स्यात् पार्श्वयोर्वा सवितुरिह वदालिख्य सर्वं ममेति ॥ १३–२५ ॥

इति लघुभास्करीयविवरणे शङ्करनारायणीये
षष्ठोऽध्यायः ॥

---

1. A B विशोषयेत्.
2. S₁ दस्तमयान्ते.

अथ सप्तमोऽध्यायः ।

अथेदानीं शुक्रादीनामुदयास्तमयं ग्रहयुद्धं चोपदिदिक्षुराह —

कृतदर्शनसंस्कारो भार्गवोऽर्कान्तरस्थितैः ।
अंशकैर्नवभिस्तेभ्यो द्व्यधिकैर्द्व्यधिकैः क्रमात् ॥ १ ॥
दृश्यन्ते सूरिवित्सौरिमाहेया निर्मलेऽम्बरे ।
कालभागा दिगभ्यस्ता विज्ञेयास्ता विनाडिकाः ॥ २ ॥

स्फुटादित्यस्य पृष्ठतोऽग्रतो वा अष्टभिर्नवभिर्दशभिर्वान्तरितक्षेत्रभागैः शुक्रस्फुटं सकलं कृत्वा शुक्रस्य शीघ्रोच्चमप्यनष्टं क्वचिद्विन्यस्य शुक्रमन्दस्फुटकर्णमविशिष्टमपि गृहीत्वा तस्यैवान्त्यशीघ्रस्फुटकर्णमपि सकृदानीतं च गृहीत्वा तयोर्मन्दशीघ्रकर्णयोः एकेनान्यमभिहत्य व्यासार्धेन हृत्वा फलमिह भूताराग्रहविवरं नाम भागहारः स्यात् ताराग्रहस्य च घनभूमध्यस्य चान्तरमिति यावत् । एवंविधं भागहारमप्यानीय क्वचि, द्विन्यस्य शुक्रशीघ्रोच्चाद्राशिद्वयं पातसंज्ञं विशोध्य सौम्यदक्षिणलक्षणां दिशं चोपलक्ष्यां भुजामौर्वीमादाय विक्षेपलिप्ताभिः शून्याब्धिचन्द्राभिरभिहत्य भूताराग्रहविवरभागहारेण विभज्य तत्कालविक्षेपलिप्ताश्चादाय चन्द्रस्योक्तन्यायेन विक्षेपलिप्ताः प्रतिराश्याक्षज्यया हत्वा लम्बकेन विभज्य लब्धमुदयास्तमयज्ययोरुक्तमार्गेण शुक्रस्फुटे धनर्णं कृत्वा पुनः प्रतिराश्यायनमुपलक्ष्य त्रिराश्यूनोत्क्रमभुजज्यामादाय तथा विक्षेपलिप्तां प्रतिराशित, संगुणय्य पुनरपि तदेव परमापक्रमज्यया हत्वा व्यासार्धकृत्या विभज्य फलं शुक्रस्फुटे लिप्तासु विलिप्तासु वा शुक्रायनविक्षेपदिक्साम्ये विशोध्य भिन्नयोः क्षिप्त्वा वा भार्गवः कृतदर्शनसंस्कारः स्यात् । एवमन्येषामपि स्वविक्षेपवशाद्दर्शनस्फुटद्वये कृते सति कृतदर्शनसंस्काराः स्युः । पातभागाश्च विक्षेपज्याश्च स्वयमेवोत्तरत्र वक्ष्यति भागहारं च । एवं कृतदर्शनसंस्कारयुक्तः शुक्रः कालभागैः नवभिरन्तरितः सूर्यात्तदानीं द्रष्टुं शक्यो भवति । एतदुक्तं भवति—सूर्यस्य पृष्ठतोऽग्रतो वा कालभागैर्नवभिरुदयास्तमयौ करोति भार्गव इति । तेभ्यो द्व्यधिकैर्द्व्यधिकैः क्रमादिति नवभ्यो द्वौ क्षिप्त्वा एका-दशत्वमापाद्य कालभागैरेकादशभिः बृहस्पतिरुदयास्तमयौ करोति । तेभ्यो द्व्यधिकैः त्रयोदशभिः बुधः करोति । तेभ्यो द्व्यधिकैः पञ्चदशभिः सौरिः । ततो द्व्यधिकैः सप्त-दशभिर्महीपुत्रः । क दृश्यत इति चेन्निर्मलेऽम्बरे । शुक्रस्य तु पुनः वक्रनिमित्तोदया-स्तमयविषयेऽर्धपञ्चमैरेवोदयास्तमयमिष्यते । तथा स्वयमेव बृहति कर्मनिबन्धे वक्ष्यति । कथम् ।

---

१. S_1. om अष्टभिः.

२. S_1. शुक्रनीचोच्चात् ।

'प्रपन्नवक्रः सद्वृत्में सितो दृश्योऽर्धपञ्चमैः
चतुर्भिर्वांऽशुमालित्वाद्'

इति । चतुर्भिरंशैरपि तेजोऽधिकत्वात् कदाचित् करोतीत्युक्तम् । कालभागा दिगभ्यस्ता विज्ञेयास्ता विनाडिका इत्यत्र क्षेत्रभागैर्विना कालभागैरेवोक्तः नवादिभिर्दृश्यन्त इत्येतत् कालभागानां लक्षणमुच्यते । कथम् । दिगभ्यस्ता विनाडिका इति दशभिरभिहता इत्यर्थः । एतदुक्तं भवति — नवत्या विनाडिकायाः शुक्रो दृश्यत इति । एवमन्येषामपि दशभिस्त्रिंशता पञ्चाशता सप्तत्या प्रत्येकं शतसहिताभिर्विनाडिकाभिः सूरिप्रभृतयो दृश्यन्त इति व्याख्यातम् ॥ १–२ ॥

अथेदानीं कालभागविनाडिकावगमनार्थमाह —

राशेस्तस्यैव पूर्वस्यां सप्तमस्यापरोदये ।
स्वदेशभोदयैः कालं ज्ञात्वा दर्शनमादिशेत् ॥ ३ ॥

आदित्यताराग्रहान्तरप्राणानयनं द्विविधम् । कथम् । प्राच्यां दिश्येकं, पश्चिमस्यां द्वितीयम् । पूर्वं तावत्पूर्वस्यां वक्ष्यामः । यस्मिन् राशावादित्यग्रहौ तिष्ठतः तत्राधिकाद्धीनमपनीय विवरं लिप्तीकृत्य तद्राशिप्राणसमूहेन स्वदेशजेन हत्वा तदेकराशिलिप्ताभिर्विभज्य यत्फलमानीयते तत् पुनष्षड्भिर्विभज्य तारापिते सति विनाडिका भवन्ति । तासां विनाडिकानां नवत्यादिसंख्या शुक्रादीनां सम्भवतीति चेत् तदानीमुदयास्तमयौ स्याताम् । अथ पश्चिमोदयास्तमये भानुताराग्रहान्तरलिप्ताः ततः सप्तमराशिप्राणसङ्ख्यया हत्वा राशिलिप्ताभिः खखाष्टचन्द्राभिरेव विभज्य फलमानीय षड्भिरारोप्य विनाडिकासङ्ख्यया द्व्यधिकद्व्यधिकक्रमोत्पन्नया नवत्या गुणितया पूर्ववदुदयास्तमयौ भवत इत्यर्थः । उदयस्य वशादस्तमयन्ते राशय इत्युक्तत्वात् पश्चिमदिग्गतस्य सप्तमराशित्रैराशिकमुच्यते । एवं स्वदेशोदयैः त्रैराशिकं कृत्वान्तरकालांशमवगम्य दर्शनमादेष्टव्यमिति व्याख्यातम् ॥ ३ ॥

अथेदानीं ग्रहयुद्धस्वरूपमुपदिदिक्षुराह —

इष्टग्रहान्तरं भाज्यं प्रतिलोमानुलोमगम् ।
भुक्तियोगविशेषेण दिनादिस्तत्र लभ्यते ॥ ४ ॥

---

1. S2· ३. कालावगमनसवर्णम्.

एकस्मिन् राशौ द्वौ ताराग्रहौ यदा प्रविष्टौ प्रतिष्ठतः तदानीं तौ स्फुटौ कृत्वा पुनर्दर्शनसंस्कारमपि तयोः कृत्वा तयोः स्फुटभुक्तिर्द्वे गृहीत्वा क्वचिद्विन्यस्य तत्राधिका-हीनमपोह्य शेषं लिप्तीकृत्य तयोः स्फुटभुक्तिविश्लेषेण च वक्रकाले भुक्तियोगेन वा विभज्य यत्फलं गृह्यते तत्रापि भुक्तिद्वयमपोह्य दिनादिस्तत्र योगकाल इति पूर्वमवगम्य पुनस्तैदानीन्तनेन कालेन स्फुटौ कृत्वा तत्रापि भुक्तिद्वयमापाद्य तावुभौ समलिप्तौ कार्यौ ॥ ४ ॥

तदर्थमधुना समकलीकरणमाह—

स्फुटभुक्त्यानुपातात्तफलेनासन्नयोगिनाम् ।
ग्रहाणां शुद्धिकल्पाभ्यां कुर्यात्समकलावुभौ ॥ ५ ॥

एवं योगकालासन्नस्फुटौ कृत्वा पुनरप्यन्तरलिप्ताभिः पूर्ववद्दिनादि वा घटिकादि वा फलमानीय तत्र दिनानि सन्ति चेत्पुनरप्यहर्गणे तद्दिनानि प्रक्षिप्य मध्यमानयनादिस्फुटं सकलं कृत्वा घटिकादिभिर्भूयोऽपि तत्कालीकृत्य समकलौ कर्तव्यौ । तद्यथा—आसन्नयो-गिनामन्तरलिप्ताभिः घटिकादिफलं पूर्वं गृहीत्वा सर्वं प्राणपिण्डमापाद्य तदुभयत्र विन्यस्य द्वाभ्यां स्फुटभुक्तिभ्यामुभयं संहृत्याहोरात्रासुना खखषड्घनेन विभज्य लिप्तादि वा विलिप्तादि वा स्फुटभुक्तिवशादादाय तत्तत्फलमुभयोः स्फुटयोः शुद्धिकल्पाभ्यां समकलौ भवतः । क्व शुद्धिः क्रियते क्व वा कल्प इति चेत् अतीतयोगिनोः शुद्धिः, अथ भविष्यद्योगिनोः प्रक्षेपः । कल्पः प्रक्षेप इत्यर्थः ॥ ५ ॥

अथेदानीं समकलयोः विक्षेपानयनमाह—

पातभागास्ततश्शोध्याः शीघ्रोच्चात्सितसौम्ययोः ।
कृतद्व्यष्टर्तुककुभो दिग्गुणास्ते कुजादिकाः ॥ ६ ॥

अस्य पूर्वमेव व्याख्यातार्थत्वात् विशेषः कथ्यते । कृतद्वि-अष्ट-ऋतु-ककुभ-इत्येतानि पृथग् पृथगवस्थाप्य प्रत्येकं दशगुणं कृत्वा ये भागास्तत्र दृष्टाः तांस्त्रिंशद्भि-रारोप्य ये राश्यादयो दृश्यन्ते त इह कुजादीनां पञ्चानां पाता भवन्ति । तत्र कुजस्य वृषभराशौ दशभागगतः, बुधस्य मेषे विंशतिभागगतः, जीवस्य तावत् मिथुने विंशति-भागस्थितिः, शुक्रस्य वृषभान्त्यः, शनैश्चरस्य कर्कटे दशभागगतः, एवं कुजादीनां नित्याः पाताः पठिताः । एते ग्रहाणां शोधनीयाः स्फुटेभ्यः । अथ सितसौम्ययोः

१. S[1] गृह्यते दिनादिस्त्रयोदशकाल, S8 गृह्यते दिनादिस्तत्र योगकाल.

२. S1. 8 तदानीं तेन.

शीघ्रोच्चाभ्यां शोद्ध्यौ । पुनरेतेषां पातानां सप्तमराशावपि स्थितिरेवमेव । एतदुक्तं भवति — यथा चन्द्रस्य पातं चन्द्राद्विशोद्ध्य दिशमुपलक्ष्य भुजाजीवामादाय विक्षेपज्यया हत्वा व्यासार्धेन विभज्य तद्विक्षेपं गृह्यते तद्वदेतेषामपि क्षेपो ग्राह्य इति । अत्रेयान्विशेषः भूताराग्रहविवरो भागहार इति ॥ ६ ॥

अथेदानीं पातं विशोद्ध्य विक्षेपग्रहणार्थमाह—

नवार्कर्त्वर्करवयो दशघ्नाः क्षितिलिप्तिकाः ।
पाताशोनभुजामौर्वी संगुणाः सौम्यदक्षिणाः ॥ ७ ॥

नव अर्क ऋतु अर्क रवि इत्येता लिप्ता विन्यस्य दशगुणं सर्वासां कृत्वा यावत्यो लिप्ता दृश्यन्ते ता इहैतेषां परमविक्षेपज्या भवन्ति । पातशुद्धस्फुटग्रहसौम्यदक्षिणदिगागतभुजाजीवानां गुणकारा भवन्तीत्यर्थः । तत्राप्तमिष्टविक्षेपलिप्ताः स्युः ॥ ७ ॥

अथेदानीं विक्षेपभागहारं वर्णयितुमाह—

विष्कम्भार्धहृतो घातो मन्दशीघ्रोच्चकर्णयोः ।
भूताराग्रहविवरं भागहारः प्रकीर्तितः ॥ ८ ॥

तृतीयमन्दस्फुटकर्णं चतुर्थशीघ्रस्फुटकर्णेन हत्वा व्यासार्धेन विभज्य लब्धमिह विक्षेपानयनविषये भागहार इति पूर्वमेव प्रसङ्गादुक्तम् ॥ ८ ॥

अथेदानीं समलिप्ताग्रहयोरन्तरमुपदिदिक्षुराह—

विक्षेपलिप्तिका लब्धास्ताभिरन्तरमिष्टयोः ।
एकदिक्त्वे विशिष्टाभिर्युक्ताभिर्भिन्नदिक्कयोः ॥ ९ ॥

चतुर्भागाङ्गुला लिप्ता ग्रहयोरन्तरं स्फुटम् ।
वर्णरश्मिप्रमायोगाद्दृश्यं वान्यस्त्वया धिया ॥ १० ॥

स्वं स्वं पातं स्वस्माद्विशोध्य शीघ्रोच्चाभ्यां सितसौम्ययोर्विशोद्ध्य वा पूर्वोक्तेन मार्गेण विक्षेपलिप्ताश्चादाय द्वयोर्विक्षेपयोर्दिक्साम्ये सति हीनमधिकाद्विशोद्ध्य भिन्नदिक्कयोर्योगं वा कृत्वा पुनश्चतुर्भिर्विभज्य यत्फलं गृह्यते तदङ्गुलानि ग्रहयोरन्तरक्षेत्रस्थानि भवन्ति । चतुर्विंशत्यङ्गुलैरेको हस्तो गृह्यते । एवंविधैर्हस्तादिमानैरन्तरमादेष्टव्यम् । तत्र विक्षेपवशादुत्तरदक्षिणस्थितिरादेष्टव्या । कुतः । उत्तरविक्षेपस्योत्तरेणैव अथ दक्षिणस्य दक्षिणेनैव । पुनरेकदिग्विक्षेपयोरधिकविक्षेपस्य तस्यामेव दिशि

---

१. A B F क्षितिलिप्तिकाः, D क्षेपलिप्तिकाः.

तावदधिकं विक्षेपं कृत्वा तिष्ठतीति वक्तव्यः । तत्र वर्णरश्मिप्रमायोगादपि स्वधिया स्वप्रज्ञया वाभ्यूह्य तावुभावहरहर्दृष्ट्या चान्यत् सर्वमालोच्य वक्तव्यम् । अत्रापि **श्रीरविवर्मदेवः** कदाचित् ग्रहयुद्धविज्ञानप्रकटनार्थमाह—

चापप्रविष्टगुरुसौरिसमत्वकालं
शाम्योत्तरं गमनमन्तरखप्रमाणम् ।
आचक्ष्व सर्वमवगम्य भटोक्तमार्गा-
दित्युक्तवान् रविरशेषनृपाभिवन्द्यः ॥

तदा पञ्चविंशतिवर्षाण्यतीतानि देवस्य ॥ ९-१० ॥

इति शङ्करनारायणीये भास्करीयविवरणे
ग्रहयुद्धस्सप्तमोऽध्यायस्समाप्तः ।

अथाष्टमोऽध्यायः ।

अथेदानीं द्वादशराशिक्षेत्रविषये षष्टिशतत्रयविभक्तेऽश्विन्यादीनां नक्षत्राणामवस्थितिप्रदर्शनार्थमाह —

अष्टावष्टादश दिशो मनवोऽर्का द्वयोर्घनः ।
द्वाविंशतिश्च विश्वे च नवशक्रास्त्रयोदश ॥ १ ॥

विश्वे विंशतिरेकोना द्वादशार्कास्त्रिपञ्च च ।
दिशो रसाश्च विश्वे च विश्वे सूर्या धृतिस्तथा ॥ २ ॥

रुद्रास्सूर्यास्त्रिसप्ताथ शैलेन्दुतिथयस्तथा ।
पूर्वपूर्वयुता ज्ञेया योगभागा यथोदिताः ॥ ३ ॥

मेषे तावदष्टभागेऽश्विनीनक्षत्रं, तथैव तस्मात् अष्टादशे भरणी, ततो दशभागे कृत्तिका, तस्मान्मनुसङ्ख्यायां रोहिणी, अतोऽर्के मृगशीर्षः, तस्माद्द्विघनसङ्ख्यायामार्द्रा, ततो द्वाविंशतिभागान्तरिता पुनर्वसुः, तस्मात्पुनस्त्रयोदशान्तरितं तैष्यं, अतो नवमान्तरितमाश्लेषं, आश्लेषान्मनुभागदूरं पैत्रं, ततः पूर्वफल्गुनी त्रयोदशान्तरिता, तस्मादुत्तरफल्गुनी च त्रयोदशान्तरिता, पुनरस्मादेकोनविंशतिभागस्थितो हस्तः, हस्तात्पुनर्द्वादशसङ्ख्यायां चित्रा, चित्रायास्तावत्सङ्ख्यायामेव स्वाती, ततः पञ्चदशान्तरितं विशाखं, विशाखाद्दशान्तरितं मैत्रं, मैत्रात्तु षड्भागस्था ज्येष्ठा, ज्येष्ठाया त्रयोदशान्तरितं मूलं, मूलात् त्रयोदशान्तरितं पूर्वाषाढं, तस्मात्सूर्यान्तरितमुत्तराषाढं, उत्तराषाढादष्टादशभागान्तरितं श्रवणं, श्रवणादेकादशांशान्तरिता धनिष्ठा, धनिष्ठायाः सूर्यांशान्तरदूरं वारुणं, वारुणादेकविंशतिभागान्तरितं पूर्वभद्रपदं, तस्मात्सप्तदशांशे स्थितमाहिर्बुध्नं, पुनः पञ्चदशांशदूरं पौष्णम् । पुनरप्येतेषामेव केषाञ्चिद्विशेषं च वक्ष्यति —

'पूर्वपूर्वयुता ज्ञेया योगभागा यथोदिता'

इति । प्रोक्तनक्षत्राणि कस्मिन् राशौ तिष्ठन्तीत्येतदवगन्तुं पूर्वकथितैः सह योगमुत्तरोत्तरं कृत्वा तत्र तत्रैव कटकखचितरत्नानीव ज्योतिश्चक्रे तिष्ठन्तीति स्मर्तव्यानि भवन्ति ।

---

१. D E H त्रिपञ्चकाः.
२. B E H तिथयः क्रमात्.

योगभागा इति किमुक्तं भवति । यस्मिन् यस्मिन् राशौ यान्यानंशान् गत्वा स्फुटग्रहो दृश्यते तेन ग्रहेण तत्तन्नक्षत्रयोगदर्शनात् नक्षत्राणामपि तावदंशान्तरं दृष्ट्वा अन्योन्यान्त - भागप्रमाणमस्माभिरवगतमित्युक्तं भवति । अथवान्योन्यान्तरमुदयास्तमयवेलायां नाडिकाभिरवगम्य यन्त्रयोगादवगता इति यावत् । एतस्मिन्नर्थे पुनराचार्येणैव रक्षणपरीक्षार्थं रक्षार्थं चेदमुक्तम् —

"भूरवियोगाद्दिनकृद्रवीन्दुयोगात् प्रसाधितश्चेन्दुः ।
शशितारग्रहयोगात् तथैव ताराग्रहास्सर्वे ॥"

एतदर्थं बृहति कर्मनिबन्धे स्वयमेव प्रकीर्णकाध्यायेऽपि विस्तरेणोपदिष्टवानाचार्यो भास्करः ॥ १—३ ॥

अथेदानीं केषाञ्चिन्नक्षत्राणामन्तरविशेषं दर्शयितुमाह —

आप्यवैष्णवमूलानां पित्र्यवासवयोरपि[1] ।
त्रिशल्लिप्ताः सप्तानां क्षेप्या वैश्वस्य[2] शेषतः ॥ ४ ॥

आप्यादीनां सप्तानां नक्षत्राणां प्रोक्तयोगभागेषु त्रिशल्लिप्ताः प्रत्येकं प्रक्षिप्य[3] द्रष्टव्यामित्यर्थः । अत्र तु पुनः पूर्वपूर्वयुतं स्वयमेव कृत्वा बृहति कर्मनिबन्धे पठितवान् । कथमिति चेत् —

"अष्टौ भानि क्रिये षट् स्युरेकोना विंशतिर्वृषे ।
द्वौ दिशो मिथुने द्वौ च तिथयस्त्र्यष्टकं परे ॥
अष्टौ सार्धास्त्रिसप्तैने वेदाश्शैलोनकन्यका ।
पञ्चाद्र्येकं तुलाराशौ द्वाविनोऽष्टादशापरे ॥
एकोऽब्धीन्दुस्त्रिरन्ध्राणि चापे भूतैकषड्यमाः ।
मृगेऽद्रिर्द्व्यूनकुम्भे च पञ्चेन्द्वन्त्येऽश्विनादयः ॥"

इति ॥ ४ ॥

---

1. D विश्ववासवयोरपि.
2. D विश्वस्य.
3. S[1] विक्षिप्य.

अथेदानीं ग्रहनक्षत्रयोगं स्पष्टीकर्तुमाह —

योगभागसमस्सर्वः संयुक्तो लक्ष्यते ग्रहः ।
अधिकोनकलाकालविज्ञानं चानुपाततः ॥ ५ ॥

यस्मिन्यस्मिन् राशौ ये ये योगभागा इति पठिताः तत्र तत्र तांस्तानंशान् गत्वा सर्वो ग्रहस्तन्नक्षत्रेण संयुत इव लक्ष्यते । नक्षत्राणामतिदूरत्वात् ग्रहकक्ष्यातः कियदन्तरं नक्षत्रग्रहकक्ष्ययोरिति चेत् घनभूमध्यनक्षत्रान्तरषष्ठ्यंशेऽर्ककक्ष्यावस्थितिः

'अधिकोनकलाकालविज्ञानं चानुपाततः ॥'

इति । अत्र नक्षत्रग्रहयोः समलिप्तीकरणमुच्यते । कथम् । इष्टग्रहस्फुटनक्षत्रान्तरमर्कोनं लिप्तीकृत्य स्फुटभुक्तिकलाभिर्विभज्य पूर्ववद्दिनादिकालमानीय तत्कालस्फुटं पुनः कृत्वा समकलीकरणं ग्रहस्य युक्त्या शोधनक्षेपणे कृत्वा कर्तव्यमित्यर्थः । तत्र ग्रहनक्षत्रान्तरमपि तयोर्विक्षेपवशादवगम्य वक्तव्यम् ॥ ५ ॥

कथमिह नक्षत्राणां विक्षेपग्रहणमित्यत आह —

उदग्दिगर्कभूतानि याम्ये पञ्च दिशो भवाः ।
उदग्रसास्तथा व्योम दक्षिणे मुनयोऽम्बरम् ॥ ६ ॥

उदगर्कास्तथा विश्वे दक्षिणे मुनयोऽश्विनौ ।
सौम्ये रसकृतिस्सैका याम्ये सार्धास्तथाग्नयः ॥ ७ ॥

अब्धयो वसवस्सार्धाः सप्तशैलास्ततः परम् ।
उदक् त्रिंशत्कृतिष्षण्णां याम्ये लिप्तास्त्रिषट्ककाः ॥ ८ ॥

उदगर्काश्च विश्वे च द्विरभ्यस्ता नभस्तथा ।
विक्षेपांशाः क्रमाद् दृष्टाः पण्डितैर्वाजिभादितः ॥ ९ ॥

उदग्दिगर्कभूतानि उत्तरस्यां दशभागविक्षेपस्थिताश्विनी, अर्कांशात् भरण्याः, भूतांशात् कृत्तिकायाः । याम्ये पुनः पञ्च दिशः भवा रोहिण्यादीनां त्रयाणाम् । उत्तरस्यां रसाः व्योम इत्येतावदादित्यतिष्ययोः, व्योम इत्यत्र विक्षेपाभाव इति यावत् । दक्षिणे मुनयः अम्बरं इत्येतौ आश्लेषमघयोः । उत्तरे पुनः पूर्वोत्तरयोः अर्का विश्वे इत्येतौ, हस्तचित्रयोः दक्षिणे मुनयः अश्विनौ । उत्तरे स्वात्या रसकृतिः सैका सप्-

1. Sl. दिनादिकालम्.
2. A. ग्रहादिशः.

त्रिंशदित्यर्थः। विशाखस्य याम्ये सार्धा अग्नयः। अध्ययः वसवः सार्धास्सप्त शैला इत्येते च दक्षिणे मैत्रादीनां चतुर्णामिति यावत। पुनर्वैश्वदेवस्य श्रवणस्य चोत्तरे त्रिंशत् षण्णां कृतिश्च। श्रविष्ठस्य याम्ये त्रिषट्का लिप्ताः। पुनश्शतभिषगादीनां चतुर्णामुत्तरे अर्काः विश्वे पुनरपि विश्वे नभः। इति व्याख्याताः नक्षत्रविक्षेपांशाः। विश्वे च द्विरभ्यस्ता इत्यत्र पूर्वोत्तरभद्रपदयोः विक्षेपतुल्यत्वाद्द्विगुणितास्त्रयोदशांशा एव भाद्रा इत्यर्थः। एतदुक्तं भवति — त्रयोदश एव विक्षेपांशाः आहिर्बुध्नस्येति। नभ इत्यत्र विक्षेपाभावात् रेवत्या इति यावत्। कुतः पुनर्दक्षिणोत्तरकल्पना नक्षत्राणां स्वदेशादुत लङ्कासूत्रात्। न स्वदेशान्न लङ्कासूत्रात्। अपक्रममण्डलादिति ब्रूमः। अमावोऽपि तत्रैव। कुतः। शशिविक्षेपोपमण्डलात् ज्यार्धम् इत्युक्तत्वात्। विक्षेपापक्रममण्डले गोलं बद्ध्वा-वगन्तव्ये कस्मादिह नक्षत्राणां पाता न प्रदर्शिताः। नक्षत्राणां गमनाभावात्॥ ६—९॥

अथेदानीं चन्द्रनक्षत्रयोगविशेषमुपदिदिक्षुराह —

यावत्या यद्दिशाक्षिप्त्या यावांस्तारासमागमः।
तावत्या तद्दिशाक्षिप्त्या तावानिन्दुस्समो भवेत्॥ १०॥

सौम्यदक्षिणदिग्भागे यस्य नक्षत्रस्य ये विक्षेपांशाः लिप्ताश्च पठिताः तस्यां दिशि तावद्विक्षेपयुतश्चेदिन्दुः तारासमसूत्रे समो दृश्यते। पूर्ववद्विक्षेपोनाधिकवशात् नक्षत्रग्रहयोरन्तरमवगम्यते॥ १०॥

केषाञ्चिन्नक्षत्राणां चन्द्रस्य च विशेषं दर्शयितुमाह —

अष्टिर्दशगुणा लिप्ता विक्षेपस्य यदोत्तरे।
निरुणद्धि तदा व्यक्तं कृत्तिकातारकां शशी॥ ११॥

षोडशलिप्ता दशगुणिता यावन्त्यस्ताभिर्लिप्ताभिः उत्तरतश्चन्द्रमा विक्षेपलिप्ताभिः कृत्तिकातारकां निरुणद्धि छादयतीत्यर्थः॥ ११॥

अन्यदप्याह —

उत्तरां परमां क्षिप्तिं गत्वा शिशिरदीधितिः।
आवृणोति स्वबिम्बेन मघामध्यस्थतारकाम्॥ १२॥

उत्तरतः परमविक्षिप्त्या खत्रिघनसङ्ख्यया स्वबिम्बेन हिमदीधितिः मघामध्यस्थ-तारकां वृणोतीति यावत्॥ १२॥

---

1. S1, 3 मघां मध्यस्थ.

ततोऽप्यन्यदाह —

आरोहति शशी षष्ट्या प्राजेशशकटं स्फुटम् ।
अष्टिवर्गेण याम्यायां योगतारा विलिख्यते ॥ १३ ॥

षष्टिलिप्ताभिर्याम्यायां रोहिणीशकटमारोहति तत्रैवाष्टिवर्गलिप्ताभिः षट्पञ्चयम-सङ्ख्याभिः प्राजेशशकटे योगतारापीति ॥ १३ ॥

अन्यदप्याह —

याम्यगः पञ्चहीनेन शतेन त्वाष्ट्रतारकाम् ।
मैत्रं शतेन सार्धेन द्विशत्या शक्रदेवताम् ॥ १४ ॥

पञ्चहीनेन (शतेन) याम्यगश्चित्रातारकां हन्ति । पुनः पञ्चाशदधिकेन शतेन मैत्रं हन्ति । शतद्वयेन ज्येष्ठां हन्ति ॥ १४ ॥

पुनरप्याह —

सप्ताशीत्या शशी हन्ति तारां सौम्यविशाखयोः ।
याम्यगो दक्षिणाशास्थो व्यक्तं शतभिषग्जिनैः ॥ १५ ॥

सप्ताशीत्या विशाखतारकां हन्ति । याम्यगश्चन्द्रः याम्यग एव जिनैश्चतु-र्विंशतिभिः शतभिषगपि हन्ति ॥ १५ ॥

पुनरप्याह —

पुष्यं पौष्णं च पातस्थो निरुणद्धि निशाकरः ।
यष्टियुक्तकलाक्षिप्त्या भेदः स्यात् ग्रहधिष्ण्ययोः ॥ १६ ॥

पुष्यं पौष्णं च केवलं पातस्थ एव निरुणद्धि निशाकरः । कुतः । तयोर्विक्षेपाभावात् । पातस्थ इत्यत्र पातसमलिप्त इत्यर्थः । एता विक्षेपलिप्ता यष्टियन्त्रोत्पन्नाः । किन्नाम यष्टियन्त्रम् । उच्यते । एकदण्डं प्राच्यां प्रतीच्यां वा प्रतिष्ठाप्य तदग्रेण यथा ग्रहधिष्ण्ययोः भेदं दृष्ट्वा क्वापि भूतले स्थित्वोपलक्ष्य तस्य तस्य तथैवात्रापादिता इत्यर्थः । एतदुक्तं भवति—अतिदूरस्थनक्षत्राणां गोलसमीपकक्ष्या-गतस्य चन्द्रस्य भेदं दर्शनविषये तत्र तत्र तावद्विक्षेपलिप्ताः चन्द्रस्येष्यन्त इति । अत्र पुनरेके दृष्टियुक्तकला इति च पठन्ति । तत्राप्ययमेवार्थः ॥ १६ ॥

एवं सर्वमष्टाधिकारं व्याख्याय पुनर्गणितविषये पटुत्वमवश्यं गणकानां इष्यत इत्येतत् प्रकटीकर्तुं बृहत्कर्मनिबन्धरसास्वादनमपि दर्शयितुं कुट्टाकारोदाहरणमाह —

१. CD शाक्रमुख्यां, E शक्रतारकाम् ।

शेषौ मण्डलजौ यमक्षितिजयोः संयुक्तविश्लेषिता-
वन्योन्याहतविग्रहौ च पददौ रूपेण संयोजितौ ।
एवं साधु विचिन्त्य वर्गविधिना द्वित्रिक्रमाद्वत्सरैः
संगुण्या द्युगणार्कजाक्षितिसुताः कालेन कालोद्भवाः ॥ ७ ॥

कुट्टाकारस्तावद् द्विविधः — साग्रो निरग्रश्चेति । अत्र निरग्रकुट्टाकारोदाहरण-मुच्यते । स पुनस्त्रैराशिकादुत्पद्यते । कथम् । गुणकारभागहारावुक्त्वा यस्य कस्यचिच्छेषमपि कथिते इति तदिच्छाफलेच्छाराशिं[1] तच्छेषं च पुनः पुनः आनयन कुट्टाकार नाम भवति । स तावन्निरग्र इत्युच्यते । अत्र गुणकारभागहारौ भगणभूदिवसौ । शेषस्तावन्मण्डलादिशेषः । इह शन्यङ्गारकयोः मण्डलशेषौ प्रदर्शितौ । तयोस्संख्या-प्रमाणं च लक्षणवशादूह्यम्[2] । कथम् । तयोः शेषयोः संयोगश्च विश्लेषश्च वर्गराशिर्भूत्वा निःशेषं मूलं ददाति । पुनरन्योन्याहतशरीरौ रूपयुतं च मूलं ददाति । एवंविधौ शेषौ वर्गक्रमादकद्वित्रिचतुःपञ्चादीनामालोच्य शनैश्शनैस्त्रिभिश्चतुर्भिर्वा वत्सरैः शेषावभ्यूह्य ताभ्यां सम्यक् तयोरहर्गणौ सूर्यजक्षितिसुतयोर्गतौ भगणौ च येन कालेन कालोत्पत्तय[3] एते समुद्भूताः ते भगणकैः संगुण्या[4] इत्यर्थः । तेन पुनरिहास्माभिरालोचितौ चतुर्विंशति चत्वारिंशच्च शन्यंगारकयोः । तत्र शनैश्चरानीताहर्गणौ ।

ष्कण । प्रप्र प्रहा हाष्क ण्ङ

ङ

न्न न्न न्न न्न् ।

अत्र तु पुनः शनैश्चरदृढभगणदृढवासरौ चन्द्राब्धिरसरसाग्नयः भूताद्र्यग्नि-नवस्वरवेदाब्धिनववह्नयश्च इह कल्पिता । मतिस्त्रिघनसंख्या । लब्धमेकमेव । अत्राङ्गारकस्य वक्ष्यामः । अस्य दृढभगणदृढवासरौ दर्शयामः । प्रथमं तावत् यमल-म्बरवेदेन्दुरन्ध्रचन्द्रः इत्येतद्दृढीभगणः । रूपलोकेन्दव इति संख्या दृढवासरस्य । अत्र मतिरष्टचत्वारिंशत् । लब्धमेकमेव । इहानीताहर्गणभगणयोर्न्यासः ।

[5]
× × ० ० ० ० ०

---

१. S2. तदिच्छाफलं चेच्छाराशिं
२. S2. दभ्यूह्यम्
३. S1. कालोत्पन्न एते.
४. S2. संगण्या.
५. S2 omits this.

झू त्वं हा प्र ।

प्रन ।

एवमिहास्माभिरवगतं अन्यैरन्यथावगतम् । शेषौ यदि यत्र क्वापि शन्यङ्गारकयोः दृष्टौ स्यातां ताभ्यामपि कुट्टाकारलक्षणेनैवमानेतव्यम् ॥ १७ ॥

अथेदानीमङ्गारकलिप्ताशेषेण कुट्टाकारानयनार्थमाह —

लिप्ताशेषः कुजस्य द्विकघनगुणितो मूलदो रूपयुक्तः
सप्ताभ्यस्तः सरूपः पुनरखिलपदो वर्गराशिस्स एव ।
इत्थं शेषं विचिन्त्य क्षितिजदिनगणो वेत्ति यो वर्षपूगैः
स स्यादम्भोधिकाञ्च्यां गणितपटुधियामग्रगामी धरायाम् ॥ १८ ॥

एकस्मादहर्गणादङ्गारकस्य मध्यमानयने कृते सति तत्रानीतभगणादिमध्यमं सर्वं विस्तृतमहर्गणश्च विनष्टस्तत्र लिप्ताशेषो मयावगतः । सोऽपि द्विकघनसंख्याभिरष्टभिर्गुणितो रूपयुक्तः । स पुनर्वर्गराशिर्भूत्वा निःशेषमूलं ददाति । स एव वर्गराशिस्सप्तगुणितस्तत्र रूपयुक्तः पुनरपि वर्गराशिर्भूत्वाखिलमूलं ददाति । इत्थंभूतं लिप्ताशेषं वर्षपूगैरनेकवर्षैः संचिन्त्य तेन शेषेण क्षितिजदिनगणौ यो वेत्ति गणकः स तावदम्भोधिमेखलायां धरायां गणितविषयपटुमतीनामग्रगण्यः स्यादित्यर्थः । अत्र तु पुनः तथाविधं शेषमनेकधा वर्णयन्ति । किं तेन कथनेनास्माभिरवगतमुच्यते । कथमेक एव लिप्ताशेषमित्यस्माकमभिप्रायः । स पुनर्द्विकघनगुणितो रूपयुक्तो नवसंख्यां गत्वा वर्गराशिर्भूत्वा निःशेषमूलं ददाति । स एव त्रयाणां वर्गराशिः पुनस्सप्तगुणितो रूपयुतश्चतुष्षष्टिसंख्यां गत्वा मूलमष्टानां वर्गराशिरखिलं ददात्येव । तस्मादेक एव लिप्ताशेषोऽङ्गारकस्य । तेनानीतोऽहर्गण इह कथ्यते न्यासः—

नप्र ।

हा ननूनत्वे ।

लब्धभगणादिरपि कथ्यते न्यासः ।

न प्रनन्न ।

अत्र लिप्तीकृतदृढभगणं दृढवासरं च पुनः पञ्चविंशतिसंख्यया अपवर्तितौ ताभ्यामानीतावहर्गणभगणादी एतौ । अथेहाप्यपवर्तितावुच्येते ।

न ह्म

'अष्टाश्विवह्निचन्द्राद्रिरामभूतरसेन्दवः' ।

दृढवासरोऽपि

'भूताश्विमुनिरन्ध्रेषु नेत्रबाणाः प्रकीर्तिताः ।'

अत्र मतिस्त्रिसंख्यालब्धमेकम् । अथ वा लिप्ताशेष इति यदुच्यते श्लोकं तदेवं योजनीयम् । कथम् । कुजस्य लिप्ताशेषः । स पुनर्द्विकघनगुणित एव मूलं ददाति । तन्मूलमेवं वर्गराशिर्भूत्वा रूपेण युक्तः सप्ताभिहतः पुनरपि रूपयुतो वर्गराशिर्भूत्वा निश्शेषं मूलं ददातीति तदप्यस्माभिरवगतम् । स तावद् द्विसंख्यः । तेनानीतो ऽहर्गण उच्यते न्यासः ।

नय प्र न हान्यप्रष्क

अत्र लब्धभगणादिरप्युच्यते न्यासः ।

ह्नँ ष्क न ष्क न न न न

अत्र मतिश्चतुस्संख्या लब्धमेकमेव, दृढभगणदृढवासरौ पूर्वोक्तावेव । अपरे लिप्ताशेषोऽष्टसंख्य इति वदन्ति । सोऽपि द्विकघनगुणितश्चतुष्षष्ठिसंख्यां गत्वा निःशेषमूलं ददाति । पुनरस्मिन्मूलेऽष्टसंख्ये रूपयुते सप्ताहते पुनरपि रूपसहिते स एव वर्गराशिर्भूत्वा मूलं ददाति तस्मात्तदानीताहर्गणभगणावप्युच्येते न्यासः [2]४३८६०८६, अहर्गणः ११७९०३११९२[3] । लब्धलिप्ता अत्रापि दृढवासराः पूर्ववत् । अत्र लिप्ताशेष एकौ द्वावष्टौ वा भवतु, कथं तथाविधेन शेषेणाहर्गणभगणाद्यानयनमुच्यते । बृहति भास्करीये प्रथमाध्याये यथोक्तं, अथ च गोविन्दकृतौ गोविन्दाचार्येण तस्मादपि विस्पष्टं कुट्टाकारद्वयस्य लक्षणमुच्यते । कथम् । तर्हि यथाचार्यप्रणीतं आर्याभिस्तदिह वक्ष्यामः—

यद्यप्युक्तं सकलं तथापि नैतत्प्रतीयते कर्म ।
अत इह कुट्टाकारं गणितं सम्यक्प्रवक्ष्यामि ॥

---

१. S3. ष्क ष्क.
२. S2. ४३८६
३. S1. omits the last digit.
४. S3. भट्टगोविन्दाचार्येण.

स पुनः कुट्टाकारो द्विविधस्तावन्निरग्रसाग्रतया ।
तत्र निरग्रो वाच्यः कुट्टाकारो मया पूर्वम् ॥

गुणकारभागहारौ विभजेदन्योन्यभक्तशेषेण ।
तौ तत्र भाज्यहारौ दृढाववासौ विनिर्दिष्टौ ॥

अन्योन्यशेषभक्तं गतगन्तव्यं यदा निरवशेषम् ।
तत्रेष्टाभ्यां कार्यं कुट्टनमन्यत्र दृढाभ्याम् ॥

भाज्यं निधाय तदधो हारं च पुनः परस्परं छिन्द्यात् ।
लब्धमधोऽधः प्रथमावासस्याधस्ततोऽप्यन्ये ॥

विभजेदेवं यावत् भाजकभाज्यावशून्यरूपौ स्तः ।
मतिकल्पना च विधिना समे पदे व्युत्क्रयाद्विषमे ॥

भाज्यात् भाज्याहृतगतशेषोनात् भाजकाभिहृतदेहात् ।
गतसहितात् भाज्याप्तं गतस्य हानौ मतिर्भवति ॥

रूपोनहारगुणितात् गन्तव्यात्तस्य भाज्यलब्धस्य ।
हारहृतस्य च शेषं योगे हारो मतिश्शेषः ॥

मतिहृतभाज्याच्छोद्ध्यं गतमगतं योजयेत्ततो विभजेत् ।
हारेण मतिं वल्या अधोधो निधायासमप्यस्याम् ॥

उपरिस्थमुपान्त्यहतं युतमन्त्ये नैवमेव परतश्च ।
एवं तावत्कुर्याद्यावद्द्वावेव तौ राशी ॥

उपरिस्थो हर्तव्यो हारेणाधःस्थितश्च भाज्येन ।
शेषं दिनादि चक्रादि च तत्साद्यच्च तेनाप्तम् ॥

कृत्वा वा कर्तव्यः कुट्टाकारस्तु रूपयुतिवियुती ।
गुणकारो लब्धं च स्यातां तदुपर्यधः शेषौ ॥

गुणकारगुणे शेषे लब्धगुणे हारभाज्यसंहृतयोः ।
शेषौ तत्र क्रमशो दिनचक्रादी भवेतां तौ ॥

राश्यादावुद्दिष्टे राश्यादेर्भागहारसंगुणितात् ।
राश्यादिमानलब्धं स्याच्छेषं मण्डलादीनाम् ॥

यच्छेषं युतहीनं तज्जातीयं सदा भवति भाज्यम् ।
इति राश्यादेश्शेषो भाज्यो राश्यादिमानहतो ॥

राश्याद्याहतभाज्यो हारेण यो भवत्यदृढरूपः ।
तत्रेष्टाभ्यां ताभ्यां शेषवशात्कर्म कर्तव्यम् ॥

अदृढं वा कर्तव्यं शुद्ध्या तेनापवर्त्य शेषं च ।
क्रियते मतिर्मतिमता तया पुनः कर्म कर्तव्यम् ॥

दृढवासरे चतुर्गुणिते भाज्ये च तयोरदृढता स्यात् ।
ताभ्यां दृढीकृताभ्यामेव तदा कर्म कर्तव्यम् ॥

हारादधिके भाज्ये हारात्तं भाजितं पृथक्तस्य ।
वल्ल्युपसंहारान्तं पूर्वोक्तं कर्म निष्पाद्य ॥

अत्रोपरि राश्याहतपृथक्स्थसहितो भवेदधोराशिः ।
एष विशेषो गदितः परमपि तुल्यं पुरोक्तेन ॥

केचिद्गृहादिशेषे तन्मण्डलानि शेषस्य ।
तन्मानं चानयते भाज्यस्थाने तु परिकल्प्य ॥

कृत्वा कुट्टाकारं मण्डलशेषेण तत्र लब्धेन ।
भगणानां च दिनानामानयने कुर्वते भूयः ॥

एवमाचार्यप्रणीतस्य सुबोधत्वादनेन लक्षणेनाशेषेण चाहर्गणाद्यानयनमवगन्तव्यं, अन्यत्सर्वं बृहति कर्मनिबन्धे द्रष्टव्यम् ॥ १८ ॥

एवं कुट्टाकाररसास्वादनिमित्तभूतोदाहरणार्थश्लोकद्वयमुक्त्वा इदानीमेतत्कर्मनिबन्धं मन्दबुद्धीनामनुग्रहार्थं कृतं न विपुलमतीनामित्येतत् प्रदर्शनार्थमाह —

विस्तारग्रन्थभीरूणां ग्रहसद्वर्त्मविचये ।
निबन्धः कर्मणां प्रोक्तो भास्करेण समासतः ॥ १९ ॥

1. E omits this verse. A F विस्तर
2. B has the following verse after this:
मतङ्गजस्य मत्तस्य मृगपोतस्य चोभयोः ।
वृत्तिर्हि दृश्यते तस्मात्प्रवृत्तिर्मेऽपि युज्यते ॥

ज्योतिःशास्त्रस्य गणितसंहिताहोरास्कन्धत्रयाधीनभेदस्य दुरवबोधत्वादेकस्मिन्नेव प्रपञ्चं कथं मन्दबुद्धीनामवगन्तुं शक्यमिति मत्वा प्रायेण विशेषतो गणितस्कन्धे गणितकालक्रियागोलप्रपञ्चभिन्ने सकलावबोधबुद्धिर्नोत्पद्यत इति विस्तरग्रन्थगत-सन्मार्गगतज्ञानस्य संक्षेपेण ग्रहणकर्मनिबन्धो यः स भास्करेणोक्त इत्यर्थः । एतदुक्तं भवति — आर्यभटप्रणीतं सकलमवगन्तुमिच्छद्भिः भाष्यबृहत्कर्मनिबन्धावेवावगन्तव्याविति । अथवायमर्थः — भाष्ये महति भास्करीये च कथित एवार्थः किमर्थोयं प्रबन्धः, ग्रहगतिज्ञानोपायत्वेनास्यार्थवत्त्वे इतरानर्थक्यमित्यन्यतरा. नर्थक्यबुद्धिर्येषां तान् प्रत्याह — विस्तारग्रन्थेति । भाष्येण तावत् सूत्रव्याख्यापरतन्त्रतया न मन्दबुद्धीनां ग्रहगतिज्ञानं भवति, महता भास्करीयेण च एकस्मिन्नेवोपायेनेकोपायकथनेन छायाभ्रमणकुट्टाकारादिशिल्पगणितसङ्कीर्णतया च न मन्दबुद्धीनां सम्यग् ग्रहगतिज्ञानं भवति । इति ग्रहगत्युपायमात्रकथनपरस्यास्यार्थवत्त्वमस्ति । तयोरप्यमन्दमतिविषयतयाऽर्थवत्त्वमस्त्येवेत्यर्थः ॥

इति शङ्करनारायणीयेऽष्टमोऽध्यायः ।

समाप्तं च लघुभास्करीयव्याख्यानम् ॥

MANUSCRIPTS NOTICES AND STUDIES

VIII

SANSKRIT EQUIVALENTS OF SOME MALAYALAM PROPER NOUNS.

BY

P. K. NARAYANA PILLAI.

The Problem — Its ritual significance. To a child born in any of the higher castes invariably a Sanskrit name is given on the occasion of the *Nāmakaraṇa* ceremony. But very often it is seen that this name in its pure Sanskrit form is not used either to address or to refer to the individual in day to day life. As a rule, in Kerala these Sanskrit names, consciously or unconsciously, are mutilated, shortened and adapted to the phonetic genius of the Malayalam language, evidently for the sake of convenience and ease in uttering them. Some illustrations: —

Malayalam.		*Sanskrit.*
Akkittan	... ...	Agnidattaḥ
Akkōta	... ...	Akṣodā
Tuppan	... ...	Subrahmaṇyaḥ
Pāppi	... ...	Pārvatī
Pōtāyan	... ...	Bhavadāsaḥ

As a result of this process of malayalamising the Sanskrit names which should have been begun many centuries ago, a good many derived proper nouns both masculine and feminine came into vogue among the Brāhmaṇas and Kṣatriyas of this country. In course of time these malayalamised names became so popular that they were looked upon as original names and their prototypes in Sanskrit were utterly neglected and consequently forgotten by almost all. But they could not afford to do so. For it is laid down that on ritual occasions the persons concerned are to be mentioned

by their Sanskrit names, otherwise the rite that is performed will have to be performed again using the necessary Sanskrit names as an expiatory measure. Therefore the Sanskrit equivalents of the Malayalam names could not be forgotten or neglected with impunity, and a knowledge of these became obligatory on the part of the members of these castes, particularly their priests. So it is but natural if the priests realised the importance of (the Sanskrit names for their profession and undertook the responsibility of finding them out and putting them on record for the use of those in the priestly order. In the rich collection of manuscripts in the Travancore University Manuscripts Library, there are four manuscripts in which the Sanskrit equivalents of nearly 1 0 Malayalam names are recorded in order to afford a ready referencer to the priests and thus to ensure a faultless performance of ceremonial rites.

Linguistic and Historical Importance. The importance of the phonetic equations contained in this work for the study of Indo-Aryan loan-words in Malayalam can hardly be overestimated. Regarding such loan words in Malayalam Professor R. L Turner says: "The great antiquity of some of the borrowings raises questions of great linguistic and cultural interest and should throw light on the development and practice of Sanskrit and its related languages in South India"[1]. In this branch of linguistic investigations Dr. K. Goda Varma's thesis entitled 'Indo-Aryan Loan Words in Malayalam' approved by the University of London for the Ph. D. Degree is a very valuable contribution, particularly so since it has opened a new vista of linguistic research and proved its fruitfulness beyond all doubts[2]. Here it may be noted that Dr. Varma has

1. See 'Indo-Aryan Loan Words in Malayalam', by Dr. K. Goda Varma.

2. The work on the relationship between Indo-Aryan and Dravidian Languages by Dr. L. A. Ravi Varma is another book useful for such studies.

discussed in his thesis a few borrowings recorded in the above-mentioned manuscripts. In my opinion there is scope for further investigations regarding the loan words not only in Malayalam but in other Dravidian languages also on the scientific lines chalked out by this well-known linguist of South India under the guidance of Prof. Turner, Director of the School of Oriental Studies, London.

